अहोरात्राभ्यां वै देवा प्रायणीयमतिरात्रं निरमिमत १, अर्द्धमासेभ्यश्चतुर्विंशमह ब्रह्मणोऽभिप्लव ३, क्षत्रात् पृष्ठ्यम् ४, अग्नेरभिजितम् ५ अद्भ्य स्वरसामान ६ सूर्य्याद्विषुवन्तम् ७ उक्ता आवृत्ता स्वरसामान । इ द्राद्विश्वजितम् ८, उक्तौ पृष्ठ्याभिप्लवौ मित्रावरुणाभ्यां गवायुषौ[1] ९, विश्वेभ्यो देवेभ्य दशरात्र १०, दिग्भ्यो दशरात्रिक पृष्ठ्य षडहम् ११ एभ्यो लोकेभ्य छन्दोमत् त्र्यह १२, सवत्सरात् दशममह १३, प्रजा[1]पतेर्महाव्रत १४, स्वर्गाल्लोकादुदयनीयमतिरात्र १५, तद्वा ए त् सवत्सरस्य जन्म स य एवमेत् सवत्सरस्य जन्म वेद सवत्सरेण सात्मा राल्लोका भूत्वा न्वानन्त्येतीति ब्राह्मणम् ॥ ९ ॥

कण्डिका ९ ॥ प्रायणीय अतिरात्रादि पन्द्रह प्रकार के यज्ञ और सवत्सर ॥

(अहोरात्राभ्यां वै देवा प्रायणीयम् अतिरात्र निरमिमत) दिन और रात से ही विद्वानों ने प्रायणीय [पान योग्य] अतिरात्र [रात्रि में पूरा होने वाले यज्ञ] को बनाया । १ । (अर्धमासेभ्य चतुर्विंशम् अह) आधे महीनो से चतुर्विंशमह [चौबीस अहयव वाले दिन अर्थात् यज्ञ] का । २ । (ब्रह्मण अभिप्लवम्) ब्रह्मा से अभिप्लव [उछल जाना, यज्ञ] को । ३ । (क्षत्रात् पृष्ठ्यम्) क्षत्रिय से पृष्ठ्य [सेचन यज्ञ] को । ४ । (अग्ने अभिजितम्) अग्नि [पराक्रम] से अभिजित् [विजय यज्ञ] को । ५ । (अद्भ्य स्वरसामान) जल से स्वरसामो [स्वर सहित साम वाले यज्ञों] को । ६ । (सूर्यात् विषुवन्तम्) सूर्य से विषुवत् [तुल्य रात्रि दिन के काल, अर्थात ग्रीष्म विषुवत् और हेम त विषुवत् वाले यज्ञ] को । ७ । (आवृत्ता स्वरसामान उक्ता) बार बार आने वाले स्वरसाम यज्ञ कह गये । (इ द्रात् विश्वजितम्) इन्द्र [ऐश्वर्यवान्] से विश्वजित् [दिग्विजय यज्ञ] को । ८ । (पृष्ठ्याभिप्लवौ उक्तौ) पृष्ठ्य और अभिप्लव यज्ञ कह गये । (मित्रावरुणाभ्यां गवायुषौ) मित्र और वरुण [प्राण और अपान] से गवायुषी [गौ विद्या या पृथिवी और आयु अर्थात् जीवन दो यज्ञों] का । ९ । (विश्वेभ्य देवेभ्य दाशरात्रम्) विश्वे देवाओ [सब दिव्य गुणों] से दशरात्र [दशरात्रि यज्ञ] को । १० । (दिग्भ्य दशरात्रिक पृष्ठ्य षडहम्) दिशाओ से दशरात्रिक पृष्ठ्य षडह को । ११ । (एभ्य लोकेभ्य छन्दोमत् त्र्यहम्) इन लोको से छन्दोमत् त्र्यह [छ दयुक्त तीन दिन वाले यज्ञ] को । १२ । (सवत्सरात् दशम् अह) सवत्सर [वर्ष] से दशम अह [दसवें दिन वाले यज्ञ] को । १३ । (प्रजापते महाव्रतम्) प्रजापति [पुरुष] से महाव्रत [उत्तम नियम] को । १४ । (स्वर्गात् लोकात् उदयनीयम्

९—(अतिरात्रम्) अतिक्रान्तो रात्रिम्, अच् समासा त । यज्ञविशेषम् (क्षत्रात्) क्षत्रियात् (पृष्ठ्यम्) स्त्रियपृष्ठ्यपृथ० (उ० २ । १२) पृषु सेचने—थक् । पृष्ठाद्युपसङ्ख्यानम् (वा० पा० ४ । २ । ४९) पृष्ठ—यन् । सेचनम् । (स्वरसामान) आर्षी प्रथमा द्वितीयार्थे । स्वरसाम्न । स्वरसहितसामवतो यज्ञान् (विषुवन्तम्) तुल्यरात्रिदिनकालवन्त यज्ञम् (आवृत्ता) अभ्यस्ता (मित्रावरुणाभ्याम्) प्राणापानाभ्याम् (गवायुषी) गौश्च आयुश्च । यज्ञविशेषम्

---

१ यहाँ देखें १९० पृ० की टिप्पणी ॥ सम्पा० ॥

अतिरात्रम्) स्वर्ग लोक मे उदयनीय अतिरात्र [उत्तमता से पाने योग्य रात्रि मे पूरे होने वाले यज्ञ] को [बनाया] । १५ । (तत् वै एतत् सवत्सरस्य जन्म) सो यही सवत्सर यज्ञ का जन्म है । (य एवम् एतत् सवत्सरस्य जन्म वेद स सवत्सरेण समान सलोक भूत्वा देवम् अभ्येति इति ब्राह्मणम्) जो इस प्रकार सवत्सर के जन्म को जानता है, वह सवत्सर से समान आत्मा वाला और समान लोक वाला होकर उत्तम गुण पाता है—यह ब्राह्मण [ब्राह्मज्ञान] है ॥ ६ ॥

भावार्थ—जो मनुष्य सवत्सर [काल] यज्ञ के विविध अङ्गो को जानकर उनका ठीक प्रयोग करता है, वह सवत्सर [काल] के समान विजयी होता है ॥ ६ ॥

विशेष—इस कण्डिका सशोधन के विषय में क० ८२ देखो ॥

कण्डिका १० ॥

अथ यत् प्रायणीयमतिरात्रमुपयन्त्यहोरात्रावेव तद्देवौ देवते यजतोऽहोरात्रे देवौ देवते भवतोऽहोरात्रयोर्देवयो सायुज्य सलोकता यन्ति य एतदुपयन्ति । १ अथ यच्चतुर्विंशमहरुपयन्त्यर्द्धमासानेव तद्देवा देवता यजन्तेऽर्द्धमासा देवा देवता भवन्त्यर्द्धमासाना देवाना सायुज्य सलोकता यन्ति य एतदुपयन्ति । २ । अथ यदभिप्लवमुपयन्ति ब्रह्माणमेव तत् देव देवता यजन्ते ब्रह्मा देवो देवता भवति ब्रह्मणो देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । ३ । अथ यत् पृष्ठ्यमुपयन्ति क्षत्रमेव तत् देव देवता यजन्ते क्षत्र देवो देवता भवति क्षत्रस्य देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । ४ । अथ यदभिजितमुपयन्त्यग्निमेव तत् देवं देवता यजन्तेऽग्निर्देवो देवता भवत्यग्नेर्देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । अथ यत् स्वरसाम्न उपयन्त्यप एव तत् देवीर्देवता यजन्ते आपो देव्यो देवता भवन्त्यपा देवीना सायुज्य सलोकता यन्ति य एतदुपयन्ति । ६ । अथ यद्विषुवमुपयन्ति सूर्य्यमेव तत् देव देवता यजन्ते सूर्य्यो देवो देवता भवति सूर्य्यस्य देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । ७ । उक्था आवृता स्वरसामान । यद्विश्वजितमुपयन्तीन्द्रमेव तत् देव देवता यजन्ते इन्द्रो देवो देवता भवतीन्द्रो देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । ८ । उक्थौ पृष्ठ्याभिप्लवौ । यद् गवायुषी उपयन्ति मित्रावरुणावेव तत् देवौ देवते यजतो मित्रावरुणौ देवौ देवते भवतो मित्रावरुणयोर्देवयो सायुज्य सलोकता यन्ति य एतदुपयन्ति । ९ । अथ यद् दशरात्रमुपयन्ति विश्वानेव तद् देवान् देवता यजन्ते विश्वे देवा देवता भवन्ति विश्वेषा देवाना सायुज्य सलोकता यन्ति य एतदुपयन्ति । १० अथ यद् दाशरात्रिक पृष्ठ्य षडहमुपयन्ति दिश एव तत् देवीर्देवता यजन्ते देव्यो देवता भवन्ति दिशा देवीना सायुज्य सलोकता यन्ति य एतदुपयन्ति । ११ अथ यच्छन्दोमपञ्चाहमुपयन्तीमानेव तल्लोका देवान् देवता यजन्त इमे लोका

(सवत्सरात्) सम्पूर्वाच्चिन् (उ० ३ । ७२) सम् + वस निवासे—सरन् चि सवत्सर सवसन्तेऽस्मिन् भूतानि—निरु० ४ । २७ । द्वादशमासात्मकात् काल। समयात् ॥

देवता भवन्ति एषां लोकानां देवानां सायुज्य सलोकतां यन्ति य एतदुपयन्ति । १२ । अथ यद् दशममहरुपयन्ति सवत्सरमेव तद् देव देवता यजन्ते सवत्सरो देवो देवता भवति सवत्सरस्य देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । १३ । अथ यन्महाव्रतमुपयन्ति प्रजापतिमेव तद् देव देवता यजन्ते प्रजापतिर्देवो देवता भवति प्रजापतेर्देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । १४ । अथ यदुदयनीयमति रात्रमुपयन्ति स्वर्गमेव तल्लोक देव देवता यजन्ते स्वर्गो लोको देवो देवता भवति स्वर्गस्य लोकस्य देवस्य सायुज्य सलोकता यन्ति य एतदुपयन्ति । १५ । तद् वा एतत्सवत्सरस्य जन्म, स य एवमेतत्सवत्सरस्य जन्म वेदाप्त्वत सवत्सर स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एव वेद सवत्सरेण सात्मा सलोको भूत्वा देवां अप्येतीति ब्राह्मणम् ॥ १० ॥

कण्डिका १० ॥ प्रायणीय अतिरात्र आदि पन्द्रह प्रकार के यज्ञ और उनके फल और सवत्सर का जन्म ॥

(अथ यत् प्रायणीयम् अतिरात्रम् उपयन्ति तत् अहोरात्रौ एव देवौ देवते यजत अहोरात्रौ देवौ देवते भवत अहोरात्रयो। देवयो सायुज्य सलोकता यन्ति ये एतत् उपयन्ति) फिर जब प्रायणीय अतिरात्र [यज्ञ क० ९] को स्वीकार करते हैं तब दिन और रात ही दोनो देव देवता पूजे जाते हैं दिन और रात दोनो देव देवता [मुख्य विषय] होते हैं, दिन और रात दोनो देवों के सहयोग और सहवास को वे पाते हैं, जो इसको स्वीकार करते हैं । १ । (अथ यत् चतुर्विंशम् अह. उपयन्ति तत् अर्धमासान् एव देवान् देवतां यजन्ते, अर्द्धमासा देवा देवता भवन्ति, अर्द्धमासानां देवाना सायुज्यं सलोकता यन्ति ये एतत् उपयन्ति) फिर जब चतुर्विंश अह [यज्ञ] को स्वीकार करते हैं, तब आधे आधे महीनों देवौ देवता को ही पूजते हैं, आधे आधे महीने देव देवता होते हैं, आधे आधे महीनों देवों के सहयोग और सहवास वे पाते हैं जो इसको स्वीकार करते हैं । २ । (अथ यत् अभिप्लवम् उपयन्ति तत् ब्रह्माणम् एव देव देवतां यजन्ते, ब्रह्मा देव देवता भवति ब्रह्मण देवस्य सायुज्य सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब अभिप्लव को स्वीकार करते हैं, तब ब्रह्मा ही देव देवता को पूजते हैं, ब्रह्मा देव देवता होता है ब्रह्मा देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । ३ । (अथ यत् पृष्ठ्यम् उपयन्ति तत् क्षत्रम् एव देव देवता यजन्ते क्षत्र देव देवता भवति, क्षत्रस्य देवस्य सायुज्य सलोकता यन्ति ये एतत् उपयन्ति) फिर जब पृष्ठ्य यज्ञ को स्वीकार करते हैं, तब क्षत्रिय ही देव देवता को पूजते हैं, क्षत्रिय देव देवता होता है, क्षत्रिय देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते है । ४ । (अथ यत् अभिजितम् उपयन्ति तत् अग्निम् एव देव देवता यजन्ते अग्नि देवः देवता भवति अग्नेः देवस्य सायुज्य सलोकता यन्ति ये एतत् उपयन्ति) फिर जब अभिजित् यज्ञ को स्वीकार करते हैं, तब अग्नि ही देव देवता को पूजते हैं, अग्नि देव

१०—(यजत) पूज्येते । अन्यद् व्याख्यातम् क० ८, ९ ॥

षडिति होवाच षड् वा इति होवाच षड् वा ऋतव ऋतूनामाप्त
कति त्वेवेति पञ्चेति होवाच पञ्च वा इति होवाच पञ्चपदा पङ्क्ति प
यज्ञ ६ । कति त्वेवेति चत्वारीति होवाच चत्वारि वा इति होवाच चत्व
वेदा वेदैर्यज्ञस्तायते ७ । कति त्वेवेति त्रीणीति होवाच त्रीणि वा इनि ह
त्रिषवणो वै यज्ञ सवनैर्यज्ञस्तायते । ८ । कति त्वेवेति द्वे इति होवाच द्वे व
होवाच द्विराद्वै पुरुषो द्विप्रतिष्ठ पुरुष पुरुषो वै यज्ञ ९ । कति त्वेवेत्येक
होवाचैकम् वा इति होवाचाहरहरित्येकमेव सव संवत्सरम् १० ॥ २४ ॥

इत्यथववेदस्य गोपथब्राह्मणपूर्वभागे चतुथ। प्रपाठक समाप्त ।

कण्डिका २४ ॥ प्रेदि कौशाम्बेय कौसुरविन्दु और उद्दालक आरुण सवत्सर और यज्ञीय दिनों के विषय में प्रश्नोत्तर ॥

(प्रेदि ह वै कौशाम्बेय कौसुरविन्दु, उद्दालक आरुण ब्रह्म
उवाच) प्रेदि [बडा ऐश्वयवान् ऋषि] कौशाम्बेय [कौशाम्बी अर्थात् पटना
का रहने वाला], कौसुरवि दु [भूमि के ऐश्वय का जानने वाला] था, [उस
उद्दालक गो० पू० ३ । ६ आरुण, [अरुण के पुत्र] ने ब्रह्मचय का उपदेश किया ।
आचार्य पप्रच्छ कुमार ते पिता सवत्सरस्य कति अहानि अमन्यत इति,
तु एव इति) उस [प्रेदि] से आचाय [उद्दालक] ने पूछा— हे कुमार ! तेरा
सवत्सर यज्ञ के कितने दिन मानता था, फिर कितने । (दश इति ह) [प्रेदि
दस । (उवाच दश वै इति ह) वह [उद्दालक] बोला—अरे दस ही । (द
दशाक्षरा विराट्, वैराज यज्ञ) वह [प्रेदि] बोला—दस अक्षर वाला [
[छ द] है और विराट् [अर्थात् वेद] से सिद्ध किया हुआ यज्ञ है । १ । (क
एव इति), [उद्दालक] फिर कितने । (नव इति ह) [प्रेदि] अरे नौ । (उ
नव वै इति ह) [उद्दालक] अरे नौ ही हैं । (उवाच नव वै प्राणा प्राणै
तायते) [प्रेदि] बोला—नौ ही प्राण [सात मस्तक के दो नीचे के छिद्र] हैं,
से यज्ञ फैलाया जाता है । २ । (कति तु एव इति) [उद्दालक] फिर कितने । (
इति ह) [प्रेदि] अरे आठ । (उवाच अष्ट वै इति ह) [उद्दालक] अरे आ
हैं । (उवाच अष्टाक्षरा गायत्री गायत्र यज्ञ) [प्रेदि] आठ अक्षर [के
वाली गायत्री है गायत्री से सिद्ध किया हुआ यज्ञ है । ३ । (कति तु एव इ
[उद्दालक] फिर कितने । (सप्त इति ह) [प्रेदि] अरे सात । (उवाच स

२४—(प्रेदि) इगुपधात् कित (उ० ४ । १२०) प्र + इदि परमैश्वय
इन् कित्, नलोप । परमैश्वय्यवान् । ऋषिविशेष (कौशाम्बेय) तेन
त्तम् (पा० ४ । २ । ६८) कुशाम्ब—अण् । कुशाम्बेन निर्वृत्ता नगरी कौशाम्
कुसुमपुरी । पाटलिपुत्रनगरी । पटना इति भाषायाम् । सोऽस्य नि
(पा० ४ । ३ । ८६) कुशाम्बी—ढञ् । कौशाम्बीनिवासी (कौसुरविन्दु)
धाव्गृधिभ्य क्रन् (उ० २ । २४) कु + षु प्रसवैश्वययो—क्रन् । कुसुर भू

एव देव देवता यजन्ते, सवत्सर देव देवता भवति, सवत्सरस्य देवस्य सायुज्य सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब दशम अह [दसवें दिन वाले यज्ञ] को स्वीकार करते हैं, तब सवत्सर ही देव देवता को पूजते हैं, संवत्सर देव देवता होता है, सवत्सर देव का सहयोग और सहवास व पाते हैं जो इसे स्वीकार करते हैं । १३ । (अथ यत् महाव्रतम् उपयन्ति तत् प्रजापतिम् एव देव देवता यज ते प्रजापति देव देवता भवति, प्रजापते देवस्य सायुज्य सलोकता यन्ति ये एतत् उपयन्ति) फिर जब महाव्रत यज्ञ को स्वीकार करते हैं तब प्रजापति ही देव देवता को पूजते है, प्रजापति देव देवता होता है प्रजापति देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते हैं । १४ । (अथ यत् उदयनीयम् अतिरात्रम् उपयन्ति तत् स्वर्गम् एव लोकम् देव देवतां यजन्ते स्वर्ग लोक देव देवता भवति, स्वगस्य लोकस्य देवस्य सायुज्य सलोकतां यन्ति ये एतत् उपयन्ति) फिर जब उदयनीय अतिरात्र यज्ञ को स्वीकार करते हैं तब स्वर्ग ही लोक देव देवता को पूजते हैं, स्वग लोक देव देवता होता है स्वग लोक देव का सहयोग और सहवास वे पाते हैं जो इसे स्वीकार करते है । १५ । (तत् वै एतत् सवत्सरस्य जन्म) सो यही सवत्सर का जन्म है । (य एवं संवत्सरस्य जन्म वेद स एतत् सवत्सरम् आप्त्वा स्वर्गे लोके प्रतिष्ठति) जो इस प्रकार संवत्सर के इस ज म को जानता है वह इस सवत्सर को पाकर स्वग लोक में ठहरता है । (प्रजया पशुभि प्रतितिष्ठति, य एव वेद, सवत्सरेण सात्मा सलोक भूत्वा देवान् अप्येति इति ब्राह्मणम्) वह प्रजा [सतानादि] से और पशुओ से प्रतिष्ठा पाता है जो ऐसा जानता है, और सवत्सर के साथ एक आत्मा वाला और एक लोक वाला होकर दिव्य गुणों को पाता है—यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १० ।

भावार्थ —यहां सवत्सर यज्ञ का विशेष वर्णन है, भावार्थ कण्डिका ९ के समान है ॥ १० ॥

विशेष —इस कण्डिका का मिलान क० ७ । ८ । ९ से करो ॥

कण्डिका ११ ॥

स वा एष सवत्सरोऽधिदैव चाध्यात्मं च प्रतिष्ठित स य एवमेतत् संवत्सरमधिदैव चाध्यात्म च प्रतिष्ठितं वेद प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एव वेद स वा एष सवत्सर ॥ ११ ॥

कण्डिका ११ ॥ सवत्सर के ज्ञान की महिमा ॥

(स वै एष सवत्सर अधिदैव च अध्यात्मं च प्रतिष्ठित) सो यही संवत्सर अधिदव [मुख्य देवता] और अध्यात्म [आत्मा के अधिकार वाला ज्ञान] होकर ठहरा है । (य एवम् एतत् सवत्सरम् अधिदव च अध्यात्म च प्रतिष्ठित वेद स प्रतिष्ठति) जो पुरुष इस प्रकार इस सवत्सर को अधिदैव और अध्यात्म ठहरा हुआ

जानता है वह ठहरता है । (प्रजया पशुभि प्रतितिष्ठति य एव वेद) वह प्रज साथ और पशुओ के साथ प्रतिष्ठा पाता है जो ऐसा जानता है । (स वै एष सवत्सर सो यही सवत्सर है ॥ ११ ॥

भावार्थ —मनुष्य सवत्सर [यथावत् बसाने वाले काल] को बाहिर और भ से ठीक ठीक काम मे लाने से ससार मे यश पाता है ॥ ११ ॥

कण्डिका १२ ॥

स वा एष सवत्सरो बृहतीमभिसम्पन्नो द्वावक्षरावह्ना षडहो द्वौ पृष्ठ भिप्लवौ गवायुषी दशरात्रस्तथा खलु षट्त्रिंशत् सम्पद्यन्ते षट्त्रिंशदवदाना षट्त्रिंशदक्षरा बृहती बाहतो वै स्वर्गो लोको बृहत्या वै देवा स्वर्गे लोके य॰ बृहत्या स्वर्गे लोके प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिर्य एव वेद स वा सवत्सर ॥ १२ ॥

कण्डिका १२ ॥ सवत्सर की बृहती छन्द से उपमा और महिमा ॥

(स॰ वै एष सवत्सरः बृहतीम् अभिसपन्न) सो यही सवत्सर [छन्द] से यथावत् मिला हुआ है—(द्वौ अक्षरौ अह्ना षडह द्वौ पृष्ठ्याभि गवायुषी दशरात्र) दो अक्षर (अह्नाम्) बहुत दिन वाले यज्ञो मे (षडह) दिन वाला यज्ञ है, दो पृष्ठ्य और अभिप्लव तथा गवायुषी [गो और आयु (दशरात्र) दश रात्रि वाला यज्ञ है । (तथा खलु षट्त्रिंशत् सम्पद्यन्ते) इस से ही वे छत्तीस [? ?] बनते है [षडह, पृष्ठ्य और अभिप्लव तथा गवायुषी दशरात्र वा दाशरात्रिक पदो के लिये देखो कण्डिका ९, १०] । (षट्त्रिंशदवदाना षट्त्रिंशदक्षरा बृहती) छत्तीस खण्ड वाली गो है [और गो के समान] छत्तीस वाला बृहती छ द [वेदवाणी] है । (बाहत. वै स्वर्ग लोक) बृहती [वेदवा वाला ही स्वग है । (बृहत्या वै देवा स्वर्गे लोके यजन्ते) बृहती [वेदवाणी द्वारा देवता [विद्वान् लोग] स्वग लोक मे पूजे जाते हैं । (बृहत्या स्वर्गे प्रतिष्ठति, प्रजया पशुभिः प्रतितिष्ठति य एवं वेद) बृहती [वेदवाणी] से लोक मे वह ठहरता है और प्रजा के साथ और पशुओ के साथ वह प्रतिष्ठा पाता ऐसा जानता है । (स वै एष सवत्सर) सो यही सवत्सर है ॥ १२ ॥

भावार्थ —वेदवाणी द्वारा सवत्सर के सुप्रयोग से मनुष्य प्रतिष्ठा पावे ॥ १२

विशेष —इस कण्डिका का मिलान करो गो० पू० ३ । १८ तथा ४ । ९, १०

१२—(अभिसपन्न॰) सम्यग् युक्त (बृहती) वाक् । वेदवाणी छन्दो (बार्हतः) बृहती—अण् । बृहत्या वेदवाण्या सम्बद्धः ॥

कण्डिका १३ ॥

स वा एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशेन महाव्रत विषुवति महाव्रत महाव्रत एव महाव्रत त ह स्मैतमेव विद्वास पूर्वे त्रिमहाव्रतमुपयन्ति ते तेजस्विन आसन् सत्यवादिन सशितव्रता य एनमद्य तथापेयुर्यथाऽऽमपात्रमुदक आसिक्ते निर्मृज्येदेव यजमाना निमृज्येरन्नुपर्युपर्यन्ति तथा ह्यस्य सत्येन तपसा व्रतेन चाभिजित मवरुद्ध भवति य एवं वेद स वा एष संवत्सर ॥ १३ ॥

कण्डिका १३ ॥ संवत्सर और महाव्रत ॥

(स वै एष सवत्सर त्रिमहाव्रत, चतुर्विंशेन महाव्रतम्, विषुवति महाव्रतम्, महाव्रते एव महाव्रतम्) सो यही सवत्सर [यज्ञ] तीन महाव्रत वाला है, [अर्थात्] चतुर्विंश [चौबीस पक्ष वाले] के साथ महाव्रत १, विषुवान् [तुल्य दिन रात वाले काल अर्थात् मेष तुला की सङ्क्रान्ति के काल] मे महाव्रत २, महाव्रत में महाव्रत ३ । (त ह एत त्रिमहाव्रतम् एव पूर्वे विद्वांस उपयन्ति स्म, ते तेजस्विनः सत्यवादिन सशितव्रता आसन्) उस ही तीन महाव्रत वाले [सवत्सर] को इस प्रकार पहिले विद्वानों ने स्वीकार किया, वे तेजस्वी, सत्यवादी, व्रत पूरे करने वाले हुये । (ये एन अद्य तथा अपेयु यथा आमपात्रम् उदके आसिक्ते निर्मृज्येत् एव यजमाना निमृज्येरन्) जो [याजक] इस [सवत्सर] को आज इस प्रकार नष्ट कर देवें, जैसे कच्चा [मिट्टी का] पात्र जल भर जाने पर घुल जावे वैसे ही [उन मूर्ख याजकों द्वारा] यजमान घुल जावें । (उपरि उपयन्ति तथा ह सत्येन तपसा व्रतेन च अस्य अभिजितम् अवरुद्धं भवति, य एवं वेद) वे [उस को] ऊपर [वर्तमान होता हुआ] स्वीकार करते हैं और भी सत्यभाषण से, [ब्रह्मचर्य्यादि] तप से, और अग्निहोत्र आदि व्रत से उस का अभिजित् [सब ओर से जीतने वाला यज्ञ] प्राप्त हो जाता है जो इस प्रकार जानता है । (स वै एष सवत्सर) सो यही सवत्सर [यज्ञ] है ॥ १३ ॥

भावार्थ —विद्वान् कर्मकुशल याजको द्वारा ही यजमानो का यज्ञ सिद्ध होता है ॥१३॥

कण्डिका १४ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात् कथमनाकूत्यै भवतीति यमेवामु पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठयो निर्मित , पृष्ठयादभिजित् , अभिजित स्वरसामान , स्वरसामभ्यो विषुवान्, विषुवतः स्वरसामान , स्वरसामभ्यो विश्वजित्, विश्वजित पृष्ठयाभिप्लवो, पृष्ठया-

---

१३- (त्रिमहाव्रत) त्रीणि महाव्रतानि यस्मिन् स तथाभूत (उपयन्ति स्म) स्वीकृतवन्त (संशितव्रता) सम्यक्सम्पादितव्रता (अद्य) अस्मिन् दिने । इदानीम् (अपेयु) अप—इयु । नाशयेयु (आमपात्रम्) अपक्वपात्रम् (आसिक्ते) समन्तात् सिञ्चिते (निर्मृज्येत्) शोधनेन नश्येत् (निर्मज्येरन्) नश्येयु (अवरुद्धम्) लब्धम् ॥

भिप्लवाभ्या गवायुषी गवायुभ्यां दशरात्र , दशरात्रात्[1] महाव्रत 'महाव्रतादु यनीयोऽतिरात्र उदयनीयोऽतिरात्र स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै य वेद स वा एष सवत्सर ॥ १४ ॥

कण्डिका १४ ॥ सवत्सर और महाव्रत यज्ञ के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अह उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेय कथम् अनाकूत्य भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे [यजमान] अयोग्य सकल्प के लिये होता है। (यम् एव अमुम् अतिरात्रम् विषु पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] विषुवान् से पहिले स्वीकार करते है, उस से [वह अयोग्य सकल्प के लिये होता ऐसा कहे। (अभिप्लवात् पृष्ठय निर्मित) [क्योकि] अभिप्लव [यज्ञ] से पृ [यज्ञ] बनाया गया है १, (पृष्ठयात् अभिजित्) पृष्ठय से अभिजित [सब ओ जीतने वाला यज्ञ] २, (अभिजित स्वरसामान) अभिजित् से स्वरसाम ३, (स सामभ्य विषुवान्) स्वरसामो से विषुवान [ग्रीष्म और शीत के तुल्य दिन रात्रि काल मे यज्ञ] ४, (विषुवत स्वरसामान) विषुवान से स्वरसाम ५, (स्वरसाम विश्वजित्) स्वरसामो से विश्वजित् ६, (विश्वजित पृष्ठयाभिप्लवौ) विश्वजि से पृष्ठय और अभिप्लव ७, (पृष्ठयाभिप्लवाभ्या गवायुषी) पृष्ठय और अभि से गवायुषी [कण्डिका ९] ८, (गवायुभ्यां दशरात्र) दोनो गवायु [गौ और आ से दशरात्र ९, (दशरात्रात् महाव्रतम्) दशरात्र से महाव्रत १०, (महाव्रतात् उदयनं अतिरात्र) महाव्रत से उदयनीय अतिरात्र [बनाया गया है] ११। (उदयन अतिरात्र [अस्य] स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै, य एव वे उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिये, भोजन योग्य अन्न के लिये और प्रति के लिये होता है, जो ऐसा जानता है। (स वै एष सवत्सर) सो यही सवत्सर है ॥

विशेष —इस कण्डिका के साथ देखो कण्डिका १७ तथा २२ ॥

कण्डिका १५ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्त महाव्रतमुपेयात् कथमनाकृ भवतीति यमेवामु पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात् पृष्ठ निर्मित, पृष्ठयादभिजित्, अभिजित स्वरसामान, स्वरसामभ्यो विषुव विषुवत स्वरसामान, स्वरसामभ्यो विश्वजित्, विश्वजित पृष्ठयाभिप्ल पृष्ठयाभिप्लवाभ्या गवायुषी, गवायुभ्यां दशरात्रोऽथ ह देवेभ्यो महाव्रत न

१४—(उपेत्य) स्वीकृत्य (अनुपेत्य) अस्वीकृत्य (अनाकूत्यै) नञ्+आ शब्दे—क्तिन् । अयोग्यसकल्पाय ।

---

१ पू स "दशरात्राय, 'उदयनीयाय', अतिरात्राय" इति पाठ ॥ सम्पा० ॥

कथमूर्ध्वं स्तामैर्विषुवन्तमुपागाता वृत्तैर्मामिति ते देवा इह सामिवासुरुप न यज्ञक्रतु जानीमो य ऊर्ध्वस्तोमो येनैतदहरवाप्नुयामेति तत एत द्वादशरात्रमू र्ध्वस्तोम ददृशुस्तमाहरस्तेनायज त तत एभ्योऽतिष्ठस्तिष्ठति ह्यस्मै महाव्रत प्रतिष्ठति प्रतितिष्ठति प्रजया पशुभिय एव वेद स वा एष सवत्सर ॥१५॥

कण्डिका १५ ॥ सवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अह उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात्, कथम् अनाकूत्य भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् को न स्वीकार करके महाव्रत का स्वीकार करे, कैसे वह [यजमान] अयोग्य सकल्प के लिये होता है। (यम् एत्र अमुम् अतिरात्र विषुवत पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करने हैं उससे [वह अयोग्य सकल्प के लिये होता है] ऐसा कहे। (अभिप्लवात् पृष्ठय निर्मित) [क्योंकि] अभिप्लव [यज्ञ] से पृष्ठय [यज्ञ] बनाया गया है १, (पृष्ठयात् अभिजित्) पृष्ठय से अभिजित् २, (अभिजित स्वरसामान) अभिजित् से स्वरसाम ३, (स्वरसामभ्य विषुवान्) स्वरसामों से विषुवान् [क० १४] ४, (विषुवत स्वरसामान) विषुवान् से स्वरसाम ५, (स्वरसामभ्य विश्वजित्) स्वरसामो से विश्वजित् ६, (विश्वजित पृष्ठयाभिप्लवौ) विश्वजित से पृष्ठय और अभिप्लव ७, (पृष्ठयाभिप्लवाभ्या गवायुषी) पृष्ठय और अभिप्लव से गवायुषी [क० ६] ८ (गवायुभ्या दशरात्र) दोनो गवायु से दशरात्र [बनाया गया है] ९। (अथ ह देवेभ्य महाव्रत न तस्थे कथम् ऊर्ध्वं स्तोमै विषुवन्तम् उपागाताम्) फिर भी देवताओ के लिये महाव्रत न ठहरा, किस प्रकार ऊर्ध्वं स्तोमो [स्तोम विशेषो] से विषुवान् यज्ञ को स्वीकार करे। (वृत्तै माम् इति ते देवा इह सामिवासु, त यज्ञक्रतुम् उपजानीम य ऊर्ध्वस्तोम, येन एतत् अह अवाप्नुयाम इति) सच्चरित्रो से मुझको, तेरे लिये देवता [विद्वान् लोग] यहां मोक्ष विद्या में निवास करने वाले हैं, उस यज्ञ कर्म को समीप होकर हम जानें जो ऊर्ध्वस्तोम है और जिससे इस अह [दिन अर्थात् यज्ञ विशेष] को हम प्राप्त करें [इन ब्राह्मण वचनो से विषुवान् यज्ञ को स्वीकार करे]। (तत एत द्वादशरात्रम् ऊर्ध्वस्तोमं ददृशु तम् आहरन् तेन अयजन्त तत एभ्य अतिष्ठन्) इसी से इस द्वादशरात्र ऊर्ध्वस्तोम को उन्हो [ऋषियों] ने देखा, उसे वे ले आये, उससे यज्ञ किया, उसीसे उन [देवताओं] के लिये वह [महाव्रत] ठहरा। (अस्मै ह महाव्रतं तिष्ठति प्रतिष्ठति, प्रजया पशुभि प्रतितिष्ठति य एवम् वेद) उस [पुरुष]

१५—(न) निषेधे (तस्थे) तस्थौ (उपागाताम्) उप + आ + गाङ् गतौ—लोट। उपागच्छेत्। उपेयात् (वृत्तै) वृतु वर्तने—क्त। सच्चरित्रै (सामिवासु) कुवापाजिमि० (उ० १। १) साम्नि + वस निवासे—उण्, नकार लोप। साम्निवासक। मोक्षज्ञाने निवासशील (उप) उपेत्य (यज्ञक्रतुम्) यज्ञकर्म। यज्ञप्रज्ञाम् (अतिष्ठन्) अतिष्ठत् ॥

के लिये ही महाव्रत ठहरता है, महाव्रत अच्छे प्रकार ठहरता है, और वह प्रजा अ पशुओ से प्रतिष्ठा पाता है जो ऐसा जानता है। (स वै एष सवत्सर) वही स सवत्सर है ॥ १५ ॥

कण्डिका १६ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विपुवन्त महाव्रतमुपेयात् कथमनाकृ भवतीति यमेवामु पुरस्ताद्विपुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयात् तदाहु कं सवत्सरस्य पराञ्च्यहानि भवन्ति, कत्यर्वाञ्चि, तद्यानि सकृत् सकृदुपयन्ति तानि पराञ्चि, अथ यानि पुन पुनरुपयन्ति तान्यर्वाञ्चि, इत्येवैनान्युपासीरन् षडहयो ह्यावृत्तिमन्वावर्तन्ते य एव वेद स वा एष सवत्सर ॥ १६ ॥

कण्डिका १६ ॥ सवत्सर और महाव्रत के विषय मे प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अह उपेत्य विपुवन्तम् अनुपेत्य महाव्रतम् उपेया कथम् अनाकृत्य भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] स्वीकार करके और विपुवान को न स्वीकार करके महाव्रत को स्वीकार करे कैसे व [यजमान] अयोग्य सकल्प के लिये होता है। (यम् एव अमुम् अतिरात्र विषुव पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] का विष वान् से पहिले स्वीकार करते है, उससे [वह अयोग्य सकल्प के लिये होता है] ऐसा कहे (तत् आहु सवत्सरस्य कति पराञ्चि अहानि भवन्ति, कति अर्वाञ्चि) यह कह है कि सवत्सर के कितने पराञ्चि [प्राचीन वा पुराने] दिन होते है और कितने अर्वा [अर्वाचीन वा नूतन]। (तत् यानि सकृत् सकृत् उपयन्ति तानि पराञ्चि, अ यानि पुन पुन उपयन्ति तानि अर्वाञ्चि इति एव एनानि उपासीरन्) [उत्तर सो जिन को एक एक बार स्वीकार करते है वे पराञ्चि है, फिर जिन को बार २ स्वीका करते है वे अर्वाञ्चि है, मनुष्य इनकी ही उपासना करें। (षडहयो हि आवृत्ति अन्वावर्तन्ते य एव वेद) वह दोनो षड अह [छह दिन वाले यज्ञो] की आवृत्ति निरन्तर करता रहे जो ऐसा जानता है, (स वै एष सवत्सर) सो यही स त्सर है ॥ १६ ॥

कण्डिका १७ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विपुवन्त महाव्रतमुपेयात् कथमनाकृत्यै भ तीति यमेवामु पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लव पुरस्ता

१६—(कति) सख्याभेदपरिज्ञानाय प्रश्न (पराञ्चि) पर+अञ्चु गति पूजनयो —क्विन्। परकालगतानि। पराचीनानि (अर्वाञ्चि) अवर+अञ्च गतिपूजनयो —क्विन्। पृषोदरादित्वात् अवरस्य 'अर्व' आदेश। पश्चात्का भवानि। अर्वाचीनानि (सकृत्) एकवारम् (आवृत्तिम्) पुन पुनरभ्यास (अन्वावर्तन्ते) अनुगत्य प्रवतन्ते ॥

विषुवत पूर्वमुपयन्ति पृष्ठ्यमुपरिष्टात् पिता वा अभिप्लव पुत्र। पृष्ठ्यस्तस्मात्पूर्वे वयसि पुत्रा पितरमुपजीवन्ति पृष्ठ्यं पश्चाद्विषुवत पूर्वमुपयन्ति अभिप्लवमुपरिष्टात् पिता वा अभिप्लव पुत्र पृष्ठ्यस्तस्मादुत्तमे वयसि पुत्रान् पितोपजीवनि य एव वेद तदप्येतदृचोक्तम्। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरस तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरित्युप ह वा एन पूर्वे वयसि पुत्रा पितरमुपजीवन्त्युतमे वयसि पुत्रान् पितोपजीवति य एवं वेद स वा एष सवत्सर ॥ १७ ॥

कण्डिका १७ ॥ संवत्सर और महाव्रत के विषय में प्रश्नोत्तर ॥

(अथ यत् चतुर्विंशम् अह उपेत्य विषुवन्तम् अनुपेत्य महाव्रतम् उपेयात् कथम् अनाकूत्यै भवति इति) फिर जब चतुर्विंश अह [चौबीस दिन वाले यज्ञ] को स्वीकार करके और विषुवान् [तुल्य दिन रात वाले काल के यज्ञ] को न स्वीकार करके महाव्रत को स्वीकार करे, कैसे वह [यजमान] अयोग्य सकल्प के लिये होता है। (यम् एव अमुम् अतिरात्र विषुवत पुरस्तात् उपयन्ति तेन इति ब्रूयात्) [उत्तर] जिस ही उस अतिरात्र [यज्ञ] को विषुवान् से पहिले स्वीकार करते हैं उस से [वह अयोग्य सकल्प के लिये होता है] ऐसा कहे। (पूर्वं अभिप्लव विषुवत पुरस्तात् उपयन्ति पृष्ठ्यम् उपरिष्टात् पिता वै अभिप्लव पुत्र पृष्ठ्य, तस्मात् पूर्वे वयसि पुत्रा पितरम् उपजीवन्ति) पहिले अभिप्लव को विषुवान् से पहिले स्वीकार करते हैं और पृष्ठ्य [यज्ञ] को पीछे, पिता ही अभिप्लव और पुत्र पृष्ठ्य है, इसलिये पहिली अवस्था में पुत्र पिता के सहारे जीते हैं, (पूर्वं पृष्ठ्य विषुवत पश्चात् उपयन्ति अभिप्लवम् उपरिष्टात् पिता वै अभिप्लव पुत्र पृष्ठ्य, तस्मात् उत्तमे वयसि पिता पुत्रान् उपजीवति य एव वेद) पहिले पृष्ठ्य को विषुवान् से पीछे स्वीकार करते है और अभिप्लव को पीछे, पिता अभिप्लव और पुत्र पृष्ठ्य है, इसलिये पिछली अवस्था मे पिता पुत्रो के सहारे जीता है जो ऐसा जानता है।

(तत् अपि एतत् ऋचा उक्तम्) यही इस ऋचा करके कहा गया है। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरस तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तो, इति—ऋग्वेद १। ८९। ९ ॥ (अन्ति) हे जीववारी

१७—(वयसि) अज गतिक्षेपणयो – असुन् वीभाव । अवस्थायाम् (उपजीवन्ति) आश्रित्य जीवन्ति (इत्) निश्चयेन (नु) शीघ्रम् एव (शरद) शरद् ऋतूपलक्षितान् (अन्ति) पदिप्रथिभ्यां नित (उ० ४। १८३) अन प्राणने – ति, नित्। सुपां सुलुक्० (पा० ७। १। ३९) जसो लुक्। हे अन्तय । जीविता (देवा) विद्वांस (न) अस्मभ्यम् (चक्र) यूय कृतवन्त वा कुरुत, लोडर्थे–लिट (जरसम्) वृद्धावस्थाम् (पितर) पितृवद्रक्षितार (न) अस्माकम् (मध्या) सप्तम्या डादेश । मध्ये (मा रीरिषत) रिष हिसायाम् णिच्। मा हिंसीष्ट (आयुगन्तो) जीवनस्य मार्गान्॥

---

१. पू स० 'उपजीवन्ति' इति पाठ ॥ सम्पा० ॥

(देवा) विद्वानो ! (यत्र) जहाँ पर (न) हमारे लिए (शतं शरद) सौ वर्ष तक (इत्) निश्चय करके (नु) ही (ननानाम्) अपने शरीरो के (जरसम्) बुढापे को (चक्र) तुम व्यतीत करो, (यत्र) जहाँ पर (पुत्रास) पुत्र लोग (पितर) पिता [वयोवृद्ध और विद्यावृद्ध पिता के समान] (भवन्ति) होवे, [वहाँ] (न) हमार (आयु) जीवन और (गन्तो [1]) गतियो को (मध्या) बीच म (मा रीरिषत) मत नष्ट करो ॥

(पूर्वे उपवयसि पुत्रा ह वै एन पितरम् उपजीवन्ति, उपोत्तमे वयसि पिता पुत्रान् उपजीवति य एव वेद) पहिली अवस्था मे पुत्र निश्चय करके इस पिता के ही सहारे जीते है और पिछली अवस्था [स यास वा बुढापे] मे पिता पुत्रो के सहारे जीता है जो ऐसा जानता है । (स वै एष सवत्सर) वही यह सवत्सर [यज्ञ] है ॥१७॥

भावार्थ —जैसे विषुवान यज्ञ अभिप्लव और पृष्ठ्य यज्ञ से मिला होता है, वैसे ही पिता और पुत्र प्रीतिपूवक परस्पर रक्षा कर ॥ १७ ॥

कण्डिका १८ ॥

अथ हैष महासुपणस्तस्य यान् पुरस्ताद्विषुवत षण्मासानुपयन्ति स दक्षिण पक्षोऽथ यानावृत्तानुपरिष्टात् षडुपयन्ति स उत्तर पक्ष आत्मा वै सवत्सरस्य विषुवानङ्गानि पक्षौ यत्र वा आत्मा तत्पक्षौ यत्र वै पक्षौ तदात्मा न वा आत्मा पक्षावतिरिच्यते[2] नो पक्षावात्मानमतिरिच्येते इत्येवमु हैव तदपरेषा स्विदितमह्ना परेषामित्यपरेषा चैव परेषा चेति ब्रूयात्स वा एष सवत्सर ॥ १८ ॥

कण्डिका १८ ॥ सवत्सर बड़ा गरुड़, विषुवान् आत्मा और दोनों अर्धसवत्सर दो पक्ष ॥

(अथ ह एष महासुपण ,) फिर यही [सवत्सर] बडा गरुड है । (विषुवत पुरस्तात् तस्य यान् षट् मासान् उपयन्ति स दक्षिण पक्ष , अथ उपरिष्टात् यान् आवृत्तान् षट् उपयन्ति स उत्तर पक्ष) विषुवान से पहिले उस [सवत्सर] के जिन छ महीनो को स्वीकार करते है वह दक्षिण पक्ष [दाहिना पख] है, फिर [विषुवान् से] पीछे जिन लौटते हुये छह [महीनो] को स्वीकार करते हैं वह उत्तर पक्ष [बायाँ पख] है । (सवत्सरस्य व आत्मा विषुवान् अङ्गानि पक्षौ) सवत्सर का ही आत्मा [देह] विषुवान और अङ्ग दोनो पख है । (यत्र वै आत्मा तत् पक्षौ, यत्र वै पक्षौ तत् आत्मा)

१८—(महासुपर्ण) महागरुड । पक्षिराज (आवृत्तान्) अभ्यस्तान् पुन पुनर्वर्त्तमानान् (आत्मा) देह । जीव (तत्) तत्र (अतिरिच्यते) अतिरिणक्ति

---

१ पू स० "गती" इति पाठ ॥ सम्पा० ॥

२ कमणि प्रयोगोऽयम्, तदनुसारेण विभक्तिविपरिणाम भवितव्य । मूलपाठोऽत्र भ्रष्ट प्रतीयते ॥ सम्पा० ॥

जहाँ पर ही आत्मा [देह] है वहाँ दोनो पक्ष हैं, जहाँ पर ही दोनो पक्ष हैं वहाँ आत्मा है। (आत्मा वै पक्षौ न अतिरिच्यते नो पक्षौ आत्मानम् अतिरिच्येते इति) आत्मा निश्चय करके दोनों पक्षो से भिन्न नहीं है और न दोनो पक्ष आत्मा से भिन्न हैं। (एवम् उ ह एव अपरेषाम् अह्ना तत् स्विदित परेषाम् इति) इसी प्रकार से ही [विषुवान् से] इधर वाले दिनो का वह पसीना [निचोड] है जो उधर वालो का है। (परेषा च अपरेषा च एव इति ब्रूयात्) और [जो विषुवान् से] उधर वाले [दिनो] का [पसीना] है, वह इधर वालो का है-ऐसा कहना चाहिये। (स वै एष सवत्सर) वही यह सवत्सर है ॥ १८ ॥

भावार्थ —सवत्सर में विषुवान् [तुल्य रात्रि दिन का काल] दो बार एक ग्रीष्म में और एक शीत म होता है और दोनो का काल परिणाम और प्रभाव तुल्य है, ऐसा ज्योतिष से जानना चाहिये ॥ १८ ॥

कण्डिका १९ ॥

तदाहुर्यद् द्वादश मासा सवत्सरोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमप रेषां स्विदितमह्नां परेषामित्यपरेषा चैव परेषा चेति ब्रूयादात्मा, वै सवत्सरस्य विषुवानङ्गानि मासा यत्र वा आत्मा तदङ्गानि यत्राङ्गानि तदात्मा, न वा आत्मा ऽङ्गान्यतिरिच्येते नोऽङ्गान्यात्मानमतिरिच्यन्त इत्येवमु हैव तदपरेषा स्विदितमह्ना परेषामित्यपरेषां चैव परेषा चेति ब्रूयात्स वा एष सवत्सर ॥ १९ ॥

कण्डिका १९ ॥ विषुवान् से सवत्सर के बारह महीने ॥

(तत् आहु यत् द्वादश मासा सवत्सर) यह कहते हैं कि बारह महीने संवत्सर है, (अथ ह एतत् अह अवाप्नुयाम यत् वैषुवतम् इति) अब ही हम वह दिन प्राप्त करें जो विषुवान् वाला [दिन] है, (अपरेषाम् अह्ना स्विदित परेषाम् इति, परेषां च अपरेषां च एव इति ब्रूयात्) [विषुवान् से] इधर वाले दिनों का वह पसीना [निचोड] है जो उधर वालो का है, और [विषुवान् से] उधर वाले [दिनो] का [पसीना] है, वह इधर वालों का है—ऐसा कहना चाहिये। (सवत्सरस्य वै आत्मा विषुवान् अङ्गानि मासा) सवत्सर का ही आत्मा [देह] विषुवान् और अङ्ग दो महीने [= बारह महीने] है। (यत्र वै आत्मा तत् अङ्गानि यत्र अङ्गानि तत् आत्मा) जहां पर ही आत्मा है वहां अङ्ग हैं, जहा अङ्ग हैं वहा आत्मा है। (आत्मा वै अङ्गानि न अतिरिच्येते नो अङ्गानि आत्मानम् अतिरिच्य ते इति) आत्मा निश्चय करके अङ्गो से भिन्न नहीं है, न अङ्ग आत्मा से भिन्न हैं। (एवम् उ ह

इत्यर्थ । भिन्नं करोति (अतिरिच्येते) अतिरिङ्क्त इत्यर्थ । भिन्नं कुरुत (स्विदितम्) ष्विन्दा घर्मस्तुतौ—क्त । स्वेद । घर्मनिस्सरणम् ॥

१९—(अवाप्नुयाम) प्राप्नुयाम (वैषुवतम्) विषुवत्—अण् । विषुवत सम्बन्धम् । अन्यत् पूर्ववत् ॥

एव अपरेषाम् अह्ना तत् स्विदित परेषाम् इति) इसी प्रकार से ही [विषुवान् से] इधर वाले दिनो का वह पसीना [निचोड] है, जो इधर वालो का है। (परेषा च अपरेषा च एव इति ब्रूयात्) और [जो विषुवान् से] उधर वाले [दिनो] का [पसीना] है, वह इधर वालो का है—ऐसा कहना चाहिये। (स वै एष सवत्सर) वही यह सवत्सर है ॥ १६ ॥

भावार्थ —विषुवान् अर्थात् मेष तुला की सक्राति पर तुल्य दिन रात्रि का समय वष मे दो बार होता है, एक ग्रीष्म मे दूसरा शीत मे और दोनो छह मासो मे ताप और शीत तुल्य होता है, इससे सवत्सर यज्ञ चाहे किसी विषुवान से आरम्भ किया जावे ॥१६॥

कण्डिका २० ॥

तदाहु कथमुभयतो ज्योतिषोऽभिप्लवा अन्यतरो ज्योतिस्पृष्ठ्य इत्युभयतो ज्योतिषो वा इमे लोका अग्निनेता आदित्येनामुत इत्येष ह वा एतेषा ज्योतिर्य एन प्रमृदीव तपति देवचक्रे ह वा एते पृष्ठच प्रतिष्ठिते पाप्मान दृहती परिप्लवेते तद्य एव विदुषा दीक्षिताना पापक कीर्त्तयेदेत एवारय तद्देवचक्रे शिर श्छन्दतो दशरात्रमुद्धि [1] पृष्ठचाभिप्लवौ चक्रे दशरात्रमुद्धि पृष्ठचाभिप्लवौ चक्रे तन्त्र कुर्वीतेति ह स्माह वास्युस्तयो स्तोत्राणि च शस्त्राणि च सञ्चारयेद्य सञ्चारयेत्तस्मादिमे पुरुषे प्राणा नाना सन्त एकोदयाच्छरीरमधिवमति यन्न सञ्चारयेत् प्रमायुको ह यजमान स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा न चाग्निष्टोमा मासि सम्पद्यन्ते न वै प्राणा प्राणैर्यज्ञस्तायत एकविंशतिरुक्थ्या एकोक्थ्य षोडश्यन्न वा उक्थ्य वीर्य्यं षोडशौव तया रूढ्वा स्वग लोकमध्यारोहन्ति ॥ २० ॥

कण्डिका २० ॥ ज्योतिष्टोम आदि यज्ञो के विषय में प्रश्नोत्तर ॥

(तत् आहु कथ ज्योतिष उभयत अभिप्लवौ, अन्यतर ज्योति पृष्ठच इति) यह कहते हैं कि किस प्रकार ज्योति [ज्योतिष्टोम] के दोनो ओर [आदि और अन्त मे] दो अभिप्लव यज्ञ है, दोनो मे कोई पृष्ठय ज्योतिष्टोम होता है। (ज्योतिष उभयत वै इमे लोका, अग्निनेता आदित्येन अमुत इति) [उत्तर] ज्योति [सूय] के दोनो ओर ही ये लोक अग्नि से चलाये गये सूर्य द्वारा उस [सूयलोक] से हैं। (एष ह वै एतेषा ज्योति' य एन प्रमृदी इव तपति) यही सूय इन [लोको] के बीच मे है जो [लोढा से] पीसने वाले के समान इस [लोक] को तपाता है। (एते ह वै देवचक्रे पृष्ठच प्रतिष्ठिते दृहती पाप्मान परिप्लवेते) यही दोनों देव [सूय और

२०—(उभयत) उभयपार्श्वे। आद्यन्तयो (ज्योतिष) ज्योतिष्टोमस्य। सूर्यस्य (अग्निनेता) बहुवचनस्यैकवचनम्। अग्निर्नेता येषा ते अग्निनेतार (अमुत) तस्मात्। सूर्यलोकात् (प्रमृदी) प्र+मृद क्षोदे—क्विप्। इयाडियाजीकाराणामुपसख्यानम् (वा० पा० ७। १। ३९) प्रथमाया ईकारादेश। प्रमर्दक। प्रपेष्टा (इव) यथा (तपति) तापयति (देवचक्रे) ज्योतिश्चक्रे

---

१. पू० स० "उद्धिम्" इति पाठ ॥ सम्पा० ॥

अग्नि] के चक्र पृष्ठ्य यज्ञ मे स्थापित किये हुये दृढ़ होकर पाप [दोष] को चलायमान कर देते है। (तत् य एवं विदुषा दीक्षिताना पापक कीर्तयेत्, एने एव देवचक्रे तत् अस्य शिर छन्दत) सो जो मनुष्य इस प्रकार विद्वान् दीक्षित लोगो के पाप [दोष] बतावे, यही दोनो देवचक्र [दोनो पृष्ठ्य और अभिप्लव] तब उस [पाप] के शिर को हटा देते है। (दशरात्रम् उद्धि पृष्ठ्याभिप्लवौ चक्रे 'दशरात्रम् उद्धि पृष्ठ्याभिप्लवौ चक्रे) दशरात्र रथनाभि है और दोनो पृष्ठ्य अभिप्लव दो पहिये हैं, दशरात्र रथनाभि है और दोनो पृष्ठ्य अभिप्लव दो पहिये हैं [अर्थात् अवश्य है]। (वास्युस्तय ह स्म आह तन्त्र कुर्वीत इति स्तोत्राणि च शस्त्राणि च सचारयेत्) दोषनाशक [ब्रह्मा] ऐसा कहता है कि वह [यजमान] उपाय करे और स्तोत्रों और शस्त्रो [स्तुतिविधायक मन्त्रों और नियम विधायक मन्त्रो] को बोले। (य सञ्चारयेत् तस्मात् पुरुषे इमे प्राणा नाना सन्त एकोदयात् शरीरम् अधिवसति) जो पुरुष [स्तोत्रो और शस्त्रो को] बोले उससे [उस] पुरुष में यह प्राण अनेक प्रकार होकर एक मे उदय करने के कारण शरीर मे टिकते हैं। (यत् न सचारयेत् यजमान प्रमायुक ह स्यात्) यदि वह [स्तोत्रो और शस्त्रो को] न बोले, यजमान मृतक ही हो जावे। (एष ह वै प्रमायुक य अन्ध वा बधिर वा न च अग्निष्टोमा मासि सम्पद्यन्ते न वै प्राणा प्राणै यज्ञ तायते) यही मृतक है जो अन्धा वा बहिरा है और न [जिस करके] अग्निष्टोम महीने मे किये जाते हैं और न प्राण प्राणों के साथ [किये जाते हैं और न दूसरा] यज्ञ फैलाया जाता है। (एकविंशति उक्थ्या) इक्कीस उक्थ्य [यज्ञ विशेष] हैं। (एकोक्थ्य षोडशी, अन्न वै उक्थ्य वीर्यं षोडश एव) एक उक्थ्य षोडशी [सोलह मन्त्र वाला] है अन्न ही उक्थ्य सम्बन्ध वाला सामर्थ्य षोडश [सोलह प्रकार] है, [वे सोलह यह हैं—चार वर्ण, चार आश्रम, श्रवण,

---

(पाप्मानम्) पापम्। दोषम् (दृंहती) बृहि वृद्धौ—शतृ। वर्धमाना। दृढा (छन्दत) छदि संवरणे—लट्। अपधारयत। नाशयत (उद्धि) उपसर्गे घो किः (पा० ३। ३। ९२) उत्+डुधाञ् धारणपोषणयो—कि, प्रधि। रथनाभि (चक्रे) रथचक्रद्वयं यथा (तन्त्रम्) उपायम्। यज्ञकार्यम् (वास्युस्तय) वसिवपियजि० (उ० ४। १२५) वस वधे—इञ्। वलिमलितनिभ्य कयन् (उ० ४। ९९) वासि+वस्त वधे—कयन्, किच्चात् सम्प्रसारणम्। वासीनां हिंसकानाम् उस्तयो हिंसक। दोषनाशक (शस्त्राणि) नियमान्। स्तोत्रविशेषान् (सञ्चारयेत्) सम्यक् चालयेत्। उच्चारयेत् (एकोदयात्) एकस्मिन् देहे उद्गमनात् (अधिवसति) निवसन्ति (प्रमायुक) लषपतपदस्था० (पा० ३। २। १५४) प्र+मीञ् हिंसायाम्—उकञ्। युक् च मृतक (षोडशी) षोडश—इनि। षोडशमन्त्रोपेत (षोडश) षोडशन्—डट् तत अर्शादिअच्। विभक्तेर्लुक। षोडशम्। षोडशावयव

---

१ यहाँ "दशरात्रम् उद्धि पृष्ठ्याभिप्लवौ चक्रे" यह दुबारा पढ़ा हुआ पाठ अपपाठ रूप ही प्रतीत होता है॥ सम्पा०॥

मनन, निदिध्यासन=तीन कर्म, अप्राप्त की इच्छा, प्राप्त की रक्षा, रक्षित का बढाना, बढे हुये का अच्छे मार्ग मे—व्यय करना, और सोलहवा मोक्ष का अनुष्ठान—जैसा दयानन्द भाष्य यजुर्वेद ९ । ३४ मे व्याख्यात है]। (तया रूढवा स्वर्गं लोकम् अध्यारोहन्ति) उस [इष्टि] के द्वारा चढकर स्वर्ग लोक मे चढते है ॥ २० ॥

भावार्थ —सूर्यमण्डल प्रकाशपिण्ड है, उसके दोनो ओर आगे पीछे प्रकाश है, इसी प्रकार यज्ञ के दोनो ओर आदि अन्त मे अभिप्लव अथवा पृष्ठय यज्ञ होता है ॥ २० ॥

कण्डिका २१ ॥

अथातोऽह्नामध्यारोह । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमध्यारोहन्ति, चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवम्, पृष्ठ्येन परं पृष्ठ्यमभिजिता ऽभिजित, स्वरसामभि परान् स्वरसामानोऽथ हैतदहरवाप्नुयामेति यद्वैषुवतमपरेषा स्विदित-मह्ना परेषामित्यपरेषा च परेषा चेति ब्रूयात्स वा एष सवत्सर ॥ २१ ॥

कण्डिका २१ ॥ सवत्सर का अतिरात्र आदिको से सबन्ध

(अथ अत अह्नाम् अध्यारोह) अब यहाँ दिनो [यज्ञ विशेषो] का चढ़ाव [कहा जाता है]। (प्रायणीयेन अतिरात्रेण उदयनीयम् अतिरात्रम् अध्यारोहन्ति) प्रायणीय अतिरात्र [यज्ञ] से उदयनीय अतिरात्र को चढते है, (चतुर्विंशेन महाव्रतम्) चतुर्विंश से महाव्रत को, (अभिप्लवेन परम् अभिप्लवम्) अभिप्लव से पिछले अभिप्लव को, (पृष्ठ्येन पर पृष्ठ्यम्) पृष्ठय से पिछले पृष्ठय को, (अभिजिता अभिजितम्) अभिजित से अभिजित् को (स्वरसामभि परान् स्वरसामान) स्वरसामो से पिछले स्वरसामो को [चढते है]। (अथ ह एतत् अह अवाप्नुयाम यत् वैषुवतम् इति) अब हम ही वह दिन प्राप्त करें जो विषुवान वाला [दिन] है, (अपरेषाम् अह्ना स्विदित परेषाम् इति, परेषा च अपरेषा च इति ब्रूयात्) [विषुवान् से] इधर वाले दिनो का पसीना [निचोड] है जो उधर वालो का है, और [विषुवान् से] उधर वाले [दिनो] का [पसीना] है, वह इधर वालो का है—ऐसा कहना चाहिये । (स वै एष सवत्सर) वही यह सवत्सर है [देखो क० १९]॥ २१ ॥

भावार्थ —दोनो विषुवानो मे से किसी ही विषुवान् से सवत्सर यज्ञ आरम्भ करना चाहिये । यह विषुवान से एक और वाले यज्ञो का वर्णन है ॥ २१ ॥

युक्तम् । चत्वारो वर्णाश्चत्वार आश्रमा, श्रवणमननिदिध्यासनानि त्रीणि कर्माणि, अलब्धस्य लिप्सा, लब्धस्य यत्नेन रक्षण, रक्षितस्य वृद्धि , वृद्धस्य सन्मार्गे व्ययीकरणम् एष चतुर्विध पुरुषार्थ , एतै पचदशभि प्राप्त षोडशो मोक्ष —यथा व्याख्यात दयानन्दभाष्ये यजुर्वेदे । ९ । ३४ । एतै षोडशभिर्युक्तम् (रूढवा) अधिरुह्य ॥

२१—(अध्यारोह) आरोहणम् (अध्यारोहन्ति) उपरिगच्छन्ति (परम्) पश्चाद्भवम् (स्वरसामान) स्वरसाम्न । यज्ञविशेषान् । अन्यद्गतम्—क० १९ ॥

कण्डिका २२ ॥

अथातोऽह्ना निवाह[1]। प्रायणीयोऽतिरात्रश्चतुर्विंशायाह्ने निवहति चतुर्विंशमहरभिप्लवाय अभिप्लव पृष्ठ्याय, पृष्ठ्योऽभिजिते, अभिजित् स्वरसामभ्य, स्वरसामानो विषुवते, विषुवान् स्वरसामभ्य, स्वरसामानो विश्वजिते, विश्वजित् पृष्ठ्याभिप्लवाभ्यां, पृष्ठयाभिप्लवौ गवायुभ्यां गवायुषी दशरात्राय, दशरात्रो महाव्रताय महाव्रतमुदयनीयायातिरात्राय, उदयनीयोऽतिरात्र स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्य य एव वेद स वा एष सवत्सर ॥ २२ ॥

कण्डिका २२ ॥ सवत्सर का अतिरात्र आदिकों से सबन्ध ॥

(अथ अत अह्ना निवाह) अब यहा दिनो [यज्ञ विशेषो] का उतार [कहा जाता है]। (प्रायणीय अतिरात्र चतुर्विंशाय अह्ने निवहति) प्रायणीय अतिरात्र चतुर्विंश दिन के लिये उतरता है, (चतुर्विंशम् अह अभिप्लवाय) चतुर्विंश दिन अभिप्लव के लिये, (अभिप्लव पृष्ठ्याय) अभिप्लव पृष्ठय के लिये (पृष्ठ्य अभिजिते) पृष्ठय अभिजित् के लिये, (अभिजित् स्वरसामभ्य) अभिजित् स्वरसामो के लिये, (स्वरसामान विषुवते) सब स्वरसाम यज्ञ विषुवान् के लिये, (विषुवान् स्वरसामभ्य) विषुवान् स्वरसामो के लिये, (स्वरसामान विश्वजिते) सब स्वरसाम विश्वजित् के लिये, (विश्वजित् पृष्ठयाभिप्लवाभ्याम्) विश्वजित् पृष्ठ्य और अभिप्लव के लिये, (पृष्ठ्याभिप्लवौ गवायुभ्याम्) दोनो पृष्ठय और अभिप्लव दोनो गवायु के लिये, (गवायुषी दशरात्राय) दोनों गवायु दशरात्र के लिये (दशरात्र महाव्रताय) दशरात्र महाव्रत के लिये, (महाव्रतम् उदयनीयाय अतिरात्राय) महाव्रत उदयनीय अतिरात्र के लिये, (उदयनीय अतिरात्र स्वर्गाय लोकाय अन्नाद्याय प्रतिष्ठित्यै य एव वेद) उदयनीय अतिरात्र [उसके] स्वर्ग लोक के लिए, भोजन योग्य अन्न के लिये और प्रतिष्ठा के लिये [उतरता है], जो ऐसा जानता है। (स वै एष सवत्सर) सो यही संवत्सर है [देखो क० १४] ॥ २२ ॥

भावार्थ—यहां विषुवान् के दूसरी ओर वाले यज्ञो का वर्णन है [देखो कण्डिका १४] ॥ २२ ॥

कण्डिका २३ ॥

आदित्याश्च ह वा आङ्गिरसश्च स्वर्गे लोकेऽस्पर्द्धन्त वयं पूर्वे स्वरेष्यामो वयं पूर्वं इति त आदित्या लघुभि सामभिश्चतुर्भिस्तोमैर्द्वाभ्या पृष्ठ्याभ्यां स्वर्गं लोकमभ्यप्लवन्त, यदभ्यप्लवन्त तस्मादभिप्लवोऽभवन्नाङ्गिरसो गुरुभि सामभि

२२—(निवाह) अधोगमनम् (निवहति) अधोगच्छति । अन्यद् गतम् ॥

---

[1] पू स 'नीवाह' इति पाठ ॥ सम्पा० ॥

सर्वै [1] स्तोमै सर्वस्पृष्ठ्यै. स्वर्गं लोकमभ्यस्पृशन्त, यदभ्यस्पृशन्त तस्मात् स्पृश्य वा एत स्पृश सन्त पृष्ठ्य इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भव प्रत्यक्षद्विष । अभिप्लवात् पृष्ठ्यो निर्मित, पृष्ठ्यादभिजित्, अभिजित स्व सामान, स्वरसामभ्यो विपुवान्, विपुवत स्वसामान, स्वरसामभ्यो विश्वजिद्वि जित पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्या गवायुषी, गवायुभ्यां दशरात्रस्ताि वा एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि तेषा शत शत रथाना न्यन्तर तद्यथाऽरण न्यारूढा अशनापिपासे ते पाप्मान दृंहती परिप्लवेते एव हैवैते प्रप्लवन्ते ये वि उपयन्त्यथ ये विद्वासमुपयन्ति तद्यथा प्रवाहात् प्रवाह स्थलात् स्थल समात् सुखात् सुखमभ्यादभयमुपसङ्क्रामन्नीत्येव हैवैते सवत्सरस्योदृच समश्नवाम इति ब्राह्मणम् ॥ २३ ॥

कण्डिका २३ ॥ अभिप्लव और पृष्ठ्य की व्युत्पत्ति और दूसरे यज्ञ ।

(आदित्या च ह वै आङ्गिरस च स्वर्गे लोके अस्पर्धन्त, वय पूर्वे ए एष्याम वय पूर्वे इति) आदित्य [अखण्ड व्रतधारी सूक्ष्मदर्शी ऋषि] और आङ्गिरस [अङ्गो के रस जानने वाले स्थूलदर्शी ऋषि लोग] स्वग लोक के विषय झगडने लगे, हम पहिले स्वग को जायेंगे, हम पहिले । (ते आदित्या लघुभि सामभि चतुर्भि स्तोमै द्वाभ्या पृष्ठ्याभ्या स्वग लोकम् अभ्यप्लवन्त) आदित्य ऋषि सू सामो के द्वारा चार स्तोमो के द्वारा और दो पृष्ठ्यो के द्वारा स्वग लोक को कूद कर पहु (यत् अभ्यप्लवन्त तस्मात् अभिप्लव अन्न च एव) जो वे कूद कर पहुँचे, इसी अभिप्लव [कूदकर पहुचने वाला यज्ञ हुआ] और वही अन्न है । (आङ्गिरस गुर्ग सामभि सर्वै स्तोमै सर्वै पृष्ठयै स्वग लोकम् अभ्यस्पृशन्त) आङ्गिरस ऋ स्थूल सामो से, सब स्तोमो से सब पृष्ठ्यो से स्वग लोक को छूकर पहुँचे । (अभ्यस्पृशन्त तस्मात् [2]स्पृश्य त वै एत स्पृशम् सन्त पृष्ठय इति आचक्षते) वे छूकर पहुँचे, इसी से स्पृश्य [छूने योग्य] हुआ, उस ही स्पृश्य [छूने योग्य] होते को यह पृष्ठ्य यज्ञ है-ऐसा कहते हैं । (परोक्षेण) परोक्ष [आख ओट प्रलय मे वर्त्तमान अ के द्वारा (परोक्षप्रिया इव हि) परोक्षप्रिय [आख ओट भविष्य के प्रेमी] लोगो समान ही (देवा) देवता [विद्वान लोग] (प्रत्यक्षद्विष) प्रत्यक्ष [वर्त्तमान अवस्थ के द्वषी [विरोधी] (भवन्ति) होते हैं [देखो—गो० पू० १ । १] । (अभिप्लव पृष्ठय निर्मित) अभिप्लव से पृष्ठ्य बनाया गया है, (पृष्ठयात् अभिजित्) पृष्

२३—(आदित्या) अदिति—ण्य । अखण्डव्रतधारिणो विद्वास अथवा आङ्+दीपी दीप्तौ—यक् । पृषोदरादिरूपम् । आदीप्यमाना । सूक्ष्म दर्शिन (आङ्गिरस) त वा एतमङ्गिरस सन्तमङ्गिरा इत्याचक्षते—गो० ।

---

१ पू स. 'सर्वै' इति पाठ ॥ सम्पा० ॥

२ सर्वत्र अर्थानुसारी सकारादि पाठोऽत्रास्माभि वर्द्धित ॥ सम्पा० ॥

से अभिजित्, (अभिजित स्वरसामान) अभिजित् से स्वरसाम, (स्वरसामभ्य विषुवान्) स्वरसामो से विषुवान् (विषुवत स्वरसामान) विषुवान् से स्वरसाम, (स्वरसामभ्य विश्वजित्) स्वरसामो से विश्वजित् (विश्वजित पृष्ठयाभिप्लवौ) विश्वजित् से पृष्ठ्य और अभिप्लव, (पृष्ठयाभिप्लवाभ्या गवायुषी) दोनो पृष्ठ्य और अभिप्लवो से दोनो गवायु, (गवायुभ्यां दशरात्र) दोनो गवायु से दशरात्र [यज्ञ बनाया गया है]। (तानि ह वै एतानि यज्ञारण्यानि यज्ञकृतन्त्राणि) वे ही यज्ञ रूप बन और यज्ञ करने वाले के तन्त्र [उपाय] हैं। (तेषां शत शतं रथानां न्यन्तरम्) उन [यज्ञो] के बीच सौ सौ रथो [पशो वा मान विशेषो] का निश्चित अन्तर हो। (तत् यथा अरण्यानि आरूढा पाप्मान दृहती ते अशनापिपासे परिप्लवेते एव ह एव एते प्रप्लवन्ते ये विद्वास उपयन्ति, अथ ये विद्वासम् उपयन्ति) सो जसे वन में चढे हुये पुरुष कष्ट को बढ़ाती हुई उन दोनो भूख प्यास को लांघ जाते हैं, ऐसे ही यह [यजमान लोग यज्ञ को] पार करते हैं जो विद्वान लोग [यज्ञ को] स्वीकार करते हैं और जो लोग विद्वान् को स्वीकार करते है। (तत् यथा प्रवाहात् प्रवाह स्थलात् स्थलं समात् सम सुखात् सुखम् अभयात् अभयम् उपसङ्क्रामन्ति इति एव ह एव एते सवत्सरस्य उदृच समश्नवामहै इति ब्राह्मणम्) सो जैसे प्रवाह [जलबहाव] से प्रवाह को, स्थल [सूखे स्थान] से स्थल को सम [एक से स्थान] से सम को, सुख से सुख को और अभय से अभय को यथावत् पाते हैं वैसे ही यह हम सवत्सर [यज्ञ] की समाप्ति वाली ऋचा को पावें यह ब्राह्मण [ब्रह्मज्ञान] है ॥ २३ ॥

भावार्थः— कोई विद्वान् सूक्ष्म से स्थूल की ओर चल कर अर्थात् कारण से कार्य का ज्ञान प्राप्त करके सुख पाते हैं और कोई स्थूल से सूक्ष्म की ओर जाकर अर्थात् कार्य से कारण को खोज कर आनन्द भोगते हैं ॥ २३ ॥

कण्डिका २४ ॥

प्रेदिहं वै कौशाम्बेय कौसुरविन्दुरुद्दालक आरुणो ब्रह्मचर्य्यमुवाच तमाचार्य्य पप्रच्छ कुमार कति ते पिता संवत्सरस्याहान्यमन्यते[1] ति कति त्वेवेति दशेति होवाच दश वा इति होवाच दशाक्षरा विराड् वैराजो यज्ञ १। कति त्वेवेति नवेति होवाच नव वा इति होवाच नव वै प्राणा प्राणे यज्ञस्तायते २। कति त्वेवेत्यष्टेति होवाचाष्टु वा इति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञ ३। कति त्वेवेति सप्तेति होवाच सप्त वा इति होवाच सप्त छन्दांसि छन्दोभिर्यज्ञस्तायते ४। कति त्वेवेति

१।७। तवधीते तद्वेद (पा० ४।२।५९) अङ्गिरस्—अण्, बहुवचनस्यैक वचन च। आङ्गिरसा। अङ्गानां रसवेत्तार। स्थूलदर्शिन (लघुभि) सूक्ष्मै (सामभि) मोक्षज्ञानै (स्पृश्यै) स्पृश सम्पर्के—क्यप्। (रथानाम्) चरणानाम् मानविशेषाणाम् (न्यन्तरम्) निश्चितव्यवधानम् (परिप्लवेते परिप्लवन्ते। सर्वत प्राप्नुवन्ति ॥

---

[1] पू० स० 'अमन्यथ' इति पाठ ॥ सम्पा० ॥

षडिति होवाच षड् वा इति होवाच षड् वा ऋतव ऋतूनामाप्त
कति त्वेवेति पञ्चेति होवाच पञ्च वा इति होवाच पञ्चपदा पङ्क्ति प
यज्ञ ६ । कति त्वेवेति चत्वारीति होवाच चत्वारि वा इति होवाच चत्व
वेदा वेदैर्यज्ञस्तायते ७ । कति त्वेवेति त्रीणीति होवाच त्रीणि वा इनि ह
त्रिषवणो वै यज्ञ सवनैर्यज्ञस्तायते । ८ । कति त्वेवेति द्वे इति होवाच द्वे व
होवाच द्विराद्वै पुरुषो द्विप्रतिष्ठ पुरुष पुरुषो वै यज्ञ ९ । कति त्वेवेत्येक
होवाचैकम् वा इति होवाचाहरहरित्येकमेव सव संवत्सरम् १० ॥ २४ ॥

इत्यथववेदस्य गोपथब्राह्मणपूर्वभागे चतुथः प्रपाठक समाप्त ।

कण्डिका २४ ॥ प्रेदि कौशाम्बेय कौसुरविन्दु और उद्दालक आरुण सवत्सर और यज्ञीय दिनों के विषय में प्रश्नोत्तर ॥

(प्रेदि ह वै कौशाम्बेय कौसुरविन्दु, उद्दालक आरुण ब्रह्म
उवाच) प्रेदि [बडा ऐश्वयवान् ऋषि] कौशाम्बेय [कौशाम्बी अर्थात् पटना
का रहने वाला], कौसुरवि दु [भूमि के ऐश्वय का जानने वाला] था, [उस
उद्दालक गो० पू० ३ । ६ आरुण, [अरुण के पुत्र] ने ब्रह्मचय का उपदेश किया ।
आचार्यं पप्रच्छ कुमार ते पिता सवत्सरस्य कति अहानि अमन्यत इति,
तु एव इति) उस [प्रेदि] से आचाय [उद्दालक] ने पूछा— हे कुमार ! तेरा
सवत्सर यज्ञ के कितने दिन मानता था, फिर कितने । (दश इति ह) [प्रेदि
दस । (उवाच दश वै इति ह) वह [उद्दालक] बोला—अरे दस ही । (द
दशाक्षरा विराट्, वैराज यज्ञ) वह [प्रेदि] बोला—दस अक्षर वाला [
[छ द] है और विराट् [अर्थात् वेद] से सिद्ध किया हुआ यज्ञ है । १ । (क
एव इति), [उद्दालक] फिर कितने । (नव इति ह) [प्रेदि] अरे नौ । (उ
नव वै इति ह) [उद्दालक] अरे नौ ही हैं । (उवाच नव वै प्राणा प्राणै
तायते) [प्रेदि] बोला—नौ ही प्राण [सात मस्तक के दो नीचे के छिद्र] हैं,
से यज्ञ फैलाया जाता है । २ । (कति तु एव इति) [उद्दालक] फिर कितने । (
इति ह) [प्रेदि] अरे आठ । (उवाच अष्ट वै इति ह) [उद्दालक] अरे आ
हैं । (उवाच अष्टाक्षरा गायत्री गायत्र यज्ञ) [प्रेदि] आठ अक्षर [के
वाली गायत्री है गायत्री से सिद्ध किया हुआ यज्ञ है । ३ । (कति तु एव इ
[उद्दालक] फिर कितने । (सप्त इति ह) [प्रेदि] अरे सात । (उवाच स

२४—(प्रेदि) इगुपधात् कित (उ० ४ । १२०) प्र + इदि परमैश्वय
इन् कित्, नलोप । परमैश्वय्यवान् । ऋषिविशेष (कौशाम्बेय) तेन नि
त्तम् (पा० ४ । २ । ६८) कुशाम्ब—अण् । कुशाम्बेन निर्वृत्ता नगरी कौशाम्
कुसुमपुरी । पाटलिपुत्रनगरी । पटना इति भाषायाम् । सोऽस्य नि
(पा० ४ । ३ । ८६) कुशाम्बी—ढञ् । कौशाम्बीनिवासी (कौसुरविन्दु)
धाव्गृधिभ्य कन् (उ० २ । २४) कु + षु प्रसवैश्वययो—क्रन् । कुसुर भू

इति ह) [उद्दालक] बोला अरे सात ही है। (उवाच सप्त छन्दांसि छन्दोभि यज्ञ तायते) [प्रेदि] बोला—सात [गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङक्ति, त्रिष्टुप् और जगती] छन्द हैं, छन्दो से यज्ञ फैलाया जाता है। ४। (कति तु एव इति) [उद्दालक] फिर कितने, (षट् इति ह) [प्रदि] अरे छह। (उवाच षट वै इति ह) [उद्दालक] अरे छह ही है। (उवाच षट वै ऋतव ऋतूनाम् आप्त्य) [प्रेदि] बोला—छह ही [वसन्त, ग्रीष्म, वर्षा, शरद, हेमन्त और शिशिर—साम० उ० ६। १३। २] ऋतु हैं, ऋतुओ के लाभ के लिये [यज्ञ है]। ५। (कति तु एव इति) [उद्दालक] फिर कितने। (पच इति ह) [प्रेदि] अरे पाच। (उवाच पच वै इति ह) [उद्दालक] अर पांच ही है। (उवाच पचपदा पङ्क्ति पाङ्क्त यज्ञ) [प्रेदि] बोला—पाच पाद वाली पङक्ति [पांच अक्षर के पांच पाद वाली पथपङ्क्ति अथवा आठ अक्षर के पाच पाद वाली पथ्यापङ्क्ति] है, पाङक्त [पङक्ति, वेदवाणी से सिद्ध किया हुआ] यज्ञ है। ६। (कति तु एव इति) [उद्दालक] फिर कितने। (चत्वारि इति ह) अरे चार। (उवाच चत्वारि वै इति ह) [उद्दालक] अरे चार ही हैं। (उवाच चत्वार वै वेदा, वेदै यज्ञ तायते) [प्रेदि] चार ही वेद [ऋग् यजु, साम और अथव] हैं, वेदो से यज्ञ फैलाया जाता है। ७। (कति तु एव इति) [उद्दालक] फिर कितने। (त्रीणि इति ह) [प्रेदि] अरे तीन। (उवाच त्रीणि वै इति ह) [उद्दालक] अरे तीन ही है। (उवाच त्रिषवण वै यज्ञ सवनै यज्ञ तायते) [प्रेदि] बोला—[प्रात सवन, माध्यन्दिन सवन और तृतीय सवन] तीन सवन वाला ही यज्ञ है, सवनो से यज्ञ फैलाया जाता है। ८। (कति तु एव इति) [उद्दालक] फिर कितने। (द्वे इति ह) [प्रेदि] अरे दो। (उवाच द्वे वै इति ह) [उद्दालक] बोला—अरे दो ही है (उवाच द्विपात् वै पुरुष द्विप्रतिष्ठ पुरुष पुरुष वै यज्ञ) [प्रेदि] बोला—दो पांव वाला पुरुष है, दो [कम और ज्ञान] से प्रतिष्ठा किया गया पुरुष है, पुरुष ही यज्ञ है। ९। (कति तु एव इति) [उद्दालक] फिर कितने। (एकम् इति ह) [प्रेदि] अरे एक [विन]। (उवाच एक वै इति ह) [उद्दालक] अरे एक ही है। (उवाच अह अह इति एकम् एव सर्व

ष्वर, तत अण् स्वार्थे। कौसुर भूम्यैश्वर्य्यम्। वि दुरिच्छु (पा० ३। २। १६९) विद ज्ञाने—उ, नुमागम। भूम्यैश्वर्यस्य ज्ञाता (उद्दालक) गो० पू० ३। ६। मुनिविशेष (आरुण) अरुण—अण्। अरुणपुत्र (कुमार) हे कुमार (वैराज) विराजा निर्वृत्त (गायत्र) गायत्र्या निर्वृत्त (पञ्च) सप्तशूभ्यां तुट् च (उ० १। १५७) पचि व्यक्तीकरणे—कनिन्। सख्याविशेष (पङक्ति) पचि व्यक्तीकरणे विस्तारे—क्तिन् वा क्तिच्। अत्र तु—पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्० (पा० ५। १। ५९) पञ्चन्—तिप्रत्यय, टिलोप। पञ्चैव पङक्ति। पदपङ्क्ति पञ्च। पिङ्गलशास्त्रे ३। ४६। पञ्चाक्षरयुक्ता पञ्चपदा पदपङ्क्ति। अथवा पथ्यापञ्चभिर्गायत्रै। पिङ्गल० ३। ४८। अष्टाक्षरयुक्ता पञ्चपदा पथ्यापङ्क्ति

सवत्सरम्) [प्रेदि] बोला—दिन दिन यह एक ही [मिलकर] पूरा सवत्सर है ॥ १० ॥ ४ ॥

भावार्थ—मनुष्य को यज्ञ के अङ्ग उपाङ्गो के समान प्रत्येक पदार्थ के उपाङ्गो को जानकर कर्तव्य पूरा करना चाहिये ॥ २४ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाड-द्विष्ठितबडोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम्* ऋक्सामाथववेदभाष्य*लब्धदक्षिणेन श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथववेदभाष्यकारेण गोपथब्राह्मणभाष्ये पूर्वभागे चतुर्थ प्रपाठक समाप्त ॥

अथ प्रपाठक प्रयागनगरे भाद्रपदमासे शुक्लद्वादश्या तिथौ १९ [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये सवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—आषाढशुक्ला १२ सवत् १९८१ वि० ता० १३ जुलाई सन् १९२४ ई०

अथ पञ्चमः प्रपाठकः ।

कण्डिका १ ॥

ओम् अभिप्लव षडह षडहानि भवन्ति ज्योतिर्गौरायुर्गौरायुर्ज्योति अभिप्लव पञ्चाह पञ्च ह्येवाहानि भवन्ति यद्ध्येव प्रथममहस्तदुत्तममह अभिप्लवश्चतुरहश्चत्वारो हि स्तोमा भवन्ति त्रिवृत् पञ्चदश सप्तदशैकविंश । ३, अभिप्लवस्त्र्यहस्त्र्यहावृत्तिर्ज्योतिर्गौरायुर्गौरायुर्ज्योति ४ अभिप्लवो द्व्य द्वे ह्येव सामनी भवतो बृहद्रथन्तर एव ५, अभिप्लव एकाह एकाहस्य स्तो स्तायते ६, चतुर्णामुक्थ्यानां द्वादशस्तोत्राण्यतिरिच्यन्ते स सप्तमोऽग्निष्टोमस्त खलु सप्ताग्निष्टोमा मासि सम्पद्यन्त इति ब्राह्मणम् ॥ १ ॥

कण्डिका १ ॥ सवत्सर से अभिप्लव का सम्बन्ध ॥

(ओम् अभिप्लव षडह षट अहानि भवन्ति ज्योतिः, गौ, आयु, ग आयु ज्योति १-) ओम्। अभिप्लव छह दिन वाला है, छह दिन यह होते हैं ज्यो गौ, आयु, गौ, आयु, ज्योति । १ । (अभिप्लव पञ्चाह पञ्च हि एव अहानि भवा यत् हि एव प्रथमम् अह तत् उत्तमम् अह २) अभिप्लव पाच दिन वाला है, क्यो पाच ही दिन होते है, जो ही पहिला दिन है वह ही पिछला दिन है [अर्थात् ज्यो ज्योति एक बार ही ज्योति है]। २ । (अभिप्लवः चतुरह चत्वार हि स्तोम

(पाङ्क्त) पङ्क्ति—अण्। पञ्चावयवोपेत (द्विप्रतिष्ठ) द्वाभ्या कर्मज्ञानाभ्या प्रतिष्ठित (सवत्सरम्) सवत्सरयज्ञ ॥

१—(बृहद्रथन्तरे) सामविभागौ । पूर्वार्धिकोत्तरार्धिकौ (अतिरिच्यन्ते अतिरिक्तानि अधिकानि भवन्ति ॥

भवन्ति त्रिवृत् पञ्चदश सप्तदश एकविंश एव ३) अभिप्लव चार दिन वाला है क्योंकि चार स्तोम होते हैं त्रिवृत, पञ्चदश, सप्तदश, और एकविंश ही । ३ । (अभिप्लव व्यह व्यहा आवृत्ति ज्योति गौ आयु गौ आयु ज्योति ४) अभिप्लव तीन दिन वाला है, तीन दिन वाली आवृत्ति [लौटा फेरी] है ज्योति, गौ आयु गौ, आयु, ज्योति [अर्थात् दो दो बार आये हुये एक एक दिन होवें]। ४ । (अभिप्लव द्व्यह द्वे हि एव सामनी भवत , बृहद्रथन्तरे एव ५) अभिप्लव दो दिन वाला है, क्योंकि दो ही साम [के विभाग] होते हैं बृहत् और रथन्तर [पूर्वाह्णिक और उत्तराह्णिक] ही । ५ । (अभिप्लव एकाह एकाहस्य स्तोमै तायते ६) अभिप्लव एक दिन वाला है, एक दिन वाले के स्तोमों से वह [यज्ञ] फैलाया जाता है । ६ । (चतुर्णाम् उक्थ्याना द्वादश स्तोत्राणि अतिरिच्यन्ते स सप्तम अग्निष्टोम ७) चार उक्थ्य यज्ञों मे बारह स्तोत्र अधिक हो जाते है, वह सातवा अग्निष्टोम है । ७ । (तथा खलु सप्त अग्निष्टोमा मासि सम्पद्यन्ते इति ब्राह्मणम् इस प्रकार ही सात अग्निष्टोम महीने मे किये जाने हैं, यह ब्राह्मण [ब्रह्मज्ञान] है ॥ १ ॥

कण्डिका २ ॥

म अन्तम् एव अपश्यत् १) उसने अग्नियो की स्थापना करके पूर्णाहुति के साथ यज्ञ किया, उसने अन्त वाला ही सुख देखा । १ । (स अग्निहोत्रेण इष्ट्वा अन्तम् एव अपश्यत् २) उसने अग्निहोत्र से यज्ञ करके अन्त वाला ही सुख देखा । २ । (स दर्शपूर्णमासाभ्याम् इष्ट्वा अन्तम् एव अपश्यत् ३) उसने दर्शा अमावस्या और पूर्णमासी के यज्ञो से यज्ञ करके अन्तवाला ही सुख देखा । ३ । (स आग्रयणेन इष्ट्वा अन्तम् एव अपश्यत् ४) उसने आग्रयण [नये अन्न के यज्ञ] से यज्ञ करके अन्त वाला ही सुख देखा । ४ । (स चातुर्मास्यै इष्ट्वा अन्तम् एव अपश्यत् ५) उसने चातुर्मास्यो [चार महीने मे पूरे होने वाले यज्ञो] से यज्ञ करके अन्तवाला ही सुख देखा । ५ । (स पशुबन्धेन इष्ट्वा अन्तम् एव अपश्यत् ६) उसने पशुबन्ध [पशुओ के प्रबन्ध वाले यज्ञ] से यज्ञ करके अन्त वाला ही सुख देखा । ६ । (स अग्निष्टोमेन इष्ट्वा अन्तम् एव अपश्यत् ७) उसने अग्निष्टोम यज्ञ से यज्ञ करके अन्त वाला ही सुख देखा । ७ । (स राजसूयेन इष्ट्वा राजा इति नाम अधत्त स अन्तम् एव अपश्यत् ८) उसने राजसूय यज्ञ करके, राजा यह नाम रखा उसने अन्त वाला ही सुख देखा । ८ । (स वाजपेयेन इष्ट्वा सम्राट् इति नाम अधत्त स अन्तम् एव अपश्यत् ९) उसने वाजपय [बलरक्षक यज्ञ] से यज्ञ करके सम्राट [राज राजेश्वर] यह नाम रक्खा, उस ने अन्तवाला ही सुख देखा । ९ । (स अश्वमेधेन इष्ट्वा स्वराट् इति नाम अधत्त स अन्तम् एव अपश्यत् १०) उसने अश्वमेध [घोडा के गुणो की विद्या वाले] यज्ञ से यज्ञ करके स्वराट [स्वतन्त्र ऐश्वर्यवान् राजा], यह नाम रक्खा उसने अन्तवाला ही सुख देखा । १० । (स पुरुषमधेन इष्ट्वा विराट् इति नाम अधत्त स अन्तम् एव अपश्यत् ११) उसने पुरुषमेध [पुरुषा पर निश्चल बुद्धि वाले] यज्ञ से यज्ञ करके विराट [विविध ऐश्वर्यवान् राजा] यह नाम रक्खा, उस ने अन्त वाला ही सुख देखा । ११ । (स सर्वमेधेन इष्ट्वा सर्वराट् इति नाम अधत्त स अन्तम् एव अपश्यत् १२) उसने सर्वमेध [सब पर निश्चल बुद्धि वाले] यज्ञ से यज्ञ करके सर्वराट् [सब प्रकार ऐश्वर्यवान् राजा] यह नाम रक्खा, उस ने अन्त वाला ही सुख देखा] । १२ । (स अहीनै दक्षिणावद्भि इष्ट्वा अन्तम् एव अपश्यत् १३) उसने अहीन [पूरी पूरी] दक्षिणा वाले यज्ञो से यज्ञ करके अन्त वाला ही सुख देखा । १३ । (स अहीनै अदक्षिणावद्भि इष्ट्वा अन्तम् एव अपश्यत् १४) उस ने अहीन [पूरी पूरी] अदक्षिणा वाले [जिस दक्षिणा से कोई अधिक दक्षिणा न हो अर्थात् बडी से बडी दक्षिणा वाले] यज्ञो से यज्ञ करके अन्त वाला ही सुख देखा । १४ । (स उभयत अतिरात्रेण सत्रेण अन्तत यजेत १५) उस ने दोनो ओर अतिरात्र

अम गतौ—तन् । ससीमं सुखम् (अधत्त) धृतवान् (सम्राट्) सम्+राजृ दीप्तौ ऐश्वर्ये च—क्विप् । सर्वभूमीश्वर (स्वराट्) स्वेनैव राजते ईष्टे । स्वयम् एव ऐश्वर्यवान् राजा (विराट्) विशेषेण राजते ईष्टे । विशेषैश्वर्यवान् क्षत्रिय (सर्वराट्) सर्वेषु राजते । सर्वैश्वर्यवान् राजा (अहीनै) गो० उ० २ । ८ । हीनतारहित । सम्पूर्ण (सत्रेण) गुधृवीपचिवचियमिसदिक्षिविभ्यस्त्र । (उ० ४ । १८७) षद्लृ गतौ उपवेशने च—त्र । यद्वा सद्+त्रङ् पालने—क । सीदन्ति उप-

और इस विनीत विशेष वृक्ष [रूप जीवात्मा] को सींचता है । २ । (नीयमानाः दक्षिणाः सोमे सुते यज्ञतन्त्रे वितते निवर्त्तन्ते, अनिवर्त्तमानाः मोघाशिषः यन्ति अनिष्टयज्ञः लोकान् न तरन्ति ३) लायी गयीं दक्षिणायें सोम निचोड़ने पर और यज्ञ विस्तार फैल चुकने पर सिद्ध होती हैं, बिना सिद्ध हुई [दक्षिणायें] निरर्थक फलों को प्राप्त होती हैं और प्रतिकूल यज्ञ लोगों को नहीं पार करते हैं । ३ । (तत् द्वादशवर्षं ब्रह्मचर्य्यं पृथक् वेदेषु स्मृतम्. एवं सर्वे एव वेदाः स्वकर्मसु व्यवस्थिताः ४) इसलिये बारह वर्ष वाला ब्रह्मचर्य अलग अलग वेदों में कहा गया है, इस प्रकार से सभी वेद अपने अपने कामों में व्यवस्थित हैं । ४ । (एषां च मन्त्राः कल्पाः च ब्राह्मणानि च समानाः सन्ति, तत् तत् सर्वं व्यवस्थानं तु पृथक् वेदेषु स्मृतम् ५) और इन [वेदों] के मन्त्र, कल्प [यज्ञविधान] और ब्राह्मण [ब्रह्मज्ञानविधान] समान [एकमोक्ष प्रयोजन वाले] हैं, वह वह सब व्यवस्था तो अलग अलग वेदों में बतायी गयी है । ५ ।

(ऋग्वेदस्य पृथिवीस्थानम् अन्तरिक्षस्थानः अध्वरः, सामवेदस्य द्यौः स्थानम्, भृग्वङ्गिरसाम् आपः स्मृतम् ६) ऋग्वेद [पदार्थों की स्तुति विद्या] का पृथिवी [भूमिविद्या] स्थान है, अन्तरिक्ष [मध्यलोक विद्या] का स्थान वाला अध्वर [हिंसारहित यजुर्वेद अर्थात् संगतिकरण विद्या] है, सामवेद [मोक्षविद्या] का द्यौ [प्रकाश विद्या] स्थान है, और भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] का जल [स्थान] कहा गया है । ६ । (ऋग्वेदस्य अग्निः देवता, यजुर्वेदः वायुर्देवता, सामवेदस्य आदित्यः, भृग्वङ्गिरसां च वैद्युतः चन्द्रमाः ७) ऋग्वेद [पदार्थों की स्तुति विद्या] का अग्नि [अग्नि विद्या] देवता है, यजुर्वेद [संगतिकरण विद्या] वायु [पवन विद्या] देवता वाला है. सामवेद [मोक्षविद्या] का सूर्य और भृगु अङ्गिराओं [परिपक्व ज्ञान वाले अथर्ववेद मन्त्रों] का विविध प्रकाश वाला चन्द्रमा [आनन्दप्रद विद्या देवता] है । ७ ।

(ऋग्वेदस्य त्रिवृत् स्तोमः [जज्ञे], पंचदशेन सह यजूंषि जज्ञिरे, सप्तदशेन सामवेदः, एकविंशः ब्रह्मसंमितः ८) ऋग्वेद [पदार्थों की स्तुति विद्या] का त्रिवृत् [तीन कर्म उपासना ज्ञान में वर्तमान] स्तोम [उत्पन्न हुआ], पंचदश [स्तोम—कण्डिका १५] के सहित यजुर्वेद मन्त्र [संगतिकरण विद्यायें] उत्पन्न हुये, सप्तदश [स्तोम—क० १५] के सहित सामवेद [मोक्ष विद्या], और एकविंश [स्तोम—क० १५] ब्रह्मवेद [अथर्ववेद] में माना गया है । ८ । (ऋग्वेदस्य अध्यात्मं वाक्, यजुषां प्राणः उच्यते, सामवेदस्य चक्षुषी, भृग्वङ्गिरसां मनः स्मृतम् ९) ऋग्वेद का अध्यात्म

विनीतम् (विष्कन्धम्) वि+स्कन्दिर् गतिशोषणयोः—घञ् । विशेषेण वृक्षरूपं जीवात्मानम् (निवर्तन्ते) सिद्ध्यन्ति (मोघाशिषः) निरर्थकफलानि (अनिवर्तमानाः) अनिष्पाद्यमानाः (तरन्ति) तारयन्ति । पारयन्ति (समानाः) एकप्रयोजनाः (द्यौः) प्रकाशः (आपः) जलानि (वैद्युतः) विविधप्रकाशयुक्तः (त्रिवृत्) त्रिषु कर्मोपासनाज्ञानेषु वर्तमान. (उष्णिक्ककुब्भ्याम्) ऋत्विग्दधृक्स्रक्० (पा० ३ । २ । ५९) उत्+ष्णिह् प्रीतौ—स्नेहने च—क्विन् । क+ष्कुन्भु रोधने

सर्वै [1] स्तोमै सर्वस्पृष्ठ्यै. स्वर्गं लोकमभ्यस्पृशन्त, यदभ्यस्पृशन्त तस्मात् स्पृश्य वा एत स्पृश सन्त पृष्ठ्य इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवा भव प्रत्यक्षद्विष । अभिप्लवात् पृष्ठ्यो निर्मित, पृष्ठ्यादभिजित्, अभिजित स्व सामान, स्वरसामभ्यो विपुवान्, विपुवत स्वसामान, स्वरसामभ्यो विश्वजिद्वि जित पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्या गवायुषी, गवायुभ्यां दशरात्रस्ताि वा एतानि यज्ञारण्यानि यज्ञकृत्तन्त्राणि तेषा शत शत रथाना न्यन्तर तद्यथाऽरण न्यारूढा अशनापिपासे ते पाप्मान दृंहती परिप्लवेते एव हैवैते प्रप्लवन्ते ये वि उपयन्त्यथ ये विद्वासमुपयन्ति तद्यथा प्रवाहात् प्रवाह स्थलात् स्थल समात् सुखात् सुखमभ्यादभयमुपसङ्क्रामन्नीत्येव हैवैते सवत्सरस्योदृच समश्नवाम इति ब्राह्मणम् ॥ २३ ॥

कण्डिका २३ ॥ अभिप्लव और पृष्ठ्य की व्युत्पत्ति और दूसरे यज्ञ ।

(आदित्या च ह वै आङ्गिरस च स्वर्गे लोके अस्पर्धन्त, वय पूर्वे ए एष्याम वय पूर्वे इति) आदित्य [अखण्ड व्रतधारी सूक्ष्मदर्शी ऋषि] और आङ्गिरस [अङ्गो के रस जानने वाले स्थूलदर्शी ऋषि लोग] स्वग लोक के विषय झगडने लगे, हम पहिले स्वग को जायेंगे, हम पहिले । (ते आदित्या लघुभि सामभि चतुर्भि स्तोमै द्वाभ्या पृष्ठ्याभ्या स्वग लोकम् अभ्यप्लवन्त) आदित्य ऋषि सू सामो के द्वारा चार स्तोमो के द्वारा और दो पृष्ठ्यो के द्वारा स्वग लोक को कूद कर पहु (यत् अभ्यप्लवन्त तस्मात् अभिप्लव अन्न च एव) जो वे कूद कर पहुँचे, इसी अभिप्लव [कूदकर पहुचने वाला यज्ञ हुआ] और वही अन्न है । (आङ्गिरस गुर्स सामभि सर्वै स्तोमै सर्वै पृष्ठचै स्वग लोकम् अभ्यस्पृशन्त) आङ्गिरस ऋ स्थूल सामो से, सब स्तोमो से सब पृष्ठ्यो से स्वग लोक को छूकर पहुँचे । (अभ्यस्पृशन्त तस्मात् [2]स्पृश्य त वै एत स्पृशम् सन्त पृष्ठच इति आचक्षते) वे छूकर पहुँचे, इसी से स्पृश्य [छूने योग्य] हुआ, उस ही स्पृश्य [छूने योग्य] होते को यह पृष्ठ्य यज्ञ है-ऐसा कहते हैं । (परोक्षेण) परोक्ष [आख ओट प्रलय मे वर्त्तमान अ के द्वारा (परोक्षप्रिया इव हि) परोक्षप्रिय [आख ओट भविष्य के प्रेमी] लोगो समान ही (देवा) देवता [विद्वान लोग] (प्रत्यक्षद्विष) प्रत्यक्ष [वर्त्तमान अवस्थ के द्वषी [विरोधी] (भवन्ति) होते हैं [देखो—गो० पू० १ । १] । (अभिप्लव पृष्ठच निर्मित) अभिप्लव से पृष्ठ्य बनाया गया है, (पृष्ठचात् अभिजित्) पृष्

२३—(आदित्या) अदिति—ण्य । अखण्डव्रतधारिणो विद्वास अथवा आङ्+दीपी दीप्तौ—यक् । पृषोदरादिरूपम् । आदीप्यमाना । सूक्ष्म दर्शिन (आङ्गिरस) त वा एतमङ्गरस सन्तमङ्गिरा इत्याचक्षते—गो० ।

---

१ पू स. 'सर्वै' इति पाठ ॥ सम्पा० ॥

२ सर्वत्र अर्थानुसारी सकारादि पाठोऽत्रास्माभि वर्द्धित ॥ सम्पा० ॥

[वेद वा परमात्मा] की वह ही गति नवीन है जो पिछले काल मे वर्तमान [थी] १४ ॥ ([1]त्रिविष्टपं त्रिदिवं तम् उत्तमं नाकम् एतया त्रय्या विद्यया एति, अतः उत्तरे महान्तः ब्रह्मलोकाः अथर्वणाम् अङ्गिरसां च सा गतिः, अथर्वणाम् अङ्गिरसां च सा गतिः, इति ब्राह्मणम् १५) इसलिये जो उत्कृष्ट और बड़े ब्रह्मलोक [ब्रह्मवादियों के स्थान] है, अथर्व अङ्गिराओ [चारों वेद जानने वालो] की ही वह गति है, अथर्व अङ्गिराओ [चारों वेद जानने वालों] की ही वह गति [पहुँच] है-- यह ब्राह्मण [ब्रह्मज्ञान] है । १५ । ॥ २५ ॥

भावार्थः—मनुष्यों को चाहिये कि वेदों द्वारा यज्ञो का विधान करके आत्मोन्नति करें ॥ २५ ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम*श्रीसयाजीरावगायकवाडाधि-ष्ठित*बड़ोदेपुरीगतश्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्ध-दक्षिणेन *श्री पण्डित क्षेमकरणदासत्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्ये पूर्वभागे पंचमः प्रपाठकः समाप्तः ॥

समाप्तमिदं गोपथब्राह्मणम् पूर्वार्धम् ॥

अयं प्रपाठकः प्रयागनगरे आश्विनमासे शुक्लदशम्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ।

मुद्रितम्—श्रावणशुक्ला ५ संवत् १९८१ वि० ता० ५ अगस्त सन् १९२४ ई० ॥

अवरार्धे पश्चात्काले भवा । अर्धः खण्डे तुल्यांशे च (त्रिविष्टपम्) विटपविष्टपविशिपोलपाः (उ० ३ । १४५) त्रि + विश प्रवेशने—कपन्, प्रत्ययस्य तुट् च । त्रीणि शारीरिकात्मिकसामाजिकसुखानि विशन्ति यत्र तम् (त्रिदिवम्) इगुपधत्वात् दिवु व्यवहारादिषु-कः । त्रयाणां धर्मार्थकामानां व्यवहारो यस्मिन् तम् (नाकम्) मोक्षसुखम् (त्रय्या) त्रि + अयच्, ङीप् । कर्मोपासनाज्ञानरूपया (एति) प्राप्नोति (अतः) अस्मात् कारणात् (उत्तरे) उत्कृष्टाः (ब्रह्मलोकाः) सत्यलोकाः । ब्रह्मवादिनः स्थानानि (च) अवधारणे ॥

---

१. पूर्व संकरण में "त्रिपिष्टपम्" यह भ्रष्ट पाठ था ॥ सम्पा० ॥

ओ३म्

अथर्ववेदस्य गोपथब्राह्मणम्

॥ उत्तरभागः ॥

—::०::—

प्रथमः प्रपाठकः ।

कण्डिका १ ॥

अथ यद् ब्रह्मसदनात्तृणं निरस्यति शोधयत्येवैनं तदथोपविशतीदमह वार्ग्वसोः सदने सीदामीत्यर्वाग्वसुर्ह वै देवानां ब्रह्मा परावसुरसुराणां तमेवै पूर्वं सादयत्यरिष्टं यज्ञन्तनुनादित्यथोपविश्य जपति बृहस्पतिर्ब्रह्मेति बृहस्पति आङ्गिरसो देवानां ब्रह्मा तस्मिन्नेवैतदनुज्ञामिच्छति प्रणीतासु प्रणीयमानासु व यच्छत्या हविष्कृत उद्वादनादेतद्वै यज्ञस्य द्वारं तदेतदशून्यं करोतीष्टे च स्विष्ट त्यानुयाजानां प्रसवादित्येतद्वै यज्ञस्य द्वितीयं द्वारं तदेवैतदशून्यं करोति परिधयः परिधीयन्ते यज्ञस्य गोपीथाय परिधीन् परिधत्ते यज्ञस्य सात्मत्व परिधीन् संमार्ष्टि पुनात्येवैनं त्रिर्मध्यमं त्रय इमे प्राणाः प्राणानेवाभिजय त्रिर्दक्षिणार्द्धं त्रयो वै लोका लोकानेवाभिजयति त्रिरुत्तरार्द्धं त्रयो वै देवलो देवलोकानेवाभिजयति त्रिरुपवाजयति त्रयो वै देवयानाः पन्थानस्तानेवाभि यति ते वै द्वादश भवन्ति द्वादश ह वै मासाः संवत्सरः संवत्सरमेव तेन प्रीणात्य संवत्सरमेवात्मा उपदधाति स्वर्गस्य लोकस्य समष्टयै ॥ १ ॥

कण्डिकाः १ ॥ यज्ञ में ब्रह्मा का आसन, प्रणीतापात्र और परिधियां ॥

(अथ यत् ब्रह्मसदनात् तृणं निरस्यति तत् एनम् एव शोधयति) अब ब्रह्मा के स्थान से तिनके को वह [यजमान] फेंकता है, वह तब इस [यज्ञगृह] को श करता है। (अथ उपविशति, इदम् अहम् अर्वाक् वसोः सदने सीदामि इ अर्वाग्वसुः ह वै देवानां ब्रह्मा, परावसुः असुराणाम्) फिर वह [ब्रह्मा] बैठता [इदम् अहम्...इति] यह मैं समीप वर्तमान यज्ञ के घर में बैठता हूँ—[वह यह ब्राह

१—(ब्रह्मसदनात्) ब्रह्मणः प्रधानयाजकस्य गृहात् (अर्वाक्) समं (वसोः) यज्ञस्य (अर्वाग्वसुः) समीपनिवासी पुरुषः (देवानाम्) विदुष

वचन बोलता है] समीपनिवासी पुरुष ही देवो [विद्वानों] का ब्रह्मा होता है और दूरनिवासी पुरुष असुरों का [ब्रह्मा होता] है । (एतत् तम् एव पूर्वं सादयति अरिष्टं यज्ञं तनुतात् इति) इससे उसको ही पहिले वह [यजमान] बिठलाता है—वह निर्विघ्न यज्ञ को विस्तृत करे । (अथ उपविश्य जपति, बृहस्पतिः ब्रह्मा इति) फिर वह बैठकर [यह ब्राह्मण वचन] जपता है—बृहस्पति [बड़ी बड़ी विद्याओं का स्वामी] ब्रह्मा है । (आङ्गिरसः बृहस्पतिः वै देवानां ब्रह्मा, तस्मिन् एव एतत् अनुज्ञाम् इच्छति) आङ्गिरस [चारो वेद जानने वाला] बृहस्पति विद्वानो का ब्रह्मा है, उस [ब्रह्मा] मे ही वह [यजमान] यह नियम चाहता है । (प्रणीतासु प्रणीयमानासु हविष्कृतः आ उद्वादनात् वाच यच्छति) प्रणीताओं [यज्ञ में जलपात्रों] के लाये जाने पर हविष्कृत [हवि की आहुति मन्त्र] के उच्चारण तक वह [ब्रह्मा] वाणी को रोकता है । (एतत् वै यज्ञस्य द्वारं तत् एतत् अशून्यं करोति) यही यज्ञ का द्वार है, सो इसको वह अशून्य [परिपूर्ण वा निर्विघ्न] करता है । (स्विष्टकृति इष्टे च अनुयाजानाम् आ प्रसवात् इति एतत् वै यज्ञस्य द्वितीयं द्वारं तत् एव एतत् अशून्यं करोति) और स्विष्टकृत् [आहुति] दिये जाने पर अनुयाजों की उत्पत्ति तक [वाणी को रोकता है], यह ही यज्ञ का दूसरा द्वार है, सो इसको वह अशून्य [निर्विघ्न] करता है । (यत् परिधयः परिधीयन्ते यज्ञस्य गोपीथाय परिधीन् परिधत्ते) जो परिधियें [घेरे] चारों ओर किये जाते हैं, यज्ञ की भूमि की रक्षा के लिये वह परिधियों को रखता है । (यज्ञस्य सात्मत्वाय परिधीन् संमार्ष्टि) और यज्ञ की चैतन्यता के लिये परिधियों को मार्जन करता है । (एनं मध्यमम् एव त्रिः पुनाति, त्रयः इमे प्राणाः, प्राणान् एव अभिजयति) इस मध्यम [परिधि] को तीन बार वह शुद्ध करता है, [प्राण, अपान, उदान,] तीन प्राण है, प्राणों को ही वह जीतता है । (दक्षिणार्धं त्रिः, त्रयः वै लोकाः लोकान् एव अभिजयति) दाहिने भाग को तीन बार [वह शुद्ध करता है], तीन ही लोक [स्थान, नाम, जन्म वा जाति, तीन धाम—निरु० ९ । २८] हैं, लोकों को ही वह जीतता है । (उत्तरार्धं त्रिः, त्रयः वै देवलोकाः, देवलोकान् एव अभिजयति) उत्तर भाग को तीन बार [वह शुद्ध करता है], तीन ही [पृथिवी,

---

(पराग्वसुः) दूरनिवासी पुरुषः (तम्) ब्रह्माणम् (अरिष्टम्) रिष हिंसायां—क्तः । अहिंसितं निर्विघ्नम् (तनुतात्) विस्तारयेत् (बृहस्पतिः) बृहतीनां विद्यानां पालकः (आङ्गिरसः) चतुर्वेदवेत्ता (अनुज्ञाम्) नियमम् (प्रणीतासु) यज्ञे जलपात्रविशेषेषु (यच्छति) नियमयति (आ) मर्यादायाम् (उद्वादनात्) उच्चारणात् (अशून्यम्) अहीनम् । परिपूर्णम् (प्रसवात्) निष्पादनात् (परिधयः) वेष्टनानि (गोपीथाय) निशीथगोपीथावगथाः । (उ० २ । ९) गो+पा रक्षणे पा पाने वा—थक् । घुमास्थागापाजहातिसां हलि (पा० ६ ॥ ४ । ६६) आकारस्य ईत्वम् । भूमिरक्षणाय । जलाशयाय (सात्मत्वाय) सजीवनत्वाय । वृद्धिकरणाय (संमार्ष्टि) सम्यक् शोधयति (मध्यमम्) मध्ये वर्तमानं खण्डम् (त्रिः) त्रिवारम् (दक्षिणार्धम्) दक्षिणभागम् (उत्तरार्धम्) उत्तरभागम् (उप)

अन्तरिक्ष, द्युलोक] देवलोक हैं, देवलोकों को ही वह जीतता है । (त्रिः उप वा जयति त्रयः वै देवयानाः पन्थानः तान् एव अभिजयति) और तीन बार समीप वा [भाग] को वह जीतता है [शुद्ध करता है], तीन [कर्म, उपासना, ज्ञान,] ही विद्वान् के चलने योग्य मार्ग हैं, उनको ही वह जीतता है । (ते वै द्वादश भवन्ति, द्वादश हू मासाः सवत्सरः) वे [सब] ही बारह हैं बारह ही महीने संवत्सर है । (तेन संवत्सरम् एव प्रीणाति, अथो आत्मा संवत्सरम् एव स्वर्गस्य लोकस्य समष्टय उपदधाति) उस [कर्म] से ही संवत्सर को संतुष्ट करता है, और आत्मा [यः जीवात्मा] संवत्सर [समय] को ही स्वर्गलोक की प्राप्ति के लिये उपकारी कर्ता है ॥ १ ।

भावार्थः—प्राण आदि चार त्रिक बारह महीने वा संवत्सर अर्थात् समय के सूचक हैं । मनुष्य समय को उपयोगी बनाकर संसार में सुख भोगें ॥

कण्डिका २ ॥

प्रजापतिर्वै रुद्रं यज्ञान्निरभजत् सोऽकामयत मेऽयमस्मा आकूतिः समृद्धिर्यो मा यज्ञान्निरमाक्षीदिति । स यज्ञमभ्यायम्याविध्यत्तदाविद्धं निरकृन्तत् तत् प्राशित्रमभवत्तदुदयकृत्तद्रुगाय पर्य्यहरंस्तत्प्रत्यैक्षत[२] । तस्य चक्षुः परापतत् तस्मादाहुरन्धो वै भग इत्यपि ह तं नेच्छेद्यमिच्छति तत् सवित्रे पर्य्यहरंस्तत् प्रत्यगृह्णात् तस्य पाणी [३]प्रचिच्छेद तस्मै हिरण्ययौ प्रत्यदधुस्तस्माद्धिरण्यपाणिरिति स्तुतस्तत्पूष्णे पर्य्यहरंस्तत् प्राश्नात्तस्य दन्ताः परोप्यन्त तस्मादाहुरदन्तकः पूषा पिष्टभाजन इति तदिध्मायाङ्गिरसाय पर्य्यहरंस्तत् प्राश्नात्तस्य शिरो व्यवर्तत् त यज्ञ एवाकल्पयत् स एष इध्मः समिधो ह पुरातनस्तद्बर्हय आङ्गिरसाय पर्य्यहरंस्तत्प्राश्नात्तस्याङ्गा पर्वाणि व्यस्रंसन्त[४] तं यज्ञ एवाकल्पयतदेतद्बर्हिः प्रस्तरो ह पुरातनस्तद्बृहस्पतय आङ्गिरसाय पर्य्यहरन् सोऽबिभेत् बृहस्पतिरित्थं वाव मार्त्तिमाकृष्यतीति स एतं मन्त्रमपश्यत् सूर्य्यस्य त्वा चक्षुषा प्रतीक्ष इत्यब्रवीन्न हि सूर्य्यस्य चक्षुः किञ्चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तं मा हिंसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामीत्यब्रवीत्सवितृप्रसूत एवैन तद्देवताभिः प्रत्यगृह्णात्तद्व्यूह्य तृणानि प्राग्दण्डं स्थण्डिले निदधाति पृथिव्यास्त्वा नाभौ सादयामीति पृथिवी वान्नानां शमयित्री तयैवैतच्छमयाञ्चकार सोऽबिभेत्प्राश्नन्तं मा हिंसिष्यतीत्यग्नेष्ट्वास्येन प्राश्ना-

---

उपार्धम् । समीपभागम् (जयति) पुनाति—इत्यर्थः (प्रीणाति) संतोषयति (आत्मा) जीवात्मा (उपदधाति) उपकरोति (समष्टयै) सम् + अशूङ् व्याप्तौ—क्तिन् । सम्यक् प्राप्तये ॥

---

१. पू. सं. 'आविध्य' इति पाठः ॥ २. पू. सं. 'प्रतीक्षेत' इति पाठः ॥
३. पू. सं. 'प्रतिच्छेद' इति पाठः ॥ ४. पू. सं. 'व्यश्रंसन्त' इति पाठः ॥
५. पू. सं. 'करिष्यसि' इति पाठः ॥ सम्पा० ॥

मीत्यब्रवीन्नह्यग्नेरास्यं किञ्चन हिनस्ति सोऽबिभेत् प्राशितं मा हिंसिष्यतीतीन्द्रस्य त्वा जठरे सादयामीत्यब्रवीन्नहीन्द्रस्य जठरं किञ्चन हिनस्ति वरुणस्योदर इति नहि वरुणस्योदरं किञ्चन हिनस्तीति ॥ २ ॥

कण्डिका २ ॥ प्रजापति का रुद्र को भागशून्य करना, प्राशित्र का वर्णन, भग सविता आदि का अङ्गभङ्ग होना और बृहस्पति वा ब्रह्मा का शान्त करना ॥

(प्रजापतिः वै रुद्रं यज्ञात् निरभजत्) प्रजापति [प्रजापालक जीवात्मा] ने रुद्र [गति वा ज्ञान देने वाले परमेश्वर] को यज्ञ [संगति दिये हुये शरीर] से भाग रहित कर दिया । (सः अकामयत मा इयम् आकूतिः समृद्धिः अस्मै, यः मा यज्ञात् निरमाक्षीत् इति) उस [रुद्र] ने इच्छा की—[मुझको] मेरा यह संकल्प और समृद्धि इस [प्रजापति] के लिये हैं, जिसने मुझे यज्ञ से क्रोध करके निकाल दिया है । (तत् सः यज्ञम् अभ्यायम्य आविध्यत् आविद्धं निरकृन्तत् तत् प्राशित्रम् अभवत्) तब उस [रुद्र] ने यज्ञ को पकड़ कर छेद कर दिया और छिदे हुये को काट डाला, वह [यज्ञ वा शरीर] प्राशित्र [खाने योग्य अन्न] हो गया । (तत् उदयकृत् भगाय तत् पर्य्यहरन्) तब उदयकृत् [उदय वा यज्ञ करने वाले प्रजापति] ने भग [सेवनीय धन वा ऐश्वर्य] को वह [प्राशित्र] लाकर दिया । (तत् प्रत्यैक्षत) उस [भग] ने उसे देखा । (तस्य चक्षुः परापतत् तस्मात् आहुः अन्धः वै भगः इति, अपि ह तं छेद्यं नेत् इच्छति) उसकी आंख गिर पड़ी इससे कहते हैं—भग अन्धा है—उसने नष्ट किये हुये और छिदे हुये को न ग्रहण किया । (तत् सवित्रे पर्य्यहरन्) वह सविता [लोक प्रेरक सूर्य] को उसने

२—(प्रजापतिः) प्रजापालकः । जीवात्मा (रुद्रम्) रु गतौ शब्दे च—क्विप् तुक् आगमः । मत्वर्थीयो रः । अथवा रा दाने—कः । रुद्रो रौतीति सतो रोरूय्यमाणो द्रवतीति वा रोदयतेर्वा । स अत्र मध्यस्थानदेवता—निरु० १० । ५ । वायुम् । प्राणगतिदातारं परमात्मानम् (यज्ञात्) संगतिकृतात् शरीरात् (निरभजत्) भागशून्यम् अकरोत् (आकूतिः) सङ्कल्पः (निरमाक्षीत्) मश रोषे—लुङ् दीर्घः । रोषेण बहिष्कृतवान् (अभ्यायम्य) परिगृह्य (आविध्यत्) आ+व्यध ताडने—लङ् । अच्छिदत् (आविद्धम्) आच्छिन्नम् (निरकृन्तत्) कृती छेदने—लङ् । सर्वथा छिन्नवान् (प्राशित्रम्) अशित्रादिभ्य इत्रोत्रौ (उ० ४ । १७३) अशूङ् व्याप्तौ—अश भोजने वा—इत्रः । भक्षणीयम् । अन्नम् । चरुम् (उदयकृत्) उत्पत्तिकर्ता । प्रजापतिः (भगाय) पुंसि संज्ञायां घः प्रायेण (पा० ३ । ३ । ११८) यद्वा । खनो घ च (पा० ३ । ३ । १२५) भज सेवायाम्—घः । भगः, धननाम—निघ० २ । १० । पदनाम—निघ० ५ । ६ । सेवनीयाय । यशसे । ऐश्वर्याय (पर्य्यहरन्) पर्य्यहरत् । पर्य्यानीतवान् (प्रत्यैक्षत) प्रति ईक्ष दर्शने लङ् । प्रत्यक्षेण ईक्षितवान् । दृष्टवान् (नेत्) निषेधे (छेद्यम्) छिन्नम् (सवित्रे) लोकप्रेरकाय सूर्य्याय (पूष्णे) भ्वादुक्षन्पूषन्० (उ० १ । १५९)

लाकर दिया । (तत् प्रत्यगृह्णात्) वह उस [सविता] ने ले लिया । (तस्य पाण प्रचिच्छेद) उसके दोनों हाथ कट पड़े । (तस्मै हिरण्ययौ प्रत्यदधुः) उसके दोन [हाथ] सोने के बने हुये उन्होंने लगा दिये । (तस्मात् हिरण्यपाणिः इति स्तुतः इसलिये—वह सोने के हाथ वाला है—ऐसा स्तुति किया जाता है । (तत् पूष पर्य्यहरन्) उसे पूषा [वृद्धि वा पुष्टि करने वाली पृथिवी] को उसने लाकर दिया । (तं प्राश्नात्) वह उसने खाया । (तस्य दन्ताः परोप्यन्त) उसके दांत गिर पड़े (तस्मात् आहुः अदन्तकः पूषा पिष्टभाजनः इति) इसलिये लोग कहते हैं—विन दांत वाला पूषा पिष्ट [पिसे हुये पिट्ठी आदि अन्न] के योग्य है । (तत् अङ्गिरसाय इध्माय पर्य्यहरन्) उसे आङ्गिरस [विद्वानों के हितकारक] इध्म [अग्नि प्रदीप्त करने वाले इन्धन] को उसने लाकर दिया । (तत् प्राश्नात्) उसे उसने खा लिया । (तस्य शिरो व्यपतत्) उसका सिर गिर पड़ा । (तं यज्ञे एव अकल्पयत्) उस [प्राशित्र] को यज्ञ में ही उसने समर्थ किया [पहुँचाया] । (सः एषः इध्मः पुरातनः ह समिधः) वही यह इध्म पहिले का समिध [काष्ठ] है । (तत् आङ्गिरसाय बर्हिये पर्य्यहरन्) उसे आङ्गिरस [विद्वानों के हितकारक] बर्हि [आकाश वा जल] को उसने लाकर दिया । (तत् प्राश्नात्) वह उसने खा लिया । (तस्य अङ्गाः पर्वाणि व्यस्रंसन्त) उसके अङ्ग और जोड़ खिसक पड़े । (तं यज्ञे एव अकल्पयत्) उस [प्राशित्र] को यज्ञ में ही समर्थ किया [पहुंचाया] । (तत् एतत् बर्हिः पुरातनः ह प्रस्तरः) वह ही यह बर्हि पुरातन प्रस्तर [फैला हुआ पदार्थ वा पत्थर] है । (तत् आङ्गिरसाय बृहस्पतये पर्य्यहरन्) उसे आङ्गिरस [चारों वेद जानने वाले] बृहस्पति [बड़ी विद्याओं के स्वामी] को उसने लाकर दिया । (सः बृहस्पतिः अबिभेत्, इत्थं वाव मा आर्तिम् आकृष्यति इति) वह बृहस्पति डरा—इस प्रकार से ही वह मुझे पीड़ा करेगा । (सः एतं मन्त्रम् अपश्यत् अब्रवीत्, सूर्यस्य चक्षुषा त्वा प्रतीक्षे इति)

पूप वृद्धौ अथवा पुष पुष्टौ—कनिन् । पूषा पृथिवीनाम—निघ० १ । १ । पदनाम—निघ० ५ । ६ पृथिव्यै (परोप्यन्त) परा+डुवप छेदने बीजसन्ताने च—कर्मणि लङ् । छिन्ना अभवन् (दन्ताः) हसिमृग्रिण्वामिदमि० (उ० ३ । ८६) दमु उपशमे दमने च—तन् । दशनाः (पिष्टभाजनः) पिष्ट+भाज पृथक्-करणे—ल्युट् । पिष्टस्य चूर्णितस्य पिष्टकस्य योग्यः (इध्माय) इषि युधीन्धिदसि० (उ० १ । १४५) ञिइन्धी दीप्तौ—मक् । इध्मः पदनाम—निघ० ५ । ६ । इध्मः समिन्धनात्—निरु० ८ । ४ । अग्निसन्दीपनाय काष्ठाय (आङ्गिरसाय) अङ्गिरसे वेदज्ञात्रे हिताय (बर्हिये) सर्वधातुभ्य इन् (उ० ४ । ११८) बृहि वृद्धौ—इन् नलोपः । बर्हिः, अन्तरिक्षम्—निघ०—१ । ३ । उदकम्—निघ० १ । १२ । बर्हिः परि-बर्हणात्—निरु० ८ । ८ । आकाशाय । जलाय (व्यस्रंसन्त) स्रंसु अधःपतने—लङ् । अधोऽपतन् (प्रस्तरः) विस्तृतः पाषाणः (बृहस्पतये) बृहतोनां विद्यानां पालकाय । ब्रह्मणे (आङ्गिरसाय) चतुर्वेदवेत्रे (आर्तिम्) पीडाम् (आकृष्यति) समन्तात् करिष्यति (सूर्यस्य) सर्वप्रेरकस्य परमेश्वरस्य दत्तेन (चक्षुषा) दर्शनसामर्थ्येन

उसने इस मन्त्र को देखा [विचारा] और कहा—(सूर्यस्य ....प्रतीक्षे) सूर्य [सर्वप्रेरक परमात्मा] के [दिये] चक्षु [दर्शन सामर्थ्य] से तुझको देखता हूं [यह ब्राह्मण वचन है] । (सूर्यस्य चक्षुः किञ्चन नहि हिनस्ति) सूर्य [परमात्मा] के दर्शन सामर्थ्य को कोई भी नहीं नष्ट करता है । (सः अबिभेत्, प्रतिगृह्णन्तं मा हिंसिष्यति इति) वह डरा—ग्रहण करते हुये मुझको यह नष्ट कर देगा । (त्वा देवस्य सवितुः प्रसवे अश्विनोः बाहुभ्यां पूष्णः हस्ताभ्यां प्रशिषा प्रसूतः प्रतिगृह्णामि इति अब्रवीत्) तुझको प्रकाशमान सविता [सर्वोत्पादक परमेश्वर] के बड़े ऐश्वर्य के बीच, दोनों अश्वियों [सब विद्याओं में व्याप्त माता पिता] के दोनों भुजाओं से और पूषा [पोषक आचार्य] के दोनों हाथों और शिक्षा से प्रेरणा किया हुआ मैं ग्रहण करता हूं—यह [यह मन्त्र कुछ भेद से अथर्व० १९ । ५१ । २ । और यजु० २ । ११ का है ।] वह बोला । (सवितृप्रसूतः एव एनं तत् देवताभिः प्रत्यगृह्णात्) सविता [परमात्मा] से प्रेरणा किये हुये उसने ही इस [प्राशित्र] को देवताओं के सहित ग्रहण किया । (तत् प्राक् तृणानि व्यूह्य स्थण्डिले दण्डं निदधाति, त्वा पृथिव्याः नाभौ सादयामि इति) तब पहिले तृणों को ठीक करके चौरस स्थान पर दण्डे को वह गाड़ता है—तुझको पृथिवी की नाभि में मैं स्थापित करता हू [यजुर्वेद १ । ११ का भाग है] । (पृथिवी वा अन्नानां शमयित्री, तया एव एतत् शमयांचकार) और पृथिवी [सब का विस्तार करने वाला परमात्मा] ही अन्नों का शमन करने वाला है, उसके ही द्वारा इसको उसने शान्त किया । (सः अबिभेत् प्राश्नन्तं मा हिंसिष्यति इति) वह डरा—मुझ खाते हुये को यह मार डालेगा । (त्वा अग्नेः आस्येन प्राशनामि इति अब्रवीत्) तुझको अग्नि [सर्व प्रकाशक परमेश्वर] के [दिये हुये] मुख से मैं खाता हूं—[यह मन्त्र यजु० २ । ११ का अन्तिम पाद] वह बोला । (अग्नेः आस्यं किंचन नहि हिनस्ति) अग्नि [परमात्मा] के [दिये हुये] मुख को कोई नहीं नष्ट करता है । (सः अबिभेत् प्राशितं मा हिंसिष्यति इति) वह डरा—खाया हुआ [प्राशित्र] मुझे मार डालेगा । (त्वा इन्द्रस्य जठरे सादयामि इति अब्रवीत्) तुझको इन्द्र के [परम ऐश्वर्यवान् परमेश्वर के दिये हुये] जठर [कोख] में रखता हूं—यह [ब्राह्मण वचन] वह बोला ।

(प्रतीक्षे) प्रत्यक्षं पश्यामि (हिनस्ति) नाशयति (देवस्य) प्रकाशमानस्य (सवितु) सर्वोत्पादकस्य । परमेश्वरस्य (प्रसवे) प्रकृष्टैश्वर्य्ये (अश्विनोः) सकलविद्याव्याप्त-योर्मातापित्रोः (बाहुभ्याम्, भुजयो. सकाशात् (पूष्णः) पोषकस्य । आचार्य्यस्य (हस्ताभ्याम्) करयोः सकाशात् (प्रसूतः) प्रेरितः (प्रशिषा) शासु अनुशिष्टौ-क्विप् । प्रकृष्टशासनेन (प्रतिगृह्णामि) स्वीकरोमि (व्यूह्य) विविधं समूह्य (प्राक्) प्रथमम् (स्थण्डिले) मिथिलादयश्च (उ० १ । ५७) ष्ठल स्थाने—इलच्, नुक्, लस्य डः । यथार्थं समीकृते प्रदेशे (पृथिव्याः) भूमेः (नाभौ) नहो भश्च (उ० ४ । १२६) णह बन्धने—इञ्, हस्य भः । मध्यस्थाने (सादयामि) स्थापयामि (पृथिवी) प्रथेः षिवन्षवन्ष्वनः सम्प्रसारणं च (उ० १ । १५०) प्रथ प्रख्याते विस्तारे च—षिवन् । ङीष् । सर्वविस्तारकः परमेश्वरः (अग्नेः) भौतिकस्य पाचकस्य

(इन्द्रस्य जठरं किञ्चन नहि हिनस्ति) इन्द्र [परमात्मा] के [दिये] जठर को कोई नहीं नष्ट करता है । (वरुणस्य उदरे इति) वरुण [सबसे श्रेष्ठ परमात्मा] के [दिये हुये] उदर में [तुझे मैं रखता हूँ—यह ब्राह्मण वचन उसने कहा] । (वरुणस्य उदरं किंचन नहि हिनस्ति इति) वरुण [परमात्मा] के [दिये] उदर को कोई नहीं नष्ट करता है ॥ २ ॥

भावार्थः—यहाँ प्रजापति प्रजारूप शरीर के अवयवों का पालने वाला जीवात्मा है, रुद्र सर्वज्ञ सर्वकर्ता परमात्मा और यज्ञ परमाणुओं के संयोग से बना हुआ शरीर है ॥ प्रजापति के रुद्र को यज्ञ से अलग करने पर भग, सविता, पूषा, इध्म और बर्हि, यह पाँचों तत्त्व अपना अपना कर्म करने में असमर्थ होते हैं । ज्ञानी पुरुष ही परमात्मा की सत्ता को सब के भीतर काम करता हुआ देखता है ॥ २ ॥

विशेषः १—इस कण्डिका में उस पौराणिक कथा का मूल सा भान होता हैं जिसमें दक्ष वा प्रजापति ने शिव वा रुद्र को भाग न दिया था । शिव की स्त्री सती उस यज्ञ में भस्म हो गयी, शिव के गणों ने यज्ञ को और दक्ष को विध्वंस कर दिया, उपस्थित देवता घायल हुये । फिर शिव का क्रोध विष्णु के बीच में पड़ने से शान्त हुआ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित दिये जाते हैं—

१—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आरभे—अथ० १९ । ५१ । २, भेद से यजु० २ । ११ तथा २० । ३ ॥ [हे शूर !] (देवस्य) प्रकाशमान, (सवितुः) सर्वोत्पादक [परमेश्वर] के (प्रसवे) बड़े ऐश्वर्य के बीच, (अश्विनोः) सब विद्याओं में व्याप्त दोनों [माता पिता] के (बाहुभ्याम्) दोनों भुजाओं से और (पूष्णः) पोषक [आचार्य] के (हस्ताभ्याम्) दोनों हाथों से (प्रसूतः) प्रेरणा किया हुआ मैं (त्वा) तुझको (आरभे) ग्रहण करता हूं ।

२- देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि—यजु० २ । ११ ॥ [हे अन्न !] (देवस्य) हर्ष देने वाले (सवितुः) और सबके उत्पन्न करने वाले परमेश्वर के [उत्पन्न किये हुये] (प्रसवे) संसार में विद्यमान (त्वा) तुझ [भक्ष्य पदार्थ] को (अश्विनोः) प्राण और अपान के (बाहुभ्याम्) आकर्षण और धारण गुणों से तथा (पूष्णः) पुष्टिकारक समान वायु के (हस्ताभ्याम्) शोधन और शरीर के अङ्ग अङ्ग में पहुँचाने के गुण से (प्रतिगृह्णामि) अच्छे प्रकार ग्रहण करता हूं, (अग्नेः) प्रज्वलित अग्नि के बीच में पकाकर (त्वा) तुझ [भक्ष्य पदार्थ] को (आस्येन) अपने मुख से (प्र अश्नामि) भोजन करता हूं ॥

पावकस्य परमेश्वरस्य (आस्येन) असु क्षेपणे—ण्यत् । मुखेन (प्राशितम्) प्रकर्षेण भक्षितम् (इन्द्रस्य) ईश्वरस्य दत्ते—इति शेषः (जठरे) कुक्षौ (वरुणस्य) वरणीयस्य । सर्वोत्कृष्टस्य (उदरे) उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च (उ० ५ । ९९) उत्+दृ विदारणे—अल् अच् वा, उत् इत्यस्य तलोपः । नाभिस्तनयोर्मध्यभागे ॥

कण्डिका ३ ॥

अथो आहुर्ब्राह्मणस्योदर इत्यात्माऽस्यात्मनाऽऽत्मानं मे मा हिंसीः स्वाहेत्यन्न वै सर्वेषां भूतानामात्मा तेनैवैतच्छमयाञ्चकार प्राशित्रमनुमन्त्रयते । योऽग्निर्नृमणा नाम ब्राह्मणेषु प्रविष्टः तस्मिन् म एतत् सुहुतमस्तु प्राशित्रं तन्मा मा हिंसीत् परमे व्योमन्निति तत्सर्वेण ब्रह्मणा प्राश्नात्तत एनं माहिनत्तस्माद्यो ब्रह्मिष्ठः स्यात्तं ब्रह्माणं कुर्वीत बृहस्पतिर्वै सर्व ब्रह्म सर्वेण ह वा एतद् ब्रह्मणा यज्ञं दक्षिणत उद्यच्छतेऽप एव वा एतस्मात् प्राणाः क्रामन्ति य आविद्धं प्राश्नात्यद्भिर्मार्जयित्वा प्राणान् संस्पृशते वाङ् म आस्यं नित्यमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुपाह्वयते तदु हैक आहुरिन्द्राय पर्यहरन्निति ते देवा अब्रुवन्निन्द्रो वै देवानामोजिष्ठो बलिष्ठस्तस्मा एतत्परिहरन्तीति तत्तस्मै पर्यहरंस्तत्सद् ब्रह्मणा शमयाञ्चकार तस्मादाहुरिन्द्रो ब्रह्मेति यवमात्रं भवति यवमात्रं वै विषस्य न हिनस्ति यदधस्तादभिधारयति तस्मादधस्तात् प्रक्षरणं प्रजा अरुर्न हिनस्ति यदुपरिष्टादभिधारयति तस्मादुपरिष्टात् प्रक्षरणं प्रजा अरुर्न हिनस्ति यदुभयतोऽभिधारयत्युभयतोऽभिधारि प्रजा अरुर्घातुकं स्याद्यत्सम[1]याभिहरेदनभिविद्धं यज्ञस्याभिविध्येत् ॥ ३ ॥

कण्डिका ३ ॥ प्राशित्र [अन्न] का विधान ॥

(अथो आहुः, ब्राह्मणस्य उदरे + त्वासादयामि--क० २ इति । आत्मा असि आत्मना मे आत्मानं मा हिंसीः स्वाहा इति) फिर वे [ऋषि] कहते हैं --ब्राह्मण [ब्रह्मज्ञानी] के पेट मे [तुझ प्राशित्र को रखता हूं—क० २, यह मन्त्र], हे प्राशित्र ! तू आत्मा [अन्न] है, तू आत्मा [अन्न के कुप्रयोग] से मेरे आत्मा [जीवात्मा] को मत सता, यह स्वाहा [सुन्दर वचन] है [और यह दो मन्त्र वे बोलते हैं] । (अन्न वै सर्वेषां भूतानाम् आत्मा, तेन एव एतत् प्राशित्रं शमयांचकार अनुमन्त्रयते) अन्न ही सब प्राणियों का आत्मा [जीवन] है, उससे ही इस प्राशित्र [अन्न] को वह शान्त करता है और मन्त्र के अनुकूल करता है । (यः नृमणाः नाम अग्निः ब्राह्मणेषु प्रविष्टः, तस्मिन् मे एतत् प्राशित्रं सुहुतम् अस्तु, तत् मा परमे व्योमन् मा हिंसीत् इति) जो नृमणा [मनुष्यो के हित के लिये ज्ञान वाला] नाम अग्नि [जठराग्नि] ब्रह्मज्ञानियों में प्रविष्टे है, उस [अग्नि मे मेरा यह प्राशित्र [अन्न] अच्छे प्रकार होम किया गया होवे, वह [अन्न] मुझको उत्तम विविध रक्षा स्थान मे [रख कर] न मारे [वह इस ब्राह्मण वचन को पढता है] । (तत् सर्वेण ब्रह्मणा प्राश्नात् ततः एनं मा अहिनत्) उसको

३--(अनुमन्त्रयते) मन्त्रेण अनुकूलं करोति (नृमणाः) नयतेर्डिच्च (उ० २ । १००) णीञ् प्रापणे--ऋः, डित् । गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च (उ० ४ । २२७) नृ + मनु अवबोधने--असिः । छन्दस्यृदवग्रहात् (पा० ८ । ४ । २६) इति णत्वम् । नृभ्यो मनुष्याणां हिताय बोधनं यस्य सः (परमे) उत्तमे (व्योमन्) नामन्सीमन्व्योमन्० (उ० ४ । १५१) वि + अव रक्षणे--मनिन् सप्तमी-

१. पू. सं. 'शमया' इति पाठः ॥ सम्पा० ॥

सम्पूर्ण ब्रह्मज्ञान से खावे, इसलिये इसको वह न मारे । (तस्मात् यः ब्रह्मिष्ठः स्यात् न ब्रह्माणं कुर्वीत) इसलिये जो अत्यन्त ब्रह्मज्ञान वाला हो, उसको ब्रह्मा बनावे । (बृहस्पतिः वै सर्वं ब्रह्म) बृहस्पति [बड़ी विद्याओं का स्वामी] ही सम्पूर्ण ब्रह्म [ब्रह्मा] है । (एतत् सर्वेण ह वै ब्रह्मणा यज्ञं दक्षिणतः उद्यच्छते) इसलिये वह सम्पूर्ण ब्रह्मज्ञान के साथ यज्ञ को दक्षिण दिशा में बैठकर ऊंचा करता है । (एतस्मात् अपः एव वै प्राणाः क्रामन्ति) इसलिये जल को ही प्राण प्राप्त करते हैं । (यः आविद्धं प्राशनाति अद्भिः प्राणान् मार्जयित्वा संस्पृशते, मे नित्यं वाक् आस्यम् ऋतम्) जो पुरुष अच्छे छेदन किये हुये [प्राशित्र अन्न] को खाता है, वह जल से प्राणों को शुद्ध करके [इन्द्रिय] स्पर्श करता है—मेरे लिये नित्य वाणी, मुख और सत्य होवे । [यह वाक्य पढ़ता है । (प्राणाः वै अमृतम्, आपः प्राणान् एव यथास्थानम् उपाह्वयते) प्राण ही अमृत [जल] है, जल प्राणों [जीवन साधनों] को ही अपने अपने स्थान पर बुलाता है । (तत् उ ह एके आहुः, इन्द्राय पर्यहरन् इति) सो कोई कोई कहते हैं—इन्द्र [जीवात्मा] को वे [इन्द्रिय अन्न] लाकर देते हैं । (ते देवाः अब्रुवन् इन्द्रः वै देवानाम् ओजिष्ठः बलिष्ठः तस्मै एतत् परिहरन्ति इति तत् तस्मै पर्यहरन्) उन देवों [इन्द्रियों] ने कहा—इन्द्र [जीवात्मा] ही देवों [इन्द्रियों] में अति ओजस्वी [पराक्रमी] और अति बलवान् है, उसके लिये यह [अन्न] वे लाते हैं—इसलिये उसे उसके लिये वे लाये हैं । (तत् सत् ब्रह्मणा शमयांचकार) उस होते हुये को ब्रह्मज्ञान से उस [इन्द्र] ने शान्त किया । (तस्मात् आहुः इन्द्रः ब्रह्मा इति) इसलिये वह कहते हैं—इन्द्र [जीवात्मा] ब्रह्मा है । (यवमात्रं भवति यवमात्रं वै विषस्य न हिनस्ति) वह [इन्द्र] जौ के आकार वाला [परमाणु रूप] है, जौ के आकार वाला जल का नाश नहीं करता है । (यत् अधस्तात् अभिधारयति तस्मात् प्रक्षरणम् अधस्तात् प्रजाः अरुः न हिनस्ति) जो वह नीचे की ओर सींचता है, इसलिये बहाव नीचे की ओर प्रजाओं [इन्द्रियों] को मर्म में न नष्ट करता है । (यत् उपरिष्टात् अभिधारयति तस्मात् प्रक्षरणम् उपरिष्टात् प्रजाः अरुः न हिनस्ति) जो वह ऊपर की ओर सींचता है, इसलिये बहाव [रुधिर रूप जल] ऊपर की ओर प्रजाओं [इन्द्रियों] को मर्म में नहीं नष्ट करता है । (यत् उभयतः अभिधारयति उभयतः अभिधारि प्रजाः अरुर्घातुकं स्यात्) जो वह दोनों ओर से [आमने सामने

लुक् । व्योमन् व्यवने—निरु० ११ । ४० । विविधरक्षास्थाने (ब्राह्मणा) ब्रह्मज्ञानेन (ब्रह्मिष्ठः) अतिशयेन ब्रह्मज्ञानवान् (दक्षिणत) दक्षिणस्यां दिशि स्थितः (उद्यच्छते) उत् + यम नियमने । उन्नयते (क्रामन्ति) गच्छन्ति । प्राप्नुवन्ति (मार्जयित्वा) शोधयित्वा (अमृतम्) उदकम्—निघ० १ । १२ । (आपः) जलम् (इन्द्राय) परमैश्वर्यवते । जीवात्मने (देवाः) इन्द्रियाणि (ओजिष्ठः) अतिशयेन ओजस्वी पराक्रमी (यवमात्रम्) अणुपरिमाणम् (विषस्य) उदकम्—निघ० १ । १२ । (अभिधारयति) धृ क्षरणदीप्त्यो :—सर्वतः सिञ्चति प्रवहति (प्रक्षरणम्) प्रवहणम् (अरुः) अर्त्तिपृवपियजि० (उ० २ । ११७) ऋ गतौ हिंसने च—उसिः । अरुषि । मर्मणि (अभिधारि) सर्वतः सेचकं जलम्

जल वा रुधिर को] सींचे, दोनों ओर से सींचने वाला [जल टकराकर] प्रजाओं [इन्द्रियों] को मर्मघाती होता है । (यत् समया अभिहरेत् अनभिविद्ध यज्ञस्य अभिविध्येत्) जो [उस जल को] पास से वह ले चले, बिना छिदा हुआ [बिना चूर्ण किया हुआ अन्न] यज्ञ [शरीर] का सर्वथा छेदन कर देवे ॥ ३ ॥

भावार्थः—अन्न और जल सुप्रयोग से शरीरबल और आत्मबल बढ़ाते हैं, वे ही कुप्रयोग से उन्हें नष्ट कर देते हैं ॥ ३ ॥

कण्डिका ४ ॥

अग्रेण परिहरति तीर्थेनैव परिहरति वि वा एतद्यज्ञश्छिद्यते यत् प्राशित्रं परिहरति, यदाह ब्रह्मन् प्रस्थास्यामीति बृहस्पतिर्वै सर्वं ब्रह्म सर्वेण ह वा एतद् ब्रह्मणा यज्ञं दक्षिणतः सन्दधात्यथोऽत्र वा एतर्हि यज्ञः श्रितो यत्र ब्रह्मा तत्रैव यज्ञः श्रितस्तत एवैनमालभते यद्धस्तेन प्रमीयेद् वेपनःस्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्-स्याद्यत्तूष्णीमासीदासम्प्रत्तो यज्ञः स्यात् प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्र ब्रह्मा तत्रैव यज्ञः श्रितस्तत एवैनं सम्प्रयच्छत्याग्नीध्र आदधात्यग्निमुखानेवर्तून् प्रीणात्यथोत्तरासामाहुतीनां प्रतिष्ठित्याऽथो समिद्ध्यैव जुहोति परिधीन्त्सम्मार्ष्टि पुनात्येवैनां सकृत् सकृत् सम्मार्ष्टि पराङ्देव ह्येतर्हि यज्ञश्रुतुः सम्पद्यतेऽथो चतु-ष्पादः पशव पशूनामाप्त्यै देव सवितरेतत्ते प्राहेत्याह प्रसूत्यै बृहस्पतिः ब्रह्मेत्याह म हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि स मामाहि स मां पाहि स मां कर्मण्यं पाहीत्याह यजाय च यजमानाय च पशूनामाप्त्यै ॥ ४ ॥

कण्डिका ४ ॥ यज्ञ के विघ्नों का नाश और यज्ञ के आरम्भ का विधान ॥

(अग्रेण परिहरति, तीर्थेन एव परिहरति एतत् यज्ञः वि वै छिद्यते) [जो कोई यज्ञ की] पूर्व भाग से निन्दा करता है, [अथवा] तीर्थ [शास्त्र विधान] से ही निन्दा करता है । इससे यज्ञ अवश्य ही छिन्न हो जाता है । (यत् प्राशित्रं परिहरति यत् आह ब्रह्मन् प्रस्थास्यामि इति) जो वह प्राशित्र [चरु, हव्य द्रव्य] को बुरा कहता है, [अथवा] जो कहता है—हे ब्रह्मन् ! मैं चला जाऊंगा । (बृहस्पतिः वै सर्वं ब्रह्म एतत् ह वै सर्वेण ब्रह्मणा यज्ञं दक्षिणतः सन्दधाति) बृहस्पति [सब विद्याओं का स्वामी] ही सब प्रकार ब्रह्म [ब्रह्मा] है, इसी से ही वह सम्पूर्ण ब्रह्मज्ञान से यज्ञ को

(अरुर्धातुकम्) मर्मनाशकम् (समया) सम् + इण् गतौ—अच्, टाप्, समीपे । (अनभिविद्धम्) अविच्छिन्नम् । प्राशित्रम् (अभिविध्येत्) अभिच्छेदनं कुर्यात् ॥

४—(अग्रेण) पूर्वभागेन (परिहरति) यज्ञं निन्दति (तीर्थेन) तरण-साधनेन । शास्त्रेण । यज्ञस्थानेन (एतत्) एतस्मात् (प्रस्थास्यामि) गमि-ष्यामि (ब्रह्मणा) ब्रह्मज्ञानेन (दक्षिणतः) दक्षिणस्यां दिशि स्थितः (संदधाति)

दक्षिण ओर बैठा हुआ सुधारता है । (अथो अत्र वै एतर्हि यज्ञः श्रितः, यत्र वै ब्रह्मा तत्र एव यज्ञः श्रितः ततः एव एनम् आलभते) फिर यहां ही अब यज्ञ ठहरा हुआ है, जहां ब्रह्मा है वहां ही यज्ञ ठहरा हुआ है, इसलिये ही इस [ब्रह्मा] को वह [यजमान] ग्रहण करता है । (यत् हस्तेन प्रमीयेत् वेपनः स्यात्, यत् शीर्ष्णा शीर्षक्तिमान् स्यात् यत् तूष्णीम् आसीद असम्प्रत्तः यज्ञः स्यात् प्रतिष्ठ इति एव ब्रूयात्) जो कोई हाथ से [यज्ञ] नष्ट करे, वह कांपने वाला होवे, जो सीस [शिर की टक्कर] से [यज्ञ नष्ट करे], वह शिर की पीड़ा वाला होवे, और जो चुपचाप बैठे, यज्ञ अरक्षित होवे, [इसलिये] चला जा—ऐसा ही वह [ब्रह्मा] कहे । (वाचि वै यज्ञः श्रितः, यत्र ब्रह्मा तत्र एव यज्ञः श्रितः ततः एव एनं सम्प्रयच्छति) वाणी में ही यज्ञ ठहरा हुआ है, जहां ब्रह्मा है वहां ही यज्ञ ठहरा हुआ है, इसलिये ही इस [यज्ञ] को वह [ब्रह्मा] यथावत् चलाता है । (आग्नीध्रे अग्निमुखान् आदधाति) आग्नीध्र [होतृगृह वा हवनकुण्ड] में अग्नि प्रधान मन्त्रों से वह अग्न्याधान करता है [जैसे यह चार मन्त्र—ओं भूर्भुवः स्वर्द्यौरिवभूम्ना पृथिवीव वरिम्णा । तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्याया दधे । १ । यजु० ३ । ४ ॥ ओम् उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च । अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत । २ । यजु० १५ । ५४ ॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् । ३ । ऋ० १ । १ । १ । स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये । ४ । ऋ० १ । १ । ९ । हवनमन्त्राः] । (ऋतून् एव प्रीणाति) वह ऋतुओं को ही प्रसन्न बनाता है [जल वायु शुद्ध करता है] । (अथ उत्तरासाम् आहुतीनाम् प्रतिष्ठित्या) और पीछे वाली आहुतियों की स्थापना से [भी ऋतुओं को शुद्ध करता है] । (अथो समिद्वत्या एव जुहोति) फिर समिध् शब्द वाली ऋचा से ही वह हवन करता है [जैसे यह चार मन्त्र—ओम् । समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन स्वाहा । इदमग्नये इदं न मम । १ । यजु० ३ । १ । ओ । सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे स्वाहा—इदमग्नये जातवेदसे—इदं न मम । २ । यजु० ३ । २ ॥ ओं । तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य, स्वाहा । इदमग्नयेऽङ्गिरसे—इदं न मम । ३ । यजु० ३ । ३ । ओम् । अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय,

---

सम्यग् धरति (एतर्हि) इदानीम् (आलभते) गृह्णाति (प्रमीयेत्) मीञ् हिंसायाम् । नाशयेत् (वेपनः) कम्पकः (शीर्ष्णा) शिरःप्रहारेण (शीर्षक्तिमान्) शीर्ष+अञ्चु गतिपूजनयोः—क्तिन्, मतुप् । शीर्षं शिरः अञ्चति गच्छति व्याप्नोतीति शीर्षक्तिः शिरःपीडा. तया युक्तः (आसीद) आ—असीदत् । आसीदेत् (असम्प्रत्तः) नञ्+सम्+प्र+डुदाञ् दाने—क्तः । दत्तो रक्षितः तत्प्रतिषेधः । असंरक्षितः (प्रतिष्ठ) गच्छ (सम्प्रयच्छति) संयोजयति (आग्नीध्रे) होतृगृहे (आदधाति) अग्न्याधानं करोति (अग्निमुखान्) अग्निप्रधानान् मन्त्रान् (प्रीणाति) प्रसादयति (ऋतून्) वसन्तादीन् (प्रतिष्ठित्या) स्थापनया (समिद्वत्या)

स्वाहा । इदमग्नये जातवेदसे—इदं न मम । ४ । हवनमन्त्राः] । (परिधीन् सम्मार्ष्टि पुनाति एव) वह परिधियों को स्वच्छ करता है और शोधता भी है । (एनान् सकृत् सकृत् सम्मार्ष्टि) वह इन [परिधियों] को एक एक बार स्वच्छ करता है [जैसे यह चार मन्त्र—ओम् । अदितेऽनुमन्यस्व ॥ १ ॥ ओम् । अनुमतेऽनुमन्यस्व ॥ २ ॥ ओम् । सरस्वत्यनुमन्यस्व ॥ ३ ॥ ओम् । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ४ ॥ यजु० ११ । ७ तथा ३० । १ । हवनमन्त्राः] । (पराङ् एव हि एतर्हि यज्ञः चतुः सम्पद्यते) उत्कर्ष को पाया हुआ ही अब यज्ञ चार बार बढता है । (अथो चतुष्पादः पशवः, पशूनाम् आप्त्यै देव सवितः एतत् ते प्राह इति) फिर चार पाँव वाले पशु हैं, पशुओं के लाभ के लिये—देव सवितः—यह [ऊपर लिखा मन्त्र] तुझ [ब्रह्मा] से वह [यजमान] बोलता है । (आह प्रसूत्यै बृहस्पतिः ब्रह्मा इति) वह कहता है—प्रेरणा [यज्ञ की बढ़ती] के लिये बृहस्पति ब्रह्मा है [बड़ी विद्याओं का स्वामी प्रधान ऋत्विज है । देव सवितः—इस मन्त्र मे प्रसुव पद और प्रसूत्यै पद षू प्रेरणे धातु से बने हैं] । (आह सः हि ब्रह्मिष्ठः, सः यज्ञं पाहि, सः यज्ञपतिं पाहि, सः सामं पाहि, सः मां पाहि, सः मां कर्मण्यं पाहि इति यज्ञस्य, यजमानाय च, पशूनाम् आप्त्यै च आह) वह [यजमान] कहता है—वह तू ही अतिशय ब्रह्मज्ञानी है, वह तू यज्ञ की रक्षा कर, वह तू यज्ञपति की रक्षा कर, वह तू मेरी रक्षा कर, वह तू मेरी रक्षा कर, वह तू मुझ कर्मकुशल की रक्षा कर,—वह यह यज्ञ के हित के लिये और यजमान के हित के लिये और पशुओं की प्राप्ति के लिये कहता है ॥ ४ ॥

भावार्थः—मनुष्यों को यज्ञ विधान पूर्वक करना चाहिये ॥ ४ ॥

कण्डिका ५ ॥

न वै पौर्णमास्यां नामावास्यायां दक्षिणा दीयन्ते य एष ओदनः पच्यते दक्षिणैषा दीयते यज्ञस्यर्ध्या इष्टी वा एतेन यद्यजतेऽथो वा एतेन पूर्त्यै य एष ओदनः पच्यत एष ह वा इष्टापूर्त्यै य एनं पचति ॥ ५ ॥

कण्डिका ५ ॥ पौर्णमासी और अमावस को दक्षिणा के स्थान में ओदन का दान ॥

(न वै पूर्णमास्यां न अमावास्यां दक्षिणाः दीयन्ते) न तो पौर्णमासी [इष्टि] में और न अमावस्या [इष्टि] में दक्षिणायें दी जाती है । (यः एषः ओदनः पच्यते, एषा दक्षिणा दीयते) जो यह ओदन [चावल] पकाया जाता है यह ही

समिध इति शब्देन युक्तया ऋचा (पराङ्) परा उत्कर्षे + अञ्चु गतिपूजनयोः—क्विन् । उत्कर्षं प्राप्तः (चतुः) चतुर्वारम् (चतुष्पादः) चतुष्पादयुक्ताः (आप्त्यै) प्राप्तये (प्रसूत्यै) प्रेरणायै । उन्नतये (कर्मण्यम्) कर्मकुशलम् ॥

५—(ऋध्यै) वृद्धये (इष्टी) इयाडियाजीकाराणामुपसंख्यानम् (वा० पा० ७ । १ । ३९) इति विभक्तेः ईकारः । इष्टम् । अग्निहोत्रवेदाध्ययनातिथ्यादि-

दक्षिणा दिया जाता है। (यत् यज्ञस्य ऋध्यै इष्टी वै एतेन अथो वै एतेन पूर्त्ती यजते) क्योंकि वह यज्ञ की बढ़ती के लिये इष्ट [अग्निहोत्र, वेदाध्ययन, आतिथ्य आदि कर्म] को ही इस [ओदन दान] से, और भी इससे पूर्त्त [बावड़ी, कूआ, तालाब देवमन्दिर, अन्नदान आदि कर्म] को प्राप्त होता है। (यः एषः ओदनः पच्यते, एषः ह वै इष्टा,र्त्ती यः एनं पचति) यह जो ओदन [भात] पकाया जाता है, यह ही इष्ट और पूर्त्त [अग्निहोत्र वेदाध्ययन आदि और बावड़ी देवमन्दिर आदि कर्म का साधन उस यजमान के लिये] है जो इसको पकाता है ॥ ५ ॥

भावार्थः—पौर्णमासी और अमावस्या को दक्षिणा के स्थान में ओदन देने का यहां विशेष नियम विचारणीय है ॥ ५ ॥

कण्डिका ६ ॥

द्वया वै देवा यजमानस्य गृहमागच्छन्ति सोमपा अन्येऽसोमपा अन्ये हुतादोऽन्ये अहुतादोऽन्य एते वै देवा अहुतादो यद् ब्राह्मणा एतद्देवत्य ऋषयः पुरानीजान एते ह वा एतस्य प्रजायाः पशूनामीशते तेऽस्याप्रीता इषमूर्जमादाया-पक्रामन्ति यदन्वाहार्य्यमन्वाहरति तानेव तेन प्रीणाति दक्षिणतः सद्भ्यः परि-हर्त्तवा आह दक्षिणावृतेनैव यज्ञेन यजत आहुतिभिरेव देवान् हुतादः प्रीणाति दक्षिणाभिर्मनुष्यदेवांस्तेऽस्मै प्रीता इषमूर्जं नियच्छन्ति ॥ ६ ॥

कण्डिका ६ ॥ यज्ञ में दो प्रकार के देवता आते हैं एक सोम या दूसरे असोमपा, अथवा एक हुताद और दूसरे अहुताद, उनका वर्णन ॥

(द्वयाः वै देवाः यजमानस्य गृहम् आगच्छन्ति अन्ये सोमपाः, अन्ये असोमपाः, अन्ये हुतादः अन्ये अहुतादः) दो प्रकार के ही देवं यजमान के घर आते हैं, एक सोमपा [सोमरस पीने वाले] दूसरे असोपमा [सोमरस न पीने वाले], [अथवा] एक हुताद [अग्नि में चढ़े हुये पदार्थ खाने वाले जल वायु सूर्य] और दूसरे अहुताद [अग्नि में न चढ़े हुये पदार्थ अर्थात् शेष हव्य खाने वाले मनुष्य आदि]। (एते वै देवाः अहुतादः यत् ब्राह्मणाः) यह ही देव अहुताद [बचे हुये हव्य खाने वाले] हैं जो ब्राह्मण हैं। (एतद्देवत्यः ऋषयः पुरा अनीजानः) इस [सोम] को देवता जानने

कम् (यजते) संगच्छते (पूर्त्ती) पूर्ववत् ईकारः। पूर्तम्। वापीकूपतडागादि-देवतायतन अन्नप्रदानादिकम् (इष्टापूर्ती) पूर्ववत् ईकारः। इष्टं च पूर्तं च इष्टा-पूर्ते। अर्थः पूर्ववत्॥

६—(द्वयाः) दि—अयट्। द्विप्रकाराः। उभयाः (सोमपाः) सोमपान-शीलाः (हुतादः) हुत + अद भक्षणे—क्विप्। हुतस्य अग्नौ हुत्वा अग्नौ प्रक्षिप्तस्य हव्यस्य भक्षयितारः (अहुतादः) अहुतस्य अग्नौ अप्रक्षिप्तस्य शेषहव्यस्य भक्ष-यितारः (यत्) ये (एतद्देवत्यः) एतद्देवताकाः (ऋषयः) सन्मार्गदर्शकाः (पुरा) पूर्वम् (अनीजानः) अन् + जयतेः—कानच्, एकवचनं बहुवचनस्य।

वाले ऋषियो ने पहिले यज्ञ नही किया (?) । (एते ह वै एतस्य प्रजायाः पशूनाम् ईशते) यह ही [ब्रह्मज्ञानी] इस [यजमान] के सन्तान और पशुओ के स्वामी हैं। (ते अप्रीताः अस्य इषम् ऊर्जम् आदाय अपक्रामन्ति) वे अप्रसन्न होकर इसके अन्न और बल को लेकर चल देते है। (यत् अन्वाहार्य्यम् अन्वाहरति तान् एव तेन प्रीणाति) जब वह अन्वाहार्य्य [अमावस मे बताये गये पितरों के मासिक श्राद्ध] को वह अनुकूल होकर खिलाता है, उनको ही उससे वह [यजमान] प्रसन्न करता है। (दक्षिणतः सद्भ्यः परिहर्तवै आह) दक्षिण ओर वर्त्तमान [अमुरो] को [अन्वाहार्य्य] छोड देने के लिये वह कहता है ? (दक्षिणावृतेन एव यज्ञेन यजते) दक्षिणा से संयुक्त ही यज्ञ से [उन ब्रह्मज्ञानियो को] वह पूजता है। (आहुतिभिः एव हुतादः देवान् प्रीणाति, दक्षिणाभिः मनुष्यदेवान्) आहुतियो [अग्नि मे चढ़ाये हुये पदार्थों] से ही हुताद [अग्नि मे चढ़े हुये पदार्थ खाने वाले] देवो [जल, वायु, सूर्य] को प्रसन्न करता है और दक्षिणाओ से मनुष्य देवों [ब्रह्मज्ञानियों] को [प्रसन्न करता है]। (ते प्रीताः अस्मै इषम् ऊर्जं नियच्छन्ति) वे [दोनों प्रकार के देव] प्रसन्न होकर इस [यजमान] को अन्न और बल देते रहते है[1] ॥ ६ ॥

भावार्थः—यज्ञ द्वारा जल, वायु और अग्नि शुद्ध होने से शुद्ध अन्न उत्पन्न होता है और ऋत्विज् लोग दक्षिणा पाते है। उस सबसे यजमान का अन्न और बल बढ़ता है ॥ ६ ॥

कण्डिका ७ ॥

देवाश्च ह वा असुराश्चास्पर्द्धन्त, ते देवाः प्रजापतिमेवाभ्ययजन्तान्योऽन्यस्यासन्नसुरा अजुहवुस्ते देवा एतमोदनमपश्यंस्तं प्रजापतये भागमनुनिरवपंस्तं भागं पश्यन् प्रजापतिर्देवानुपावर्त्तत ततो देवा अभवन् परासुराः स य एवं विद्वानेतमोदनं पचति भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति प्रजापतिर्वै देवेभ्यो भागधेयानि व्यकल्पयत् सोऽ[2]मन्यत आत्मानमन्तरगादिति स एतमोदनमभक्तमपश्यत्तमात्मने भागन्निरवपत् प्रजापतेर्वा एष भागोऽपरिमितः स्यादपरिमितो हि प्रजापतिः प्रजापतेर्भागोसि यूर्जस्वान् वयस्वानक्षितोऽस्यक्षित्यै त्वा मामेक्षेष्ठाः। अमुत्रामुष्मिल्लोक इड् च प्राणापानौ मे पाहि समानव्यानौ मे

यज्ञम् अकृतवन्तः (अप्रीताः) अप्रसन्नाः (इषम्) अन्नम्—निघ० २ । ७ (ऊर्जम्) बलम् (आदाय) गृहीत्वा (अपक्रामन्ति) अपगच्छन्ति (अन्वाहार्य्यम्) अनु व्याप्तौ+आ समन्तात्+हृञ् हरणे—ण्यत्। अमावास्याविहितं पितृणां मासिकश्राद्धम्। यागदक्षिणाम् (अन्वाहरति) अनुकूलतया आहारयति भोजनं कारयति यजमानः (दक्षिणतः) दक्षिणस्यां दिशि (सद्भ्यः) श्रेष्ठेभ्यः। वर्तमानेभ्यः (परिहर्तवै) तुमर्थे सेसेनसेअसेन्० (पा० ३ । ४ । ९) परि+हृञ् हरणे—तवैप्रत्ययः। परिहर्तुम् (दक्षिणावृतेन) दक्षिणया वेष्टितेन संयुक्तेन (मनुष्यदेवान्) मनुष्येषु देवान् विदुषः पुरुषान् (नियच्छन्ति) नितरां ददति ॥

---

१. कण्डिका का व्याख्यान अस्पष्ट है। पाठक भूमिका मे अर्थ देखे ॥

२. पू. सं. "सोममन्यत" इति पाठः ॥ सम्पा० ॥

पाह्युदानरूपे मे पाह्यूर्गस्यूर्ज मे धेहि कुर्वतो मे मा क्षेष्ठाः । ददतो मे मोपदस प्रजापतिमहन्त्वया समृक्षमृध्यासमिति प्रजापतिमेव समृक्षमृध्नोति य एवं वेद एव वेद ॥ ७ ॥

कण्डिका ७ ॥ देवासुर संग्राम में प्रजापति द्वारा ओदन के विभाग से देवों की जीत ॥

(देवा च असुराः च ह वै अस्पर्धन्त) देव [इन्द्रियां] और असुर [विघ्न] लड़ने लगे । (ते देवाः प्रजापतिम् एव अभ्ययजन्त) उन देवताओं ने प्रजापति [जीवात्मा वा पेट] को ही सब ओर से पूजा । (असुराः अन्योऽन्यस्य आसन् अजुहवुः) असुरों ने एक दूसरे के मुख में हवन किया । (ते देवाः एतम् ओदनम् अपश्यन् तं भागं प्रजापतये अनुनिरवपन्) उन देवों ने इस ओदन [सींचने वाले अन्न] को देखा और वह भाग प्रजापति को दे दिया । (तं भागं पश्यन् प्रजापतिः देवान् उपावर्तत) उस भाग को देखता हुआ प्रजापति देवताओं के पास वर्तमान हुआ । (ततः देवाः असुराः परा अभवन्) उससे देवताओं ने असुर हरा दिये । (यः एवं विद्वान् एतम् ओदनं पचति सः आत्मना भवति, अस्य अप्रियः भ्रातृव्यः परा भवति) जो ऐसा विद्वान् इस ओदन [सींचने वाले अन्न] को पचाता है वह आत्मबल के साथ होता है, उसका अप्रिय शत्रु हार जाता है । (प्रजापतिः वै देवेभ्यः भागधेयानि व्यकल्पयत्, सोऽमन्यत, आत्मानम् अन्तः अगात् इति) प्रजापति ने ही देवताओं को भाग अलग अलग कर दिये, उसने माना और आत्मबल को भीतर पाया । (सः एतम् ओदनम् अभक्तम् अपश्यत् तं भागम् आत्मने निरवपत्) उसने इस ओदन को बिना बँटा हुआ [सम्पूर्ण] देखा, उस भाग को अपने लिये रख दिया । (प्रजापतेः वै एषः भागः अपरिमितः स्यात् अपरिमितः हि प्रजापतिः) प्रजापति का ही यह भाग परिमाण रहित होवे, क्योंकि प्रजापति परिमाण रहित है । (प्रजापतेः ऊर्जस्वान् वयस्वान् भागः असि, अक्षितः असि, मे अक्षित्यै त्वा मा क्षेष्ठाः) [हे ओदन !] तू प्रजापति का बलवान् अन्नवान् भाग है, तू अक्षित [अनिष्ट] है, तू मेरे अनाश [सम्पूर्णता] के लिये अपने को मत नष्ट कर । (अमुत्र अमुष्मिन् लोके इह च मे प्राणापानौ पाहि, मे समानव्यानौ पाहि, मे उदानरूपे पाहि, ऊर्क् असि, मे ऊर्जं धेहि, मे कुर्वतः मा क्षेष्ठाः) वहाँ उस लोक में और

७—(देवाः) इन्द्रियाणि (असुराः) देवविरोधिनः । विघ्नाः (प्रजापतिम्) जीवात्मानम् (आसन्) आस्ने । मुखे (ओदनम्) सेचकम् अन्नम् (अनुनिरवपन्) निर्धारितवन्तः । दत्तवन्तः (उपावर्तत) उपेत्य वर्तमानोऽभवत् (परा-अभवन्) पराजितवन्तः (असुराः) असुरान् (आत्मना) आत्मबलेन (पराभवति) पराजितो वर्तते (भ्रातृव्यः) शत्रुः (व्यकल्पयत्) पृथक् कृतवान् (सः) सः (अमन्यत) अमृतम् (आत्मानम्) आत्मबलम् (अन्तः) मध्ये (अगात्) प्राप्तवान् (अभक्तम्) अकृतभागम् (अपरिमितः) परिमाणरहितः (ऊर्जस्वान्) बलवान् (वयस्वान्) अन्नवान्—निघ० २ । ७ (अक्षितः) अहिंसितः (अक्षित्यै) अनाशाय (त्वा) आत्मानम् (मे) मम । मह्यम् (मा क्षेष्ठाः) क्षि

यहाँ [दूर और समीप, अथवा उस जन्म और इस जन्म में] मेरे प्राण और अपान [भीतर और बाहर जाने वाले श्वास] की रक्षा कर, मेरे समान और व्यान [नाभि में घूमने वाले और शरीर में फैलने वाले वायु] की रक्षा कर, मेरे उदान [कण्ठस्थ वायु] और रूप की रक्षा कर, तू बल है मेरे लिये बल दे, मुझ कर्म करने वाले का मत नाश कर। (मे ददतः मा उपदसः, अहं त्वया समृक्षं प्रजापतिम् ऋध्यासम् इति) [हे ओदन !] मुझ दान करते हुये का मत नाश कर, मैं तेरे साथ यथावत् देखने वाले प्रजापति को बढ़ाऊं। (समृक्षं प्रजापतिम् एव ऋध्नोति यः एवं वेद, यः एवं वेद) वह यथावत् देखने वाले प्रजापति को ही बढ़ाता है, जो ऐसा जानता है, जो ऐसा जानता है ॥ ७ ॥

भावार्थः—जैसे उदर अन्न खाकर सब इन्द्रियों को रस पहुँचाकर पुष्ट और सुखी करता है, वैसे ही प्रधान पुरुष कर लेकर प्रजा के हित में लगाकर उन्हें पुष्ट और सुखी करे ॥ ७ ॥

कण्डिका ८ ॥

ये वा इह यज्ञैराभूवंस्तेषामेतानि ज्योतींषि यान्यमूनि नक्षत्राणि तन्नक्षत्राणां नक्षत्रत्वं यन्न क्षियन्ति दर्शपौर्णमासौ वै यज्ञस्यावसानदर्शौ ये वा अनिष्ट्वा दर्शपूर्णमासाभ्यां सोमेन यजन्ते तेषामेतानि ज्योतींषि यान्यमूनि नक्षत्राणि पतन्तीव तद्यथा ह वा इदमस्यष्टावसानेनेहावसास्यसि नेहावसास्यसीति नोऽनुद्यन्त एवं हैवैतेऽमुष्मान् लोकान् नो नुद्यन्ते त एते प्रच्यवन्ते ॥ ८ ॥

कण्डिका ८ ॥ दर्शपौर्णमास यज्ञ के साथ ही सोम यज्ञ करने और यज्ञ करने वालों की उच्च दशा का वर्णन ॥

(ये वै इह यज्ञैः आभूवन् तेषाम् एतानि ज्योतींषि यानि अमूनि नक्षत्राणि) जो लोग ही यहाँ यज्ञों के साथ सब ओर वर्तमान हुये हैं, उनके यह ज्योति हैं जो वे नक्षत्र [चलने वाले वा अनश्वर तारागण] हैं [अर्थात् तारागणों के समान उनके कार्य प्रकाशमान हैं]। (तत् नक्षत्राणां नक्षत्रत्वं यत् न क्षियन्ति) वह नक्षत्रों का नक्षत्रपन है कि वे नष्ट नही होते हैं। (दर्शपौर्णमासौ वै यज्ञस्य अवसानदर्शौ) अमावस्या और पूर्णमासी के यज्ञ ही यज्ञ की सीमा दिखाने वाले है [अर्थात् अमावस्या और पूर्णमासी से यज्ञ आरम्भ होकर अमावस्या और पूर्णमासी को पूरे होते हैं]। (ये वै दर्शपूर्णमासाभ्याम् अनिष्ट्वा

हिंसायाम्—लुङ्। आत्मनेपदम्। मा हिंसीः (ऊर्क्) बलम् (ऊर्जम्) बलम् (मा क्षेष्ठाः) नाशं मा कुरु (मा उपदसः) दसु उपक्षये उत्क्षेपे च—लुङ्। नाशं मा कुरु (समृक्षम्) स्नुग्रश्चिकृत्यृषिभ्यः कित् (उ० ३ । ६६) ऋषी गतौ दर्शने च—सप्रत्ययः कित्। संगन्तारम्। सन्दर्शकम् (ऋध्यासम्) सम्यग्वर्ध्यासम् (ऋध्नोति) वर्धयति ॥

८ (आभूवन्) आ—अभूवन् (नक्षत्राणि) अमिनक्षियजि० (उ० ३ । १०५) णक्ष गतौ—अत्रन्। गतिशीलाः। अनश्वराः वा तारागणः (क्षियन्ति) नश्यन्ति

सोमेन यजन्ते तेषाम् एतानि ज्योतींषि पतन्ति इव यानि अमूनि नक्षत्राणि) लोग ही अमावस्या और पूर्णमासी के साथ यज्ञ न करके सोम के साथ यज्ञ क[illegible] हैं, उन यह तेज गिरते से हैं जो वे नक्षत्र हैं। (तत् यथा आह वै इदम् असि, अष्टावसाने इह अवसास्यसि, न इह अवसास्यसि इति) सो जैसा यह कहता है—यही तू सत्र वाला है, तू आठ [यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि इन आठ योगाङ्गों—योग दर्शन २ । २९] से समाप्त होने वाले विधान के साथ या [यज्ञ को] तू समाप्त करेगा, तू यहाँ नहीं समाप्त होगा। (एते ह एव एवम् अमुष्मा लोकान् नो अनुद्यन्ते, नो अनुद्यन्ते ते एते प्रच्यवन्ते) यह ही लोग इस प्रकार उन लोक को नहीं नष्ट करते हैं, नहीं नष्ट करते हैं, वे ही यह लोग आगे को चलते हैं ॥ ८ ॥

भावार्थः—जैसे दर्शपूर्णमासी से यज्ञ प्रारम्भ होकर दर्शपूर्णमासी पर समाप्त होने से सिद्ध होते हैं, वैसे ही दूसरे कार्य नियत समय पर आरम्भ होने और समाप्त होने से सिद्ध होने और यश देते हैं ॥ ८ ॥

कण्डिका ९ ॥

यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्तांस्त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रेऽष्टाकपालान्निर्वपेत् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधति चरु ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय श्रृते चरुम्पशवो वा एतेऽतिरिच्यन्ते तानेवाप्नोति तानवरुन्धेऽग्निर्वै मध्यमस्य दाता इन्द्रो वै ज्येष्ठस्य प्रदाता यदेवेदं क्षुद्रं पशूनां तद्विष्णोः शिपिविष्टं तदेवाप्नोति पशूनेवावरुन्धे ॥ ९ ॥

कण्डिका ९ ॥ चन्द्रमा के उदय होने के पीछे हवि देने का विधान ॥

(यस्य हविः निरुप्त पुरस्तात् चन्द्रमाः अभ्युदियात्) जिस [यजमान] का हवि दिया गया होवे, [उससे] पहिले चन्द्रमा उदय होवे। (तान् तण्डुलान् त्रेधा विभजेत्) उन चावलों [चरु] को तीन प्रकार बाँटे। (ये मध्यमाः तान् अष्टाकपालान् दात्रे अग्नये निर्वपेत्) जो बीच वाले [चावल] हैं, उन आठ पात्रों में रक्खे हुओं को दान करने वाले अग्नि के लिये देवे। (ये स्थविष्ठाः तान् चरु प्रदात्रे इन्द्राय

(अवसानदर्शी) समाप्तिदर्शकौ (असि) वर्तमानोऽसि (अष्टावसानेन) यमनियमाद्यष्टयोगाङ्गैः अवसान समाप्तिर्यस्य तेन यज्ञेन (अवसास्यसि) षो अन्तकर्मणि—लट्। यज्ञं समाप्स्यसि (अवसास्यसि) समाप्तो भविष्यसि (नो) निषेधे (अनुद्यन्ते) दो अवखण्डने—लट्, आत्मनेपदत्वम्। अनुदयन्ति। विनाशयन्ति (अमुष्मान्) अमून् (प्रच्यवन्ते) प्रकर्षेण गच्छन्ति—निघ० २ । १४ ॥

९ (निरुप्तम्) प्रदत्तम् (अभ्युदियात्) सर्वत उद्गच्छेत् (विभजेत्) विभक्तान् कुर्यात् (अष्टाकपालान्) अष्टसु कपालेषु पात्रेषु संस्कृतान् (निर्वपेत्) विभागेन प्रदद्यात् (स्थविष्ठाः) स्थूल—इष्ठन्। अतिशयस्थूलाः (दधति) लेटि

७—आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः । प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति—ऋ० ७ । ८४ । १ ॥ (राजानौ) हे राजाओ (इन्द्रावरुणा) इन्द्र और वरुण ! [बड़े ऐश्वर्य वाले राजा और स्वीकार करने योग्य मन्त्री] (वाम्) तुम दोनों को (अध्वरे) हिंसारहित यज्ञ में (हव्येभिः) देने और लेने योग्य पदार्थों और (नमोभिः) सत्कारों से (आ ववृत्याम्) मैं लौटाऊँ । (बाह्वोः) [हमारी] दोनों भुजाओं में (दधाना) रक्खी हुई (घृताची) घृत पहुँचाने वाली [चमची] (त्मना) अपने आप (विषुरूपा) नानाविध स्वभाव वाले (वाम्) तुम दोनों को (परि) सब ओर से (प्र जिगाति) पहुँच जाती है ।

८—इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् । इदं वामन्धः परिषिक्तमासद्यास्मिन् बर्हिषि मादयेथाम्—अथर्व० ७ । ५८ । २, ऋ० ६ । ६८ । ११ ॥ (वृषणा) हे बलिष्ठ ! (इन्द्रावरुणा) बिजुली और वायु [के समान राजा और प्रजाजनो] तुम (मधुमत्तमस्य) अत्यन्त ज्ञानयुक्त, (वृष्णः) बल करने वाले (सोमस्य) ऐश्वर्य की (आ वृषेथाम्) भले प्रकार वर्षा करो । (वाम्) तुम दोनों का (इदम्) यह (परिषिक्तम्) सब प्रकार सींचा हुआ (अन्धः) अन्न है, (अस्मिन्) इस (बर्हिषि) वृद्धि कर्म में (आसद्य) बैठ कर (मादयेथाम्) आनन्दित करो ॥

कण्डिका १६ ॥

अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू इत्यृचाभ्यनूक्तं मद्वद्धि तृतीयसवनम्। वयमु त्वामपूर्व्य यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन स्तोत्रियानुरूपौ। प्र मंहिष्ठाय बृहते बृहद्रय इत्युक्थमुखम्। ऐन्द्रं जागतं, जागताः पशवः, पशूनामाप्त्यै। जागतमु वै तृतीयसवनं तृतीयसवनस्य रूपम्। उदप्रुतो न वयो रक्षमाणा इति बार्हस्पत्यं सांशसिकम्। अहञ्चेति बृहस्पतिरब्रवीत्, देवतयोः संशंसायानतिशंसाय। अच्छाम इन्द्रं मतय. स्वर्विद इति पर्य्यास ऐन्द्राबार्हस्पत्ये। ऐन्द्राबार्हस्पत्यमस्यैतन्नित्यमुक्थम्। तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति। द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव. अयो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै। बृहस्पतिर्नः परि पातु पश्चादित्यैन्द्राबार्हस्पत्या परिदधाति। इन्द्राबृहस्पत्योरेव यज्ञं प्रतिष्ठापयति, उतोत्तरस्मादधरादघायोरिन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोत्विति। सर्वाभ्य एव दिग्भ्य आशिषमाशास्ते, नार्त्वीयं कामं कामयते। सोऽस्मै कामः समृध्यते, य एवं वेद, यश्चैवं विद्वान् ब्राह्मणाच्छंस्येतया परिदधाति। बृहस्पते युवमिन्द्रश्च वस्व इति यजति। एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट् करोति प्रत्येवाभिमृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति ॥ १६ ॥

कण्डिका १६ ॥ एकाह यज्ञ के तृतीय सवन के उक्थ में ब्राह्मणाच्छंसी ऋत्विज् के मन्त्र ॥

(अथ यत् ब्राह्मणाच्छंसिनः ऐन्द्राबार्हस्पत्यम् उक्थं भवति) फिर जो ब्राह्मणाच्छंसी [ऋत्विज्] का इन्द्र और बृहस्पति [मन और आँख—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन]। (इन्द्रश्च सोमं पिबतं बृहस्पते अस्मिन् यज्ञे मन्दसाना वृषण्वसू ···इति ऋचा अभ्यनूक्तम्) इन्द्रः च सोमं पिबतं १—इस ऋचा करके अनुकूल कहा गया है। (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है। (वयमु त्वामपूर्व्य, यो नः इदमिदं पुरा—इति ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपौ) वयम् उ त्वाम् अपूर्व्य·····२, और, यः न इदमिदं पुरा·····३—यह दो मन्त्र ब्राह्मणाच्छंसी के स्तोत्रिय और अनुरूप हैं। (प्र मंहिष्ठाय बृहते बृहद्रये·····इति उक्थमुखम्) प्र महिष्ठाय बृहते बृहद्रये·····

१६—(बृहस्पते) हे बृहत्या वेदवाण्या रक्षक विद्वन् (मन्दसाना) मदि आमोदस्तुतिदीप्त्यादिषु—अमानच्। आमोदयितारौ (वृषण्वसू) यौ वृष्णो बलवतो वीरान् वासयतस्तौ (अपूर्व्य) स्वार्थे-यत् नास्ति पूर्वः श्रेष्ठो यस्मात् स अपूर्वः, अपूर्व्यः। हे अनुपम (इदमिदम्) बहुनिर्दिष्टम् (पुरा) अग्रे (मंहिष्ठाय) मंहतेर्दानकर्मा—निघ० ३। २०। महि वृद्धौ दाने च—तृच्, मंहितृ—इष्ठन्, तृलोपः। दातृतमाय (बृहते) गुणैर्महते (बृहद्रये) रै शब्दस्य ऐकारस्य एकारः। प्रभूतधनाय (जागतम्) जगत्

४—यह मन्त्र [ब्राह्मणाच्छंसी का] उक्थमुख है। (ऐन्द्रं जागतं, जागताः पशवः, पशूनाम् आप्त्यै) इन्द्र देवता वाला [स्तोत्र] जगत् का हितकारी है, जगत् के हितकारी पशु हैं, पशुओं की प्राप्ति के लिये [यह स्तोत्र है]। (जागतम् उ वै तृतीयसवनं तृतीयसवनस्य रूपम्) जगत् का हितकारी ही तीसरा सवन है [और पूर्वोक्त कर्म] तृतीय सवन का रूप है। (उदप्रुतो न वयो रक्षमाणाः·····इति बार्हस्पत्यं सांशंसिकम्) उदप्रुतः न वयः रक्षमाणाः·····५—यह मन्त्र बृहस्पति देवता वाला सांशंसिक [यथार्थ प्रशंसायुक्त उक्थ] है। (अहं च इति बृहस्पतिः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह बृहस्पति ने कहा [क० ११], वह दो देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो। (अच्छा म इन्द्रं मतयः स्वर्विदः·····इति ऐन्द्राबार्हस्पत्ये पर्य्यासः) अच्छा मे इन्द्रं मतयः स्वर्विदः····· ६—यह मन्त्र इन्द्र और बृहस्पति वाले [उक्थ] में पर्य्यास [अन्त] है। (अस्य ऐन्द्राबार्हस्पत्यम् एतत् नित्यम् उक्थम्) इस [ब्राह्मणाच्छंसी ऋत्विज्] का इन्द्र और बृहस्पति देवता वाला यह नित्य उक्थ है। (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन देवताओं ने दो दो होकर विजय के लिए ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़] की उत्पत्ति के लिये है। (बृहस्पतिर्नः परि पातु पश्चात्·· इति ऐन्द्राबार्हस्पत्या परिदधाति) बृहस्पतिः नः परि पातु पश्चात्·····७—इस इन्द्र और बृहस्पति वाली [ऋचा] से वह परिधानीया इष्टि करता है। (इन्द्राबृहस्पत्योः एव यज्ञं प्रतिष्ठापयति) इन्द्र और बृहस्पति के ही यज्ञ को वह स्थापित करता है। (उत उत्तरस्मात् अधरात् अघायोः इन्द्रः पुरस्तात् उत मध्यतः नः सखा सखिभ्यः वरिवः कृणोतु इति) उत उत्तरस्माद्·· यह [पूर्वोक्त मन्त्र ७ के तीन पाद बोले जाते हैं] (सर्वाभ्यः एव दिग्भ्यः आशिषम् आशास्ते, अत्वर्वीयं कामं न कामयते) सब ही दिशाओं से वह आशीर्वाद चाहता है और निन्दा योग्य कामना नहीं चाहता। (सः कामः अस्मै समृध्यते, यःएवं वेद, यः च एवं विद्वान् ब्राह्मणाच्छंसी एतया परिदधाति) वह काम [कामना योग्य पदार्थ] उस के लिये समृद्ध [सफल] होता है, जो ऐसा जानता है, और ऐसा

अण्। जगते हिताय (उदप्रुतः) प्रुङ् गतौ—क्विप्। उदकं प्राप्ताः (न) यथा (वयः) पक्षिणः (रक्षमाणाः) आत्मानं पालयन्तः (अच्छ) सुष्ठु (मे) मम (मतयः) बुद्धयः (स्वर्विदः) सुखस्य लम्भयित्र्यः (बृहस्पतिः) बृहतां शूराणां रक्षकः सेनापतिः (नः) अस्मान् (परि) सर्वतः (पातु) रक्षतु (ऐन्द्राबार्हस्पत्या) विभक्तेर्लुक्। ऐन्द्राबार्हस्पत्यया ऋचा (उत) अपि च (उत्तरस्मात्) ऊर्ध्वलोकात् (अधरात्) अधस्तनलोकात् (अघायोः) पापेच्छुकात्। दुराचारिणः (पुरस्तात्) अग्रे (नः) अस्मभ्यम् (सखा) सुहृत् (सखिभ्यः) मित्राणां हिताय (वरिवः) वृञ् वरणे यङ्लुकि—ऋतश्च (पा० ७ । ४ । ९२) अभ्यासस्य

विद्वान् ब्राह्मणाच्छंसी [ऋत्विज्] इस [स्तुति] से परिधानीया इष्टि करता है । (बृहस्पते युवम् इन्द्रश्च वस्वः·····इति यजति) बृहस्पते युवम् इन्द्रः च वस्वः·· ८—इस मन्त्र से वह याज्या आहुति देता है । (एते एव देवते तत् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दोनों देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है । (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति विना यज्ञ [यजमान को] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते हैं । देखो क० ३] ॥ १६ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १६ ॥

विशेष : १—(बृहद्रथ) के स्थान पर (बृहद्रय) वेदमन्त्र से शुद्ध किया है ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू । आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम्—अथर्व० २० । १३ । १, ऋग्० ४ । ५० । १० ॥ (बृहस्पते) हे बृहस्पति ! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र ! [अत्यन्त ऐश्वर्य वाले राजन्] (मन्दसाना) आनन्द देने वाले, (वृषण्वसू) बलवान् वीरों के निवास कराने वाले तुम दोनों (सोमम्) सोम [उत्तम ओषधियों के रस] को (अस्मिन्) इस (यज्ञे) यज्ञ [राजपालन व्यवहार] में (पिबतम्) पीओ । (स्वाभुवः) अच्छे प्रकार सब ओर होने वाले (इन्दवः) ऐश्वर्य (वाम्) तुम दोनों में (आ विशन्तु) प्रवेश करें, (अस्मे) हम को (सर्ववीरम्) सबको वीर बनाने वाला (रयिम्) धन (नि) नियम पूर्वक (यच्छतम्) तुम दोनों दो ॥

२—वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे – अथर्व २० । १४ । १, ऋग्० ८ । २१ । १, साम० पू० ५ । २ । १० ॥ (अपूर्व्य) हे अनुपम ! [राजन्] (कत् चित्) कुछ भी (स्थूरम्) स्थिर वस्तु (न) नहीं (भरन्तः) रखते हुये, (अवस्यवः) रक्षा चाहने वाले (वयम्) हम (वाजे) संग्राम के बीच (चित्रम्) विचित्र स्वभाव वाले (त्वाम्) तुझ को (उ) ही (हवामहे) बुलाते हैं ॥

३—यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे । सखाय इन्द्रमूतये—अथर्व० २० । १४ । ३, ऋग्० ८ । २१ । ९, साम० उ० ५ । २ । २ ॥ (यः) जो [पराक्रमी] (नः) हमारे लिये (इदमिदम्) इस—इस (वस्यः) उत्तम वस्तु

रिगागमः, वरिवो धननाम—निघ० २ । १० । वरणीयं धनम् (कृणोतु) करोतु (अर्त्वीयम्) भृमृशीङ्० (उ० १ । ७) ऋत जुगुप्सायाम्—उप्रत्ययः । अर्तु—छः । निन्दायोग्यम् (युवम्) युवाम् (वस्वः) वसुनः । धनस्य । अन्यत् पूर्ववत् क० १५ ॥

को (पुरा) पहिले (प्र) अच्छे प्रकार (आनिनाय) लाया है, (तम् उ) उस ही (इन्द्रम्) इन्द्र [महाप्रतापी वीर] को, (सखायः) हे मित्रो ! (वः) तुम्हारी (ऊतये) रक्षा के लिये (स्तुषे) मैं सराहता हूं ॥

४--प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे । अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम्-अथर्व० २० । १५ । १, ऋग्० १ । ५७ । १ ॥ (मंहिष्ठाय) अत्यन्त दानी, (बृहते) महागुणी, (बृहद्रये) महाधनी, (सत्यशुष्माय) सच्चे बलवान् [सभाध्यक्ष] के लिये (तवसे) बल पाने को (मतिम्) बुद्धि (प्र) उत्तम रीति से (भरे) मैं धारण करता हूँ (प्रवणे) ढालू स्थान में (अपाम् इव) जलों के [प्रवाह के] समान, (यस्य) जिस [सभाध्यक्ष] का (दुर्धरम्) बेरोक (विश्वायु) सब को जीवन देने वाला (राधः) धन (शवसे) बल के लिये (अपावृतम्) फैला हुआ है ॥

५--उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः । गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१ र्का अनावन्--अथर्व २० । १६ । १, ऋग्० १० । ६८ । १ ॥ (उदप्रुतः) जल को प्राप्त हुये, (रक्षमाणाः) अपनी रक्षा करते हुये (वयः न) पक्षियों के समान, (वावदतः) बार बार गरजते हुये (अभ्रियस्य) बादल के (घोषाः इव) शब्दों के समान (गिरिभ्रजः) पहाड़ों से गिरते हुये, (मदन्तः) तृप्त करते हुये (ऊर्मयः न) जल के प्रवाहों के समान, (अर्काः) पूजनीय पण्डितों ने (बृहस्पतिम्) बृहस्पति [बड़ी वेदवाणी के रक्षक महाविद्वान्] को (अभि) सब ओर से (अनावन्) सराहा है ॥

६--अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत । परिष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये--अथर्व० २० । १७ । १, ऋग्० १० । ४३ । १ ॥ (स्वर्विदः) सुख पहुँचाने वाली, (सध्रीचीः) आपस में मिली हुई, (उशतीः) कामना करती हुई, (विश्वाः) सब (मे) मेरी (मतयः) बुद्धियों ने (इन्द्रम्) इन्द्र [महाप्रतापी राजा] को (अच्छ) अच्छे प्रकार से (अनूषत) सराहा है और (ऊतये) रक्षा के लिये [ऐसे, उसे] (परिष्वजन्ते) सब ओर से घेरती हैं, (यथा) जैसे (जनयः) पत्नियाँ (पतिम्) [अपने अपने] पति को और (न) जैसे (शुन्ध्युम्) शुद्ध आचार वाले (मघवानम्) महाधनी (मर्यम्) मनुष्य को [लोग घेरते हैं] ॥

७--बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु--अथर्व० २० । १७ । ११, ऋग्० १० । ४३ । १ ॥ (बृहस्पतिः) बृहस्पति [बड़े शूरों का रक्षक सेनापति] (नः) हमें (पश्चात्) पीछे से, (उत्तरस्मात्) ऊपर से (उत) और (अधरात्) नीचे से (अघायोः) बुरा जीतने वाले शत्रु से (परि पातु) सब प्रकार बचावे । (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला राजा] (पुरस्तात्) आगे से (उत) और (मध्यतः) मध्य से (नः) हमारे लिये (वरिवः) सेवनीय धन (कृणोतु) करे, (सखा) [जैसे] मित्र (सखिभ्यः) मित्रों के लिये [धन करता है] ॥

८—बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य । धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः—अथर्व० २० । १७ । १२, ऋ० ७ । ९७ । १० ॥ (बृहस्पते) हे बृहस्पति ! [बड़ी वेदवाणी के रक्षक विद्वान्] (च) और (इन्द्रः) हे इन्द्र ! [महाप्रतापी राजन्] (युवम्) तुम दोनों (दिव्यस्य) आकाश के (उत) और (पार्थिवस्य) पृथिवी के (वस्वः) धन के (ईशाथे) स्वामी हो । (स्तुवते) स्तुति करते हुये (कीरये) विद्वान् को (रयिम्) धन को (चित्) अवश्य (धत्तम्) तुम दोनों दो, [हे वीरो !] (यूयम्) तुम सब (स्वस्तिभिः) सुखों के साथ (सदा) सदा (नः) हमें (पात) रक्षित रक्खो ॥

कण्डिका १७ ॥

अथ यदैन्द्रावैष्णवमच्छावाकस्योक्थं भवति इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधानेत्यृचाभ्यनूक्तम् । मद्वद्धि तृतीयसवनम् । अधा हीन्द्र गिर्वण इयन्त इन्द्र गिर्वण इत्यच्छावाकस्य स्तोत्रियानुरूपौ । ऋतुर्जनित्री तस्या अपस्परीत्युक्थमुखम् । तस्योक्तं ब्राह्मणं, नूमर्त्तो दयते सनिष्यन्निति वैष्णवं सांशंसिकम् । अहञ्चेति विष्णुरब्रवीत्, देवतयोः संशंसायानतिशंसाय । सं वां कर्मणा समिषा हिनोमीति पर्य्यास ऐन्द्रावैष्णवे । ऐन्द्रावैष्णवमस्यैतन्नित्यमुक्थम् । तदेतत् स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति । द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त विजित्या एव । अथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या उभा जिग्यथुर्न पराजयेथे इत्यैन्द्रावैष्णव्यर्चा परिदधाति, इन्द्राविष्णोरेव यज्ञं प्रतिष्ठापयति । इन्द्राविष्णू पिबतं मध्वो अस्येति यजति । एते एव तद्देवते यथाभागं प्रीणाति वषट्कृत्यानुवषट्करोति । प्रत्येवाभिमृशन्ते नाप्याययन्ति न ह्यनाराशंसाः सीदन्ति ॥ १७ ॥

कण्डिका १७ ॥ एकाह यज्ञ के तृतीयसवन के उक्थ में अच्छावाक ऋत्विज् के मन्त्र ॥

(अथ यत् अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) फिर जो अच्छावाक [अच्छे बोलने वाले ऋत्विज्] का इन्द्र और विष्णु [मन और कान—क० ११] देवता वाला उक्थ [स्तोत्र] होता है [उसका वर्णन] । (इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना··· ···इति ऋचा अभ्यनूक्तम्) इन्द्राविष्णू मदपती ··· १—इस ऋचा करके अनुकूल कहा गया है । (मद्वत् हि तृतीयसवनम्) हर्ष युक्त [अथवा मद शब्द वाला] ही तृतीय सवन है । (अधा हीन्द्र गिर्वणः · इयं त इन्द्र गिर्वणः··· इति अच्छावाकस्य स्तोत्रियानुरूपौ) अधा हि इन्द्र गिर्वणः··· २—और, इयं ते इन्द्र

१७—(इन्द्राविष्णू) वायुविद्युताविव सभासेनेशौ (मदपती) आनन्दस्य पालकौ (मदानाम्) आनन्दानाम् (सोमम्) ऐश्वर्यम् (आ यातम्) आगच्छतम् (द्रविणो) द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति सिद्धम् । द्रविणा द्रविणानि धनानि उ अपि (दधाना) दधानौ । धरन्तौ (अध) अद्य । सम्प्रति (हि) एव (गिर्वणः) स्तुतिभिः सेवनीय (ऋतुः) वर्षाकालः (जनित्री)

गिर्वणः·····३—यह दो मन्त्र अच्छावाक के स्तोत्रिय और अनुरूप हैं। (ऋतुर्जनित्री तस्या अपस्परि·····इति उक्थमुखम्) ऋतुः जनित्री तस्याः अपः परि·····४—यह मन्त्र [अच्छावाक का] उक्थमुख है। (तस्य उक्तं ब्राह्मणम्) उसका ब्राह्मण कहा गया है। (नू मर्त्तो दयते सनिष्यन्·····इति वैष्णवं सांशंसिकम्) नु मर्त्तः दयते सनिष्यन्····· ५—यह मन्त्र विष्णु देवता वाला सांशंसिक [यथार्थ प्रशंसा युक्त उक्थ] है। (अहं च इति विष्णुः अब्रवीत्, देवतयोः संशंसाय अनतिशंसाय) और मैं—यह विष्णु ने कहा [क० ११], वह देवताओं की यथार्थ प्रशंसा के लिये है जो अत्युक्ति बिना प्रशंसा हो। (सं वां कर्मणा समिषा हिनोमि·····, इति ऐन्द्रावैष्णवे पर्य्यासः) सं वां कर्मणा·····६—यह मन्त्र इन्द्र और विष्णु वाले [उक्थ] में पर्यास [अन्त] है। (अस्य ऐन्द्रावैष्णवम् एतत् नित्यम् उक्थम्) इस [अच्छावाक] का इन्द्र और विष्णु देवता वाला यह नित्य उक्थ है। (तत् एतत् स्वस्मिन् आयतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति) सो यह [उक्थ] अपने स्थान में और अपनी प्रतिष्ठा में [यजमान को] स्थापित करता है। (एताः देवताः द्वन्द्वं वै भूत्वा विजित्यै एव व्यजयन्त) इन सब देवताओं ने दो दो होकर विजय के लिये ही विजय पाया है। (अथो द्वन्द्वस्य एव मिथुनस्य प्रजात्यै) फिर दो दो [देवता] वाले ही मिथुन [ज्ञान वा जोड़ा] की उत्पत्ति के लिये है। (उभा जिग्यथुर्न पराजयेथे····इतिऐन्द्रावैष्णव्या ऋचा परिदधाति) उभा जिग्यथुः न····७—इस इन्द्र और विष्णु वाली ऋचा से वह परिधानीया इष्टि करता है। (इन्द्राविष्णोः एव यज्ञं प्रतिष्ठापयति) इन्द्र और विष्णु के यज्ञ को वह स्थापित करता है। (इन्द्राविष्णू पिबतं मध्वो अस्य····इति यजति) इन्द्राविष्णू पिबतम्····८—इस मन्त्र से वह याज्या आहुति देता है। (एते एव देवते तत् यथाभागं प्रीणाति वषट्कृत्य अनुवषट्करोति) इन ही दो देवताओं को उससे अपने अपने भाग के अनुसार वह प्रसन्न करता है और वषट्कार करके अनुवषट्कार [अन्तिम आहुति दान] करता है। (प्रति एव अभिमृशन्ते, अनाराशंसाः न आप्याययन्ति न हि सीदन्ति) वे [ऋषि लोग] प्रत्यक्ष ही विचारते हैं—नरों [नेताओं] की स्तुति

जनयित्री। जननी (अपः) जलानि (परि) सर्वतः (नु) शीघ्रम् (मर्त्तः) मनुष्यः (दयते) धनमादत्ते (सनिष्यन्) सर्वधातुभ्यः इन् (उ० ४। ११८) षणु दाने—इन्। सुप आत्मनः क्यच् (पा० ३। १। ८) सनि—क्यच्, लालसायां सुगागमः, ततः शतृ।[1] दातव्यधनमिच्छन् (सम्) सम्यक् (वाम्) युवाम् (कर्मणा) ईप्सिततमेन व्यापारेण (इषा) अन्नेन (हिनोमि) वर्धयामि (उभा) उभौ। इन्द्राविष्णू (जिग्यथुः) लिटि रूपम्। युवां जितवन्तौ शत्रून् (न) निषेधे (पराजयेथे) पराजयं प्राप्नुथः (मध्वः) मधुरस्य। अन्यत् ,र्ववत् ॥

---

१. रूपसिद्धि की प्रक्रिया के इतने लम्बे व्यायाम की अपेक्षा लृडन्त सन् धातु से 'लृटः सद्वा' के नियम के अनुसार शतृ प्रत्यय होकर प्रथमा के एकवचन में 'सनिष्यन्' बनाना अधिक श्रेयस्कर है॥ सम्पा० ॥

बिना यज्ञ [यजमान का] न बढ़ाते हैं और नहीं चलते हैं [नहीं आप बढ़ते है। देखो क० ३] ॥ १७ ॥

भावार्थः—कण्डिका १५ के समान है ॥ १७ ॥

विशेषः १—(मदयती) के स्थान पर (मदपती) और (अपसस्परि) के स्थान पर (अपस्परि) वेद मन्त्र से शोधा है ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना। सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः—ऋग्० ६ । ६९ । ३ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [वायु और बिजुली के समान सभापति और सेनापति] (मदानाम्) आनन्दों के बीच (मदपती) आनन्द के पालने वाले और (द्रविणो) धनों के भी (दधाना) धारण करने वाले तुम दोनों (सोमम्) ऐश्वर्य को (आ यातम्) प्राप्त होओ। (मतीनाम्) मनुष्यों के (शस्यमानासः) बोले हुये (स्तोमासः) स्तोम [स्तुति व्यवहार] (अक्तुभिः) तेजों और (उक्थैः) वेद स्तोत्रों के साथ (वाम्) तुम दोनों को (सं सम् अञ्जन्तु) बहुत अच्छे प्रकार प्रकट करें।

२—अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे। उदेव यन्त उदभिः—अथर्व० २० । १०० । १, ऋ० ८ । ९८ । ७, [सायण भाष्य ८७] साम० उ० १ । १ । तृच २३ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (अध हि) अब ही (त्वा) तुझे (महः) अपनी बड़ी (कामान्) कामनाओं को, (उदा) जल [जल की बाढ़] के पीछे (उदभिः) दूसरे जलों की बाढ़ों के साथ (यन्तः इव) चलते हुये पुरुषों के समान हमने (उप) आदर से (ससृज्महे) समर्पण किया है ॥

३—इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः। मन्दानो अस्य बर्हिषो वि राजसि—ऋ० ८ । १३ । ४ ॥ (गिर्वणः) हे स्तुतियों से सेवनीय (इन्द्र) इन्द्र ! [महाप्रतापी राजन्] (ते) तेरे लिये (सुन्वतः) तत्त्वरस निचोड़ने वाले पुरुष की (इयम्) यह (रातिः) दान क्रिया (क्षरति) बहती है, (मन्दानः) हर्ष करता हुआ तू (अस्य बर्हिषः) इस वृद्धि कारक व्यवहार का (वि) विशेष करके (राजसि) राजा है ॥

४—ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते। तदाहना अभवत् पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम्—ऋ० २ । १३ । १ ॥ (ऋतुः) ऋतु [वर्षाकाल] (जनित्री) [प्रत्येक पदार्थ की] जननी है, (तस्याः परि) उस [जननी] से (जातः) उत्पन्न होकर वह [पदार्थ] (मक्षु) शीघ्र (अपः) जलों में (आ अविशत्) सब प्रकार से प्रवेश करता है, (यासु) जिन [जलों] में (वर्धते) वह बढ़ता है। (तत्) इससे वह [पदार्थ] (आहनाः) पाने योग्य (अभवत्) होता है, और (पयः) रस की (पिप्युषी) बढ़ाने वाली [वह जननी ऋतु होती है]। (तत्)

तब (अंशोः) अंशु [ओषधि के डांठल] का (पीयूषम्) पीने योग्य रस (प्रथमम्) मुख्य करके (उक्थ्यम्) प्रशंसनीय [अथवा उक्थ नामक यज्ञ के योग्य] होता है ॥

५—नू मर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत् । प्र यः सत्राचा मनसा यजाते एतावन्तं नर्यमा विवासात्--ऋग्० ७ । १०० । १ ॥ (सनिष्यन्) भक्ति चाहता हुआ (मर्तः) वह मनुष्य (नु) शीघ्र (दयते) [मनोरथ] पाता है, (यः) जो (उरुगायाय) बहुत गाने योग्य (विष्णवे) विष्णु [व्यापक परमात्मा] को (दाशत्) देवे [आत्मदान करे] और (यः) जो (सत्राचा) सत्य को प्राप्त हुये (मनसा) मन से (एतावन्तम्) इतने बड़े (नर्यम्) नरों के हितकारी [विष्णु] को (प्र यजाते) अच्छे प्रकार पूजे और (आविवासात्) सब ओर से सेवे ॥

६—सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता—ऋ० ६ । ६९ । १ ॥ (इन्द्राविष्णू) हे इन्द्र और विष्णु [सूर्य और बिजुली के समान सभापति और सेनापति] (वाम्) तुम दोनों को (अस्य) इस (अपसः पारे) कर्म के पार में (कर्मणा) अत्यन्त चाहे हुये व्यापार और (इषा) अन्न से (सं मं हिनोमि) मैं बढ़ाता हूं, (यज्ञम्) यज्ञ [संगति करण व्यवहार] को (जुषेथाम्) सेवो (च) और (नः) हमको (अरिष्टैः) बेरोक (पथिभिः) मार्गों से (पारयन्ता) पार करते हुये तुम दोनों (द्रविणम्) धन वा यश (धत्तम्) दो ॥

७—उभा जिग्यथुर्न परा जयेथे न पराजिग्ये कतरश्च नैनयोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्--अथर्व० ७ । ४४ । १, ऋ० ६ । ६९ । ८ ॥ (विष्णो) हे विष्णु ! [बिजुली के समान व्याप्त होने वाले सभापति] (च) और (इन्द्रः) हे इन्द्र ! [वायु के समान ऐश्वर्यवान् सेनापति] (उभा) तुम दोनों ने [शत्रुओं को] (जिग्यथुः) जीता है, और तुम दोनों (न) कभी नहीं (परा जयेथे) हारते हो, (एनयोः) इन [तुम] दोनों में से (कतरः चन) कोई भी (न) नहीं (परा जिग्ये) हारा है । (यत्) जब (अपस्पृधेथाम्) तुम दोनों ललकारे हो (तत्) तब (सहस्रम्) असंख्य [शत्रु सेना दल] को (त्रेधा) तीन विधि पर [ऊंचे, नीचे और मध्य स्थान में] (वि) विविध प्रकार से (ऐरयेथाम्) तुम दोनों ने निकाल दिया है ॥

८--इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् । आ वामन्धांसि मदिराण्यग्मन्नप ब्रह्माणि शृणुतं हवं मे--ऋग्० ६ । ६९ । ७ ॥ (दस्रा) हे दुःखनाशक (इन्द्राविष्णू) इन्द्र और विष्णु ! [वायु और बिजुली के समान अध्यापक और उपदेशक] तुम दोनों (अस्य) इस (मध्वः) मधुर (सोमस्य) सोम [ओषधियों के रस] का (पिबतम्) पान करो और (जठरम्) पेट को (आ पृणेथाम्) अच्छे प्रकार भरो । (वाम्) तुम दोनों को (मदिराणि) आनन्द देने वाले (अन्धांसि) अन्न (अग्मन्) प्राप्त हुये हैं, (मे) मेरे (ब्रह्माणि) स्तोत्रों और (हवम्) पुकार को (उप शृणुतम्) तुम दोनों समीप से सुनो ॥

कण्डिका १८ ॥

अथाध्वर्य्यो शꣳशꣳसावोमिति स्तोत्रियायानुरूपायोक्थमुखाय परिधानीयाया इति चतुश्चतुराह्वयन्ते। चतस्रो वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते। अथो चतुष्पादः पशवः, पशूनामाप्त्यै। अथो चतुष्पर्वाणो हि तृतीयसवने होत्रकाः तस्माच्चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति। जागतं हि तृतीयसवनम्। अथ हैतत् त्रैष्टुभान्यप्रतिभूतमिव हि प्रातःसवने मरुत्वतीये तृतीयसवने च होत्रकाणां शस्त्रम्। धीतरसं वा एतत्सवनं, यत्तृतीयसवनम्। अथ हैतदधीतरसं शुक्रियं छन्दः, यत् त्रिष्टुभा यातयामसेवनस्यैव तत् सरसतायै। सर्वे समवतीभिः परिदधति, तद्यत्समवतीभिः परिदधति। अन्तो वै पर्य्यासोऽन्त उदर्कोऽन्तः, सजाया उ ह वा अवेनायान्तेनैवान्तं परिदधति। सर्वे मद्वतीभिर्यजन्ति। तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवतीभिः पीतवतीभिरूपाभिर्यजन्ति। यद्यज्ञेऽभिरूपं तत्समृद्धम्। सर्वेऽनुवषट् कुर्वन्ति, स्विष्टकृत्त्वा अनुवषट्कारो नेत् स्विष्टकृतमन्तरयामेति। असौ वै लोकस्तृतीयसवनं, तस्य पञ्च दिशः, पञ्चोक्थानि तृतीयसवनस्य। स एतैः पञ्चभिरुक्थैः एताः पञ्च दिश आप्नोति। तद्यदेषां लोकानां रूपं, या मात्रा। तेन रूपेण तया मात्रयेमांल्लोकान्नृघ्नोतीमांल्लोकान्नृघ्नोतीति ॥ १८ ॥

कण्डिका १८ ॥ एकाह यज्ञ के तृतीयसवन में (शंशंसावोम्) इस मन्त्र को चार चार बार बोलें ॥

(अथ अध्वर्य्यो शंशंसावोम् इति, स्तोत्रियाय अनुरूपाय उक्थमुखाय परिधानीयायै इति चतुः चतुः आह्वयन्ते) फिर (अध्वर्य्यो शंशंसाव ओम्) हे अध्वर्यो ! हम दोनों स्तुति करें, हां—इस मन्त्र से स्तोत्रिय [स्तुति योग्य व्यवहार] के लिये, अनुरूप [विषय की अनुकूलता] के लिये, उक्थमुख [यज्ञ की मुख्यता] के लिये और परिधानीया [समाप्ति क्रिया] के लिये—इस प्रकार चार-चार बार वे बोलते हैं। (चतस्रः वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते) चार ही दिशायें हैं, दिशाओं में उससे वे [याजक] प्रतिष्ठा पाते हैं। (अथो चतुष्पादः पशवः पशूनाम् आप्त्यै) फिर चार पांव वाले पशु होते हैं, पशुओं की प्राप्ति के लिये [यह यज्ञ] है। (अथो तृतीयसवने चतुष्पर्वाणः हि होत्रकाः) फिर तृतीयसवन में चार अङ्ग वाले ही सहायक होता लोग होते हैं। (तस्मात् चतुः सर्वे त्रैष्टुभं जागतानि शंसन्ति) इसलिये चार बार वे सब त्रिष्टुप् [कर्म उपासना ज्ञान के सहारे वाले अथवा त्रिष्टुप्] छन्दों वाले स्तोत्रों से जगत् के हितकारी कर्म वे बोलते हैं। (जागतं हि तृतीयसवनम्) जगत् का हितकारी ही तीसरा सवन है। (अथ ह एतत् त्रैष्टुभानि प्रातःसवने मरुत्वतीये तृतीयसवने च

१८—(शंशंसाव) पूर्वाक्षरस्य द्वित्वमार्षम्—गो० उ० ३। १०, १६ तथा ४। ४। शंसाव। आवाम् शंसनं स्तोत्रं करवाव (ओम्) अनुमतौ (त्रैष्टुभम्) त्रैष्टुभानि। त्रिष्टुप्छन्दोयुक्तानि। कर्मोपासनाज्ञानयुक्तानि (जागतानि)

होत्रकाणाम् अप्रतिभूतम् इव हि शस्त्रम्) फिर यह ही त्रिष्टुप् छन्द वाले स्तोत्र प्रातःसवन में, मरुत्वतीय [माध्यन्दिन सवन] में और तीसरे सवन में सहायक होता लोगों का अप्रतिभूत [प्रतिभू अर्थात् स्थानी बिना] ही शस्त्र [स्तोत्र] हैं [अर्थात् त्रिष्टुप् तीनों सवनों में अवश्य बोला जाता है]। (धीतरसं वै एतत् सवनम्, यत् तृतीयसवनम्) पी चुके हुये रस वाला ही यह सवन है, जो तीसरा सवन है [तीसरे सवन से पहिले सोमरस पी लिया जाता है फिर किस लिये तीसरा सवन है—इस प्रश्न का समाधान इस प्रकार है]। (अथ ह एतत् अधीतरसं शुक्रियं छन्दः, यत् त्रिष्टुभा यातयामसवनस्य एव तत् सरसतायै) फिर यह बिना पी चुके हुये रस वाला, वीर्यवान् छन्द [स्तोत्र] है, जो त्रिष्टुप् [तीनों सवनों में ठहरने वाले छन्द] के साथ बीते हुये योग्य समय वाले सवन के रसीलेपन के लिये है [देखो–ऐतरेय ब्रा० ६। १२]। (सवं समवतीभिः परिदधति, यत् तत् समवतीभिः परिदधति.) वे सब समवती ऋचाओं से [सम शब्द वाली ऋचाओं से जैसे—समं ज्योतिः सूर्येण·····अथर्व० ४। १८। १, इत्यादि मन्त्रों से] समाप्त करते हैं, क्योंकि वहां समवती ऋचाओं से वे समाप्त करते हैं। (अन्तः वै पर्यासः, अन्त उदर्कः, अन्तः सजायाः उ ह वै अवेनाय अन्तेन एव अन्तं परिदधति=परिदधाति) अन्त ही पर्यास [विराम] है, अन्त ही उदर्क [अवसान वा विच्छेद अर्थात् रोक] है अन्त ही संगति के रक्षक के लिये अन्त के साथ ही अन्त को समाप्त करता है। [एक एव विषय पर रुककर दूसरे को आरम्भ करके समाप्त किया जाता है]। (सर्वे मद्वतीभिः यजन्ति, यत् तत् मद्वतीभिः यजन्ति) वे सब मद्वती [मद शब्द वाली] ऋचाओं से यज्ञ करते हैं [याज्या ऋचा बोलते हैं], क्योंकि वहां मद्वती ऋचा से वे यज्ञ करते हैं (सर्वे सुतवतीभिः पीतवतीभिः अभिरूपाभिः यजन्ति) वे सब सुतवती [सुत शब्द वाली] ऋचाओं से, पीतवती [पीत शब्द वाली] ऋचाओं से और अभिरूप [विषय के अनुकूल] ऋचाओं से यज्ञ करते हैं। [मद्वती, सुतवती और पीतवती ऋचाओं के लि देखो ऋग्० १। १६। ८। और बहुवचन शब्द होने से ब्राह्मण में समस्त इस नौ ऋच वाले सूक्त का ग्रहण अभीष्ट है। अभिरूप शब्द से यह प्रयोजन है कि अभीष्ट देवता व स्तुति में उस देवता के सूचक पद आ जावें]। (यत् यज्ञे अभिरूपं, तत् समृद्धम्) ज यज्ञ में विषय के अनुकूल कर्म है, वह समृद्ध है। (सर्वे स्विष्टकृत्वा अनुवष कुर्वन्ति) सब स्विष्टकृत् मन्त्र [यदस्य कर्मणोऽत्यरीरिच····· देखो—गो० उ० ३। १ पढ़कर अनुवषट् [समाप्ति सूचक पद] पढ़ते हैं। (अनुवषट्कारः स्विष्टकृतं ने अन्तरयाम इति) अनुवषट्कार स्विष्टकृत् मन्त्र को कभी भी बीच [व्यवधान] से न लेता [स्विष्टकृत् के पीछे ही अनुवषट् होता है]। (असौ वै लोकः तृतीयसवनम्

जगतीछन्दोयुक्तानि। जगते हितानि (अप्रतिभूतम्) प्रतिभूरहितम्। स्थानि रहितम् (धीतरसम्) धेट् पाने—क्तः। पीतसारम् (अधीतरसम्) अपीतस रम्। सर्वरसोपेतम् (शुक्रियम्) शुक्र—घन्। वीर्ययुक्तम्। (यातयामसवनस्य गतयोग्यकालसवनस्य (सरसतायै) सरसत्वाय (सजायाः) षञ्ज सङ्गे—क टाप्। सञ्जते (अवेनाय) श्यास्त्यादिवि[illegible] (उ० २। ४६) अव रक्षण

ACADEMY OF SANSKRIT RESEARCH
LIBRARY
19104
26.4.95

वह ही [सूर्य] लोक तीसरा सवन है। (तस्य पञ्च दिशः, तृतीयसवनस्य पञ्च उक्थानि) उस [सूर्य लोक] की पांच दिशायें [पूर्व, दक्षिण, पश्चिम, उत्तर और एक ऊपर नीचे की दिशा] हैं और तीसरे सवन के पांच उक्थ [समवती, मद्वती, सुतवती, पीतवती और अभिरूपा ऋचाओं वाले स्तोत्र] हैं। (सः एतैः पञ्चभिः उक्थैः, एताः पञ्चदिशः आप्नोति) वह [यजमान] इन पांच प्रकार वाले स्तोत्रों से इन पाच दिशाओं को पाता है। (तत् यत् एषां लोकानां रूपं या मात्रा) क्योंकि वह इन लोकों का रूप [आकार] है जो मात्रा [परिमाण] है। (तेन रूपेण तया मात्रया इमान् लोकान् ऋध्नोति, इमान् लोकान् ऋध्नोति इति) उस ही रूप [आकार] से और उस मात्रा [परिमाण] से इन लोकों को वह समृद्ध करता है, इन लोकों को वह समृद्ध करता है [अवश्य समृद्ध करता है] ॥ १८ ॥

भावार्थः—मनुष्यों को योग्य है कि देश और काल का विचार करके कार्य करें जिससे उन्हें सफलता प्राप्त हो ॥ १८ ॥

विशेषः १—(शस्त्रं) के स्थान पर (शस्त्रं) ठीक है, और (सरस्वतायै) के स्थान पर (सरसतायै) ऐ० ब्रा० ६ । १२ से शुद्ध किया है ॥

विशेषः २—इस कण्डिका को प्रातःसवन में गो० उ० ३ । १६ और माध्यन्दिन सवन में उ० ४ । ४ से मिलाओ और वहां पर ही प्रयोजनीय मन्त्र हैं ॥

कण्डिका १९ ॥

तदाहुः, किं षोडशिनः षोडशित्वं षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्षरैरादत्ते, द्वे वा अक्षरे अतिरिच्येते, षोडशिनोऽनुष्टुभमभिसम्पन्नस्य । वाचो वा एतौ स्तनौ, सत्यानृते वाव ते, अवत्यैनं सत्यम् नैनमनृतं हिनस्ति, य एवं वेद ॥ १९ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणस्य चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

कण्डिका १९ ॥ एकाह यज्ञ में षोडशी शब्द की व्याख्या ॥

(तत् आहुः, षोडशिनः किं षोडशित्वम्) वे कहते हैं—षोडशी [सोलह अङ्ग वाले यज्ञ] का क्या षोडशित्व [सोलहपन] है ? [इस का समाधान] (षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिः अक्षरैः आदत्ते) सोलह स्तोत्रों और सोलह शस्त्रों को [आधे आधे अनुष्टुप् छन्द के] सोलह अक्षरों से वह [अध्वर्यु] ग्रहण करता है। (अनुष्टुभम् अभिसम्पन्नस्य षोडशिनः द्वे अक्षरे वै अतिरिच्येते) अनुष्टुप् रखने वाले षोडशी [स्तोत्र] के दो दो अक्षर बढ़ जाते हैं [आधे अनुष्टुप् के १६ अक्षरों के आदि और अन्त में ओम् शब्द बोलने से १८ अक्षर होते हैं—इस का समाधान]।

—इनच् = एनच् । अविनाय । रक्षकाय (अन्तरयाम) गो० उ० ३ । १६ । अन्तर्याति । अन्तरेण गच्छति । अन्यद् गतम्—गो० उ० ३ । १६ ॥

१९—(आदत्ते) गृह्णाति (अतिरिच्येते) अधिके भवतः (अभिसम्प-

(वाचः वै एतौ स्त[1], ते वाव सत्यानृते) वाणी के [स्त्रीलिङ्ग होने से] यह दोनों स्तन [कुच वा चूची] हैं जो ही सत्य और झूठ हैं । (सत्यम् एनम् अवति अनृतम् एनं न हिनस्ति, यः एवं वेद) सत्य उसकी रक्षा करता है और झूठ उसको नहीं सताता है जो ऐसा जानता है ॥ १९ ॥

भावार्थ :—मनुष्य को उन्नति के लिये सत्य का ग्रहण और असत्य का त्याग करना चाहिये ॥ १९ ॥

विशेषः १—एकाह यज्ञ समाप्त हुआ ॥

विशेषः २ - इस कण्डिका को मिलाओ—ऐ० ब्रा० ४ । १ ॥

विशेषः ३—(ते वा) के स्थान पर (ह्ये वा) ऐ० ब्रा० से शुद्ध किया है ॥

इति श्रीमद्राजाधिराज-प्रथितमहागुणमहिम-*श्रीसयाजीराव-गायकवाडा-धिष्ठित*-बड़ोदेपुरीगत-श्रावणमासदक्षिणापरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदास त्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्य उत्तरभागे चतुर्थः प्रपाठकः समाप्तः ॥

अथ प्रपाठकः प्रयागनगरे माघमासे शुक्लचतुर्दश्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे सुसमाप्तिमगात् ॥

मुद्रितम्—आश्विनशुक्ला ४ संवत् १९८१ वि० ता० २ अक्टूबर सन् १९२४ ई० ॥

अथ पञ्चमः प्रपाठकः ॥

कण्डिका १ ॥

ओम् । अहर्वै देवा आश्रयन्त रात्रीमसुराः । तेऽसुराः समावद्वीर्य्या एवासन्, नो व्यावर्त्तन्त । सोऽब्रवीत् इन्द्रः, कश्चाहं चेमानसुरान् रात्रीमन्ववैष्यामहा इति । स देवेषु न प्रत्यविन्दत्, अबिभयू रात्रेस्तमसः । मृत्योस्तम इव हि रात्रिः, मृत्युर्वै तमः, तस्माद्वाप्येतर्हि भूयानिव नक्तम् । स यावन्मात्रमिवाप[1]क्रम्य बिभेति, तं वै छन्दांस्येवान्ववायन् । तच्छन्दांस्येवान्ववायन्, तस्मादिन्द्रश्च छन्दांसि च रात्रिं वहन्ति, न निविच्छस्यते न पुरोरुङ् न धाय्या नान्या देवता । इन्द्रश्च ह्येव छन्दांसि च रात्रिं वहन्ति तान्वै पर्य्यायैः पर्य्यायमनुदन्त । यत् पर्य्यायैः पर्य्यायमनुदन्त, तस्मात् पर्य्यायाः, तत् पर्य्यायाणां पर्य्यायत्वम् । तान्वै प्रथमैरेव पर्य्यायैः पूर्वरात्रादनुदन्त, मध्यमैर्मध्यरात्रादुत्तमैरपररात्रात् । अपिशर्वर्या अपिस्मसीत्य-

---

न्नस्य) अभिप्राप्तस्य (स्तनौ) स्तन मेघशब्दे—अच् । स्त्रीणाम् अङ्गभेदौ (सत्यानृते) सत्यं यथार्थवदनं च अनृतं मिथ्यावदनं च (अवति) रक्षति (हिनस्ति) दुःखयति ॥

---

१. पू. सं. "आप्रक्रम्य" इति पाठः ॥ सम्पा० ॥

ब्रुवन् । तद्यदपिशर्वर्या अपिस्मसीत्यब्रुवन्, तदपिशर्वराणामपिशर्वरत्वम् । शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति ह स्माह । एतानि ह वा इन्द्रं रात्र्यास्तमसो मृत्योरभिपत्यावारयन्, तदपिशर्वराणामपिशर्वरत्वम् ॥ १ ॥

कण्डिका १ ॥ आख्यायिका—अतिरात्र यज्ञ में से इन्द्र और छन्दों ने तीन पर्य्यायों में असुरों को निकाल दिया ॥

(ओम्) ओम् [हे परमेश्वर] । (देवाः वै अहः आश्रयन्त, असुराः रात्रीम्) देवताओं ने दिन [प्रकाश वा ज्ञान] का आश्रय लिया और असुरों ने रात्रि [अन्धकार वा अज्ञान] का । (ते असुराः समावद्वीर्याः एव आसन् नो व्यावर्तन्त) वे असुर [देवताओं के] तुल्य पराक्रमी निश्चय करके थे, [इसलिये] वे न हटे । (सः इन्द्रः अब्रवीत् कः च अहं च इमान् असुरान् रात्रीम् अनु अवेष्यामहै इति) वह इन्द्र बोला—कौन और मैं [हम दोनों] इन असुरों को रात्रि में ढूंढ़कर निकाल दें । (सः देवेषु न प्रत्यविन्दत्, रात्रेः तमसः अबिभयुः) उसने देवताओं में ढूंढ़कर [किसी को भी] न पाया, वे रात्रि के अन्धकार से डर गये । (मृत्योः तमः इव हि रात्रिः, मृत्युः वै तमः) मृत्यु के अन्धकार के समान ही रात्रि है, मृत्यु [के समान] ही अन्धकार है । (तस्मात् ह अपि एतर्हि नक्तं भूयान् इव सः यावन्मात्रम् इव अपक्रम्य बिभेति) इसलिये ही अब भी रात्रि में अधिकतर वह [प्रत्येक मनुष्य] थोड़ा भी बाहर जाकर डरता है । (छन्दांसि एव तं वै अनु अवायन्) छन्द [आह्लादक गायत्री आदि] ही उस [इन्द्र] के साथ साथ चले । (तत् यत् छन्दांसि एव अनु अवायन्, तस्मात् इन्द्रः च छन्दांसि च रात्रिं वहन्ति, न निवित् शस्यते न पुरोरुक् न धाय्या, न अन्या देवता) सो जो छन्द ही साथ साथ चले, इसलिये इन्द्र और छन्द रात्रि [अतिरात्र यज्ञ] को चलाते हैं, न निवित् [निश्चित विद्या स्तुति विशेष] बोली जाती है, न पुरोरुक् [आगे से प्रसन्न करने वाली स्तुति विशेष] न धाय्या [धारण करने योग्य, सामिधेनी ऋचा] न दूसरा देवता । (इन्द्रः च हि एव छन्दांसि च रात्रिं वहन्ति, तान् वै पर्य्यायैः पर्य्यायम् अनुदन्त) इन्द्र और छन्दों ने ही रात्रि [अतिरात्र यज्ञ] को चलाया, उन्होंने उन [असुरों] को ही पर्य्यायों [क्रम क्रम से] घेरकर निकाल दिया । (यत् पर्य्यायैः पर्य्यायम् अनुदन्त, तस्मात् पर्य्यायाः, तत् पर्य्यायाणां पर्य्यायत्वम्)

१—(आश्रयन्त) आ—अश्रयन्त । आश्रितवन्तः । सेवितवन्तः (समावद्वीर्याः) पूर्वपदस्य दीर्घत्वं मतुपो योजनं चार्षम् । समवीर्याः । तुल्यपराक्रमाः (नो) निषेधे (व्यावर्तन्त) वि+आ+वृतु वर्तने—लङ् । निवृत्ता अभवन् (अनु) अनुगम्य (अवेष्यामहै) अव+आ+इष गतौ—लोट् । निःसारयाम (प्रत्यविन्दत) प्रतीक्ष्य प्राप्तवान् (अबिभयुः) भीताः अभवन् (तमसः) अन्धकारात् (एतर्हि) इदानीम् (भूयान्) बहुतरः (यावन्मात्रम्) यत्किंचित् (इव) एव । अपि (छन्दांसि) गायत्र्यादीनि छन्दांसि (अन्ववायन्) अनु+अव+इण् गतौ—लङ् । अनुगम्य प्राप्ताः (रात्रिम्) रात्रिभवमतिरात्रयज्ञम् (वहन्ति)

जो पर्यायों से घेरकर [उनको] उन्होंने निकाला, इसलिये वे पर्य्याय [घूमकर आने वाले] हैं, वह ही पर्य्यायों का पर्य्यायपन है। (तान् वै प्रथमैः एव पर्य्यायैः पूर्वरात्रात् अनुदन्त, मध्यमैः मध्यरात्रात्, उत्तमैः अपररात्रात्) उन [असुरों] को उन्होंने पहिले पर्य्यायों [घूमकर आने के व्यवहारों] के द्वारा रात्रि के पहिले भाग से निकाला, मध्यमों के द्वारा मध्यरात्रि से और पिछलों के द्वारा पिछली रात्रि से। (अपिशर्वर्याः अपिस्मसि—इति अब्रुवन्) वे [छन्द] बोले—निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं। (तत् यत् अपिशर्वर्याः अपिस्मसि. इति अब्रुवन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) जो उन [छन्दों] ने कहा—निश्चित रात्रि से [असुरों के निकालने को] हम उपस्थित हुये हैं, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है। (शर्वराणि खलु ह वै अस्य एतानि छन्दांसि इति ह स्म आह) [निश्चय करके असुरों के] नाश करने वाले इस [यज्ञ] के यह छन्द हैं—यह वह [ऋषि] कहता है। (एतानि ह वै इन्द्रं रात्र्याः मृत्योः तमसः अभिपत्य अवारयन्, तत् अपिशर्वराणाम् अपिशर्वरत्वम्) इन [छन्दों] ने ही इन्द्र को रात्रि के मृत्यु [के समान] अन्धकार से निकाल कर स्वीकार किया, इसलिये अपिशर्वरों [निश्चित नाश करने वालों] का अपिशर्वरत्व [निश्चित नाश करने वाला व्यवहार] है ॥ १ ॥

भावार्थः—मनुष्यों को चाहिये कि सदा सावधान रह कर पर्यायों अर्थात् पहरुओं द्वारा परस्पर रक्षा करें जिससे निशाचर चोर डाकू आदि कष्ट न देवें ॥ १ ॥

विशेषः—इस कण्डिका को मिलाओ—ऐ० ब्रा० ४ । ५ ॥

कण्डिका २ ॥

प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमान्येव पदानि पुनरादत्ते । यदेवैषां मनोरथा आसन्, तदेवैषान्तेनाददते । मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमान्येव पदानि पुनरादत्ते । यदेवैषामश्वा गाव आसन्, तदेवैषां तेनाददते । उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमान्येव पदानि पुनरादत्ते । यदेवैषां वासो हिरण्यं मणिरध्या-

---

निर्वहन्ति (निवित्) सत्सूद्विषद्रुहदुहयुजविद० (पा० ३ । २ । ६१) नि+विद ज्ञाने—क्विप् । निवित्, वाङ्नाम—निघ० १ । ११ । निश्चितविद्या । स्तुतिविशेषः (पुरोरुक्) पुरः+रुच दीप्तावभिप्रीतौ च—क्विप् । स्तुतिविशेषः (धाय्या) पाय्यसान्नाय्यनिकाय्यधाय्या० (पा० ३ । १ । १२९) दधातेर्यत् । अग्निज्वालनार्था ऋक् । सामिधेनी (पर्य्यायैः) परि+इण् गतौ—घञ् । अनुक्रमैः (पर्य्यायम्) पर्य्याय—णमुल् । परीत्य (अनुदन्त) निःसारितवन्तः (पूर्वरात्रात्) रात्रिप्रथमभागात् (अपिशर्वर्याः) कृगृशवृञ्चतिभ्यः ष्वरच् (उ० २ । १०१) शॄ हिंसायाम्—ष्वरच्, ङीष् । निश्चयेन रात्रेः सकाशात् (अपिस्मसि) अपिस्मः । निश्चयेन तिष्ठामः (अपिशर्वराणाम्) निश्चयेन असुरादिनाशकानाम् (शर्वराणि) असुरनाशकानि (अभिपत्य) उद्धृत्य (अवारयन्) स्वीकृतवन्तः ॥

त्ममासीत्, तदेवैषां तेनाददते। आ द्विषतो वसु दत्ते, निरेवैनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते, य एवं वेद ॥ २ ॥

कण्डिका २ ॥ अतिरात्र यज्ञ के तीन पर्य्यायों में तीन प्रकार से स्तुति ॥

(प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमानि एव पदानि पुनः आददते) पहिले पर्य्यायों में वे [ऋत्विज्] स्तुति करते हैं, [मन्त्रों के] पहिले ही पदों को वे दो बार लेते हैं [बोलते हैं]। (यत् एव एषां मनोरथाः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के मनोरथ होते हैं, उनके उन [मनोरथों] को उसके द्वारा वे ले लेते हैं। (मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमानि एव पदानि पुनः आददते) मध्य वाले पर्य्यायों में वे स्तुति करते हैं, [मन्त्रों के] मध्य वाले ही पदों को वे दो बार लेते हैं। (यत् एव एषाम् अश्वाः गावः आसन्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] के घोड़े और गौयें हैं उनके उनको ही वे उस के द्वारा ले लेते हैं। (उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमानि एव पदानि पुनः आददते) पिछले पर्यायों में वे स्तुति करते हैं, [मन्त्रों के] पिछले ही पदों को वे दो बार लेते हैं। (यत् एव एषां वासः हिरण्यं मणिः अध्यात्मम् आसीत्, एषां तत् एव तेन आददते) जो कुछ भी इन [असुरों] का वस्त्र, सुवर्ण, और मणि शरीर पर वर्तमान है, उनका उसको ही उसके द्वारा वह ले लेते है। (द्विषतः वसु आदत्ते, एनम् एभ्यः सर्वेभ्यः लोकेभ्यः एव निर् नुदते, यः एवं वेद) वह [मनुष्य] शत्रु का धन ले लेता है और इस [शत्रु] को इन सब लोकों से निकाल देता है, जो ऐसा विद्वान् है ॥ २ ॥

भावार्थः—नीति निपुण पुरुष सावधानी से शत्रुओं को अनेक प्रकार से आधीन करें ॥ २ ॥

विशेष :—इस कण्डिका को मिलाओ—ऐ० ब्रा० ४। ६ ॥

कण्डिका ३ ॥

पवमानवदहरित्याहुः, न रात्रिः पवमानवती, कथमुभे पवमानवती भवतः, केन ते समावद्भ्राजौ भवत इति। यदेवेन्द्राय मद्वने सुतमिदं वसो सुतमन्धः इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेनोभे पवमानवती भवतः, तेन ते समावद्भ्राजौ भवतः। पञ्चदशस्तोत्रमहरित्याहुः, न रात्रिः पञ्चदशस्तोत्रा, कथमुभे पञ्चदशस्तोत्रे भवतः, केन ते समावद्भ्राजौ भवत इति। द्वादशस्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः सन्धिना राथन्तरेणाश्विना

१—(स्तुवते) स्तुवन्ति (पुनः) द्विवारम् (आददते) गृह्णन्ति (मनोरथाः) इच्छाव्यवहाराः (एषाम्) असुराणाम् (आसन्) सन्ति (अध्यात्मम्) आत्मानं शरीरमधिकृत्य वर्तमानम्। शरीरे अवस्थितम् (आसीत्) अस्ति (द्विषतः) शत्रोः (आदत्ते) गृह्णाति ॥

यः स्तुवते, तेन रात्रिः पञ्चदशस्तोत्रा, तेनोभे पञ्चदशस्तोत्रे भवतः, तेन ते समावद्भाजौ भवतः । परिमितं स्तुवन्त्यपरिमितमनुशंसन्ति, परिमितं भूतमपरिमितं भव्यमपरिमितान्येवावरुन्ध्यादित्यतिशंसन्ति । स्तोममति वै प्रजास्यात्मानमति पशवः । तद्यदेवास्यात्या[1]त्मानन्तदेवास्यैतेनाप्यायन्ति । अथो द्वयं वा इदं सर्वं स्नेहश्चैव तत्तेजश्च । अथ तदहोरात्राभ्यामाप्तं[2] स्नेहतेजसोराप्त्यै । गायत्रीं स्तोत्रियानुरूपं शंसन्ति, तेजो वै गायत्री, तमः पाप्मा, रात्रिस्तेन तेजसा तमः पाप्मानन्तरन्ति पुनरादाय[3], शंसन्ति । एवं हि सामगाः स्तुवते, यथास्तुतमनुशस्तं भवति । न हि तत् स्तुतं यन्नानुशस्तम् । तदाहुः, अथ कस्मादुत्तमात् प्रतीहारादाहूय साम्ना शस्त्रमुपसन्तन्वन्तीति ॥ ३ ॥

कण्डिका ३ ॥ अतिरात्र यज्ञ में पवमान आदि स्तोत्रों का विचार ॥

(पवमानवत् अहः इति आहुः, रात्रिः पवमानवती न, कथम् उभे पवमानवती भवतः, केन ते समावद्भाजौ भवतः इति) वे [ब्रह्मवादी] कहते हैं दिन [यज्ञ] पवमान स्तोत्र वाला है, और रात्रि [यज्ञ] पवमान स्तोत्र वाली नहीं है, कैसे दोनों [दिन और रात] पवमान स्तोत्र वाले होते हैं और किस कारण से वे दोनों एक से भाग वाले होते हैं । [इसका समाधान] (इन्द्राय मद्वने सुतम्. इदं वसो सुतमन्धः, इदं हि अन्वोजसा सुतम् इति—यत् एव स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेन उभे पवमानवती भवतः, तेन ते समावद्भाजौ भवतः) इन्द्राय मद्वने सुतम्·····ऋ० ८ । ९२ । १९, [सायणभाष्य ८१] । साम० उ० २ । ७ । ४ । इदं वसो सुतम् अन्धः·····ऋ० ८ । २ । १, सा० पू० २ । ३ । १०, इदं हि अनु ओजसा सुतम्·····ऋ० ३ । ५१ । १०, सा० पू० २ । ८ । १, इन [तीन मन्त्रों] से वे [उद्गाता लोग] स्तोत्र पढ़ते हैं और [होता लोग] शस्त्र पढ़ते हैं, इससे रात्रि पवमान स्तोत्र वाली है [क्योंकि तीनों मन्त्रों में सुत—निचोड़ा गया सोम—शब्द पवमानवाची है], इस से दोनों पवमान स्तोत्र वाले हैं, इस कारण से वे दोनों एकसे भाग वाले हैं ॥

(पञ्चदश स्तोत्रम् अहः इति आहुः रात्रिः पञ्चदश स्तोत्रा न, कथम् उभे पञ्चदश स्तोत्रे भवतः, केन ते समावद्भाजौ भवतः इति) वे [ब्रह्मवादी] कहते

३—(पवमानवत्) पवमानस्तोत्रयुक्तम् (उभे) अहोरात्रे (समावद्भाजौ) समानभागयुक्ते (मद्वने) अन्येभ्योऽपि दृश्यन्ते (पा० ३ । २ । ७५) मदी हर्षे –क्वनिप् । हर्षशीलाय । सुतम्) अभिषुतं सोमम् (वसो) हे वासयितः (अन्धः) अन्नम् (ओजसा) बलेन (स्तुवन्ति) उद्गातारः स्तोत्रं पठन्ति (शंसन्ति) होतारः शस्त्रं पठन्ति (पवमानवती) पवमानस्तोत्रयुक्ता । तथा द्विवचनस्य ईकारादेशः

---

१. पू. सं. "त्या" पाठः नास्ति ॥ २. पू. सं. 'आप्त्यं' इति पाठः ॥

३. पू. सं 'आदायं' इति पाठः ॥ सम्पा० ॥

हैं—दिन पन्द्रह स्तोत्र वाला है, और रात्रि पन्द्रह स्तोत्र वाली नहीं है, कैसे दोनों [दिन और रात्रि] पन्द्रह स्तोत्र वाले हैं और किस कारण से वे दोनों एक से भाग वाले होते हैं। [इस का समाधान] (द्वादश स्तोत्राणि अपिशर्वराणि तिसृभिः देवताभिः, राथन्तरेण सन्धिना अश्विना यः स्तुवते, तेन रात्रिः पञ्चदशस्तोत्रा, तेन उभे पञ्चदशस्तोत्रे भवतः तेन ते समावद्भाजौ भवतः) तीन देवताओं सहित बारह स्तोत्र वाले अपिशर्वरस्तोत्र हैं [आगे विशेषः ४ देखो, उन स्तोत्रों में] रथन्तर साम की ध्वनि वाले सन्धि [प्रातःकालीन स्तोत्र] से दोनों अश्वियों [दिन रात के मेल] को जो [ऋत्विज्] स्तुति करता है, उस से रात पन्द्रह स्तोत्र वाली है उससे वे दोनों पन्द्रह स्तोत्र वाले होते हैं, और उसी कारण से वे दोनों एक से भाग वाले होते हैं। (परिमितं स्तुवन्ति, अपरिमितम् अनुशंसन्ति) परिमित [गिने हुये मन्त्र युक्त] स्तोत्र पढ़ते हैं और अपरिमित [बेगिनती मन्त्र वाला] अनुशस्त्र [स्तोत्र के पीछे पढ़ा गया स्तोत्र] वे पढ़ते हैं। (परिमितं भूतम्, अपरिमितं भव्यम्) परिमित [सीमाबद्ध] भूतकाल है और अपरिमित [सीमा बिना] भविष्यकाल है। (अपरिमितानि एव अवरुन्ध्यात् इति अतिशंसन्ति) अपरिमितों [सीमा बिना फलों] को वह प्राप्त करे, इसलिये वे अति शस्त्र [स्तोत्रों से अधिक शस्त्र] पढ़ते हैं। (स्तोमम् अति, अस्य आत्मानम् अति वै प्रजा पशवः) स्तोत्र से अधिक [जैसे अनुशस्त्र हैं, वैसे] इस के आत्मा से अधिक प्रजा [पुत्र पौत्र आदि] और पशु [गौ, घोड़ा हाथी आदि] होते हैं। (तत् यत् एव अस्य आत्मानम् अति, अस्य तत् एव एतेन आप्याययन्ति) जो वे [प्रजा और पशु] इस के आत्मा से अधिक होते हैं, उसके उनको इस व्यवहार से वे बढ़ाते हैं॥

(अथो द्वयं वै इदं सर्वं स्नेहः च एव तत् तेजः च) फिर यह सब दो है स्नेह और वह तेज ही [रात्रि का रस और दिन का प्रकाश]। (अथ तत् अहोरात्राभ्याम् आप्तम्, स्नेहतेजसोः आप्त्यै) फिर जो कुछ दिन और रात्रि से पाने योग्य है, वह

(वा० पा० ७ । १ । ३९) पवमानवत्यौ[1] (सन्धिना) प्रातःसन्धिना (राथन्तरेण) रथन्तरसामध्वनियुक्तेन (अश्विना) अशूङ् व्याप्तौ–क्वन्, इनिः। अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः अहोरात्रावित्येके––निरु० १२ । १। व्याप्तिमन्तौ। अहोरात्रौ । सूर्याचन्द्रमसौ (परिमितम्) परिमितमन्त्रोपेतम् (अनुशंसन्ति) स्तोत्रपश्चात् शस्त्रं पठन्ति (परिमितम्) सीमाबद्धम् (अपरिमितम्) सीमारहितम् (अवरुन्ध्यात्) प्राप्नुयात् (अतिशंसन्ति) स्तोत्रगतामृक्संख्यामतिलङ्घ्य होतारः शस्त्रं पठन्ति (स्तोमम्) स्तोत्रम् (अति) अतीत्य। उल्लङ्घ्य (प्रजा) पुत्रपौत्रादिरूपा (अस्य) यजमानस्य (स्नेहः) रसः। आर्द्रम् (आप्तम्) प्राप्त-

---

१—यह सिद्धि ठीक नहीं है। यह 'पवमानवती' शब्द को नपुंसकलिङ्ग का द्विवचन मान कर की गई है, पर वस्तुतः यह शब्द स्त्रीलिङ्ग द्विवचन का है। जैसा कि इसके विशेषण 'उभे' शब्द से प्रकट है। यद्यपि ऐसी स्थिति में पवमानवत्यौ बनना चाहिये। पुनरपि 'वाच्छन्दसि' के नियम से पूर्वसवर्ण दीर्घ होकर 'पवमानवती' शब्द साधु सिद्ध होता है॥ सम्पा०॥

[यजमान के] स्नेह और तेज [रस और प्रताप] की प्राप्ति के लिये है। (गायत्रीं स्तोत्रियानुरूपं शंसन्ति) गायत्री छन्द वा मन्त्र] में स्तोत्रिय अनुरूप को वे बोलते हैं। (तेज वै गायत्री, तमः पाप्मा) तेज ही गायत्री है, अन्धकार पाप है। (तेन तेजसा रात्रिः तमः पाप्मानं तरन्ति, पुनः [तेजः] आदाय शंसन्ति) उस [गायत्री रूप] तेज से रात्रि के अन्धकार [समान] पाप को वे पार करते हैं, और फिर [तेज] ग्रहण करके वे बोलते हैं [शस्त्र पढ़ते हैं]। (एवं हि सामगाः स्तुवते यथा स्तुतम् अनुशस्तं भवति) ऐसे ही सामगायक [उद्गाता लोग] स्तोत्र बोलते हैं कि स्तुति के योग्य अनुशस्त्र होवे। (तत् स्तुतं न हि, यत् अनुशस्तं न) वह स्तोत्र नहीं है जिस में अनुशस्त्र न हो। (तत् आहुः, अथ कस्मात् उत्तमात् प्रतीहारात् आहूय साम्ना शस्त्रम् उपसन्तन्वन्ति इति) वे कहते हैं—फिर किसलिये सबसे पिछले प्रतीहार [प्रतिहर्ता के गाने योग्य स्तोत्र] से बोलकर सामगान के साथ शस्त्र को समीप में वे बढ़ाते हैं [इसका उत्तर ऊपर आ चुका है]॥ ३ ॥

भावार्थः अवसर को विचार कर स्तुति करनी योग्य है ॥ ३ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ४। ६ ॥

विशेषः २—(उभ) के स्थान में (उभे) ऐ० ब्रा० से शुद्ध किया गया है ॥

विशेषः ३—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः अर्कमर्चन्तु कारवः—ऋग्० ८। ६२। १९, [सायण भाष्य ८१]। साम० २। ७। ४ ॥ (नः गिरः) हमारी वाणियाँ (मद्वने) हर्षशील (इन्द्राय) इन्द्र [बड़े ऐश्वर्य वाले वीर पुरुष] के लिये (सुतम्) सुत [निचोड़े हुये तत्त्व रस] को (परि स्तोभन्तु) सब ओर से सराहें, और (कारवः) स्तुति करने वाले लोग (अर्कम्) पूजनीय [वीर] को (अर्चन्तु) पूजें ॥

२—इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन् ररिमा ते—ऋग्० ८। २। १, साम० पू० ३। २। १०॥ (वसो) हे वसु ! [वसाने वाले इन्द्र राजन्] (इदम्) इस (सुतम्) सुत [निचोड़े हुये] (अन्धः) अन्न [तत्त्वरस] को (सुपूर्णम् उदरम्) भले प्रकार भर पेट (पिब) पी, (अनाभयिन्) हे निर्भय ! (ते) तुझे (ररिम) [वह] हम देते हैं ॥

३—इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वस्य गिर्वणः—ऋ० ३। ५१। १०, साम० पू० २। ८। १ ॥ (राधानां पते) हे धनों के स्वामी ! [इन्द्र राजन्] (इदं हि) यह ही (ओजसा) बल के साथ (अनु) निरन्तर (सुतम्) सुत [निचोड़ा गया तत्त्व रस] है, (गिर्वणः) हे स्तुतियों से सेवनीय ! (अस्य) इस [तत्त्वरस] का (तु) (पिब) पान कर ॥

व्यम् (आदाय) गृहीत्वा (सामगाः) उद्गातारः (प्रतीहारात्) प्रति+हृञ् हरणे—घञ् वा दीर्घः। प्रतिहर्त्रा गातव्यात् स्तोमात् ॥

विशेषः ४—बारह स्तोत्र वाले अपिशर्वर छह मन्त्र प्रातः सन्धि में रथन्तर साम की ध्वनि से गाये जाते हैं। छह मन्त्रों के अर्धर्च अर्धर्च करके पाठ करने से बारह हो जाते है [देखो—गो० उ० ६। ८], तीन देवता इस प्रकार हैं—पहिले और दूसरे मन्त्र अग्नि, तीसरे और चौथे उषा तथा पांचवें और छठे अश्विनौ देवता वाले हैं। सामवेद में यह छह मन्त्र एक स्थान पर हैं॥

१, २ अग्निर्देवता॥

१—एना वो अग्निं नमसोर्जो नपातमा हुवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्—ऋग्० ७। १६। १ यजु० १५। ३२, साम० १। २। १३॥ (एना नमसा) इस अन्न वा सत्कार से (वः) तुम्हारे लिये (ऊर्जः नपातम्) पराक्रम के न गिराने वाले, (प्रियम्) प्रिय, (चेतिष्ठम्) अत्यन्त चेताने वाले, (अरतिम्) गति वाले [पुरुषार्थी], (स्वध्वरम्) अच्छे प्रकार हिंसा रहित व्यवहार वाले, (विश्वस्य दूतम्) सबके कार्य साधने वाले, (अमृतम्) न मरने वाले (अग्निम्) अग्नि [अग्नि के समान तेजस्वी विद्वान्] को (आ हुवे) मैं बुलाता हूं॥

२—स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः। सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम्—ऋ० ७। १६। २, यजु० १५। ३३, ३४ भेद से, साम० उ० १। २। १३॥ (सः) वह [अग्नि समान तेजस्वी विद्वान्] (विश्व-भोजसा) संसार के रक्षा करने वाले (अरुषा) तेज से (योजते) युक्त होता है, (स्वाहुतः) अच्छे प्रकार बुलाया गया (सः) वह (दुद्रवत्) शीघ्र पहुँचता है, वह (सुब्रह्मा) सुन्दर अन्न वा धनों वाला वा अच्छे प्रकार चारों वेद जानने वाला, (यज्ञः) संगति योग्य (सुशमी) सुन्दर कर्मों वाला, (जनानाम्) मनुष्यों के लिये (वसूनाम्) धनो के बीच (देवम्) प्रकाशमान (राधः) धन [के समान] है॥

३ ४ उषा देवता॥

३—प्रत्यु अदर्श्यायत्युच्छन्ती दुहिता दिवः। अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी—ऋ० ७। ८१। १, साम० उ० १। २। १४ भेद से॥ (आयती) आती हुई (उच्छन्ती) अन्धकार निकालती हुई (दिवः) सूर्य की (दुहिता) पुत्री [उषा, प्रभात वेला] (उ) निश्चय करके (प्रति अदर्शि) प्रत्यक्ष देखी जाती है, वह (महि तमः) बड़े अन्धकार को (अपो व्ययति) हटा देती है, (सूनरी) सुन्दर नेत्री [अच्छे प्रकार ले चलने वाली वह] (चक्षसे) देखने के लिये (ज्योतिः) ज्योति [उजाला] (कृणोति) करती है॥

४—उदुस्रियाः सृजते सूर्यः सचाँ उद्यन् नक्षत्रमर्चिवत्। तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि—ऋग्० ७। ८१। २, साम० उ० १। २। १४॥ (अर्चिवत्) किरणों वाला (नक्षत्रम्) नक्षत्र, [अर्थात्] (उद्यन्) उदय होता हुआ (सूर्यः) सूर्य (उस्रियाः) किरणों को (सचा) एक साथ ही (उत् सृजते) ऊपर को छोड़ता है। (उषः) हे उषा! [प्रभात वेला] (तव) तेरे (च) और

(सूर्यस्य) सूर्य के (उत्) ही (व्युषि) प्रकाश में (भक्तेन) अपने विभाग वा अन्न से (सं गमेमहि) हम मेल करें ॥

५, ६ अश्विनौ देवते ॥

५—इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना । अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः—ऋग्० ७ । ७४ । १, साम० उ० १ । २ । १५ ॥ (अश्विना) हे अश्वियो ! [दिन रात] (इमाः) यह (दिविष्टयः) प्रकाश चाहने वाली [प्रजायें] (उस्रा वाम्) निवास कराने वाले तुम दोनों को (उ) ही (हवन्ते) बुलाती हैं, (शचीवसू) हे कर्म वा बुद्धि का धन रखने वाले ! (अयम्) यह मैं (वाम्) तुम दोनों को (अवसे) रक्षा के लिये (अह्वे) बुलाता हूं, (हि) क्योंकि (विशंविशम्) प्रजा प्रजा को (गच्छथः) तुम प्राप्त होते हो ॥

६—युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते । अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु—ऋग्० ७ । ७४ । २, साम० उ० २ । । १५ ॥ (नरा) हे नरो ! [नेताओ, वीरो] (युवम्) तुम दोनों (चित्रम्) अद्भुत (भोजनम्) भोजन (ददथुः) धारण करते हो और (सूनृतावते) सुन्दर वेदवाणी वाले पुरुष को (चोदेथाम्) [उसे] भेजते हो, (समनसा) समान मन वाले तुम दोनों (रथम्) रथ [रमणीय स्वरूप] को (अर्वाक्) सामने (नि यच्छतम्) नियम से लाओ और (सोम्यम्) सोम [ओषधियों] के (मधु) मधु [मीठे रस] को (पिबतम्) पीओ ॥

कण्डिका ४ ॥

पुरुषो वै यज्ञः, तस्य शिर एव हविर्धानं, मुखमाहवनीयः, उदरं सदः, अन्तरुक्थानि बाहू माज्जालीयश्चाग्नीध्रीयश्च, या इमा देवतास्ते अन्तःसदः, सन्धिष्ठचाप्रतिष्ठे गार्हपत्यव्रतश्रवणौ इति । अथापरन्तस्य, मन एव ब्रह्मा, प्राण उद्गाता, अपानः प्रस्तोता, व्यानः प्रतिहर्त्ता, वाग्घोता, चक्षुरध्वर्युः, प्रजापतिः सदस्यः, अङ्गानि होत्राशसिनः, आत्मा यजमानः । तद्यदध्वर्युः स्तोत्रमुपाकरोति सोमः पवत इति, चक्षुरेव तत् प्राणैः सन्दधाति । अथ यत् प्रस्तोता ब्रह्माणमामन्त्रयते, ब्रह्मन् स्तोष्यामः प्रशास्तरिति । मनोऽग्रणीर्भवति एतेषां प्राणानां, मनसा हि प्रसूताः स्तोमेन स्तु[1]यामेति, प्राणानेव तत् मनसा सन्दधाति । अथ यद् ब्रह्मा स्तुतेत्युच्चैरनुजानाति, मनो वै ब्रह्मा, मन एव तत् प्राणैः सन्दधाति । अथ यत् प्रस्तोता प्रस्तौति, अपानमेव तत् प्राणैः सन्दधाति । अथ यत् प्रतिहर्त्ता प्रतिहरति, व्यानमेव तदपानैः सन्दधाति । अथ यदुद्गातोद्गायति, समानमेव तत् प्राणैः सन्दधाति । अथ यद्धोता साम्ना शस्त्रमुपसन्तनोति, वाग्वै होता, वाचमेव तत् प्राणैः सन्दधाति । अथ यत् सदस्यो ब्रह्माणमुपासीदति, प्रजापतिर्वै सदस्यः, प्रजापतिमेवाप्नोति । अथ यद्धोत्राशंसिनः साम[2]सन्ततिं कुर्वन्ति, अङ्गानि वै होत्राशंसिन, अङ्गान्येवास्य तत् प्राणैः सन्दधाति । अथ

१. पू. सं. 'स्तयाम' इति पाठः ॥ २. पू. सं. 'सामं सन्तति' इति पाठः ॥ सम्पा० ॥

यद्यजमानः स्तोत्रमुपासीदति, आत्मा वै यजमानः, आत्मानमेवास्य तत् कल्पयति । तस्मान्नैनं बहिर्वेद्यभ्याश्रावयेयुर्नाभ्युदियान्नाभ्यस्तमियान् नाधिष्ण्ये प्रतपेन्नेत् प्राणेभ्य आत्मानमन्तरगादिति ॥ ४ ॥

कण्डिका ४ ॥ यज्ञ का मनुष्य के अङ्गों और ऋत्विजों का प्राणों आदि के दृष्टान्त से वर्णन ॥

(पुरुषः वै यज्ञः) पुरुष [के समान] ही यज्ञ है । (तस्य शिरः एव हविर्धानम्) उस [यज्ञ] का शिर हविर्धान [हविःस्थान] ही है, (मुखम् आहवनीयः) मुख आहवनीय [अग्नि] है, (उदरं सदः) पेट सद [यज्ञशाला] है, (अन्तः उक्थानि) भीतर वाली [आँत] उक्थ [स्तोत्र] हैं, (बाहू मार्जालीयः च आग्नीध्रीयः च) दोनों भुजायें मार्जालीय [शुद्धिस्थान] और आग्नीध्रीय [अग्नि का स्थान] हैं, (याः इमाः देवताः ते अन्तःसदः) जो यह देवता [इन्द्रियां] हैं, वे भीतर बैठने वाले [सभासद] हैं, (सन्धिष्ठ्याप्रतिष्ठे गार्हपत्यव्रतश्रवणौ इति) सन्धिष्ठ्या और प्रतिष्ठा [पैर की गांठ और तलुआ दोनों] गार्हपत्य और व्रत श्रवण [यज्ञाग्नि विशेष] हैं ॥

(अथ तस्य अपरम्) फिर इस [यज्ञ] का दूसरे प्रकार [वर्णन] है । (मन एव ब्रह्मा) मन [यज्ञ के मन समान] ही ब्रह्मा [चारों वेद जानने वाला ऋत्विज्] है, (प्राणः उद्गाता) प्राण उद्गाता है, (अपानः प्रस्तोता) अपान प्रस्तोता है, (व्यानः प्रतिहर्ता) व्यान प्रतिहर्ता है, (वाक् होता) वाक् [जिह्वा] होता है, (चक्षुः अध्वर्युः) नेत्र अध्वर्य्यु है, (प्रजापतिः सदस्यः) प्रजापति [प्रजाओं इन्द्रियों का पालने वाला व्यवहार] सदस्य है, (अङ्गानि होत्राशंसिनः) अङ्ग होत्राशंसी [ऋचा बोलने वाले] लोग हैं, (आत्मा यजमानः) और आत्मा [समान] यजमान है । (सोमः पवते……-इति तत् यत् अध्वर्युः स्तोत्रम् उपाकरोति, चक्षुः एव तत् प्राणैः सन्दधाति) सोमः पवते……१, इस मंत्र से जब वह अध्वर्यु स्तोत्र को विधिपूर्वक आरम्भ करता है, नेत्र को ही उससे प्राणों के साथ वह मिलाता है, (अथ यत् प्रस्तोता ब्रह्माणम् आमन्त्रयते, ब्रह्मन् प्रशास्तःस्तोष्यामः इति) फिर जब प्रस्तोता ब्रह्मा को बुलाता है—हे ब्रह्मन् ! हे प्रशास्ता ! [शासक] हम स्तुति करेंगे । (मनः एतेषां प्राणानाम् अग्रणीः भवति, मनसा हि प्रसूताः स्तोमेन स्तुयाम इति, प्राणान् एव तत् मनसा सन्दधाति)

४—(अन्तः) शरीरमध्ये भवानि । आन्त्राणि (मार्जालीयः) स्थाचतिमृजेरालज्वालत्रालीयचः (उ० १ । ११६) मृजू शौचालङ्कारयोः—आलीयच् । शोधनदेशः (आग्नीध्रीयः) स्वार्थे—छः । आग्नीध्रम् । होतुर्गृहम् । अग्निस्थानम् (देवताः) इन्द्रियाणि (अन्तःसदः) सभासदः (सन्धिष्ठ्याप्रतिष्ठे) पादग्रंथिश्च पादतलं च (वाक्) जिह्वा (प्रजापतिः) इन्द्रियपालकव्यवहारः (उपाकरोति) विधिपूर्वकमारभते (सोमः) सर्वोत्पादकः परमेश्वरः (पवते) शुद्धोऽस्ति (सन्दधाति) संयोजयति (अग्रणीः) अग्र+णीञ् प्रापणे—क्विप् । अग्रनेता । प्रधानः

मन इन प्राणों का अग्रणी [आगे ले चलने वाला प्रधान] होता है, मन से ही प्रेरणा किये हुये हम स्तोत्र के साथ स्तुति करें—इस प्रकार प्राणों को ही उससे मन के साथ वह मिलाता है। (अथ यत् ब्रह्मा स्तुत इति उच्चैः अनुजानाति, मनः वै ब्रह्मा, मन एव तत् प्राणैः सन्दधाति) फिर जब ब्रह्मा ऊंचे स्वर से अनुमति देता है—तुम स्तुति करो--मन ही ब्रह्मा है, मन को ही उससे प्राणों के साथ मिलाता है। (अथ यत् प्रस्तोता प्रस्तौति, अपानम् एव तत् प्राणैः सन्दधाति) फिर जब प्रस्तोता प्रस्तोत्र बोलता है, अपान को ही उससे प्राणों के साथ वह मिलाता है। (अथ यत् प्रतिहर्ता प्रतिहरति, व्यानम् एव तत् अपानैः सन्दधाति) फिर जब प्रतिहर्ता प्रतिहार स्तोत्र बोलता है, व्यान को ही उससे अपानों के साथ वह मिलाता है। (अथ यत् उद्गाता उद्गायति, समानम् एव तत् प्राणैः सन्दधाति) फिर जब उद्गाता [उत्तम गाने वाला] उद्गान [उत्तम साम गान] करता है, समान वायु को ही उससे प्राणों के साथ वह मिलाता है। (अथ यत् होता साम्ना शस्त्रम् उपसन्तनोति, वाक् वै होता, वाचम् एव तत् प्राणैः सन्दधाति) फिर जब होता साम गान के साथ शस्त्र [स्तोत्र] को अच्छे प्रकार फैलाता है, वाक् [जिह्वा] ही होता, [हवन करने वाला] है, जिह्वा को ही उससे प्राणों के साथ वह मिलाता है। (अथ यत् सदस्यः ब्रह्माणम् उपासीदति, प्रजापतिः वै सदस्यः, प्रजापतिम् एव आप्नोति) फिर जब सदस्य ब्रह्मा [मन] के पास बैठता है, प्रजापति [प्रजापालक] ही सदस्य है, प्रजापति [प्रजापालक व्यवहार] को ही वह पाता है। (अथ यत् होत्राशंसिनः सामसन्तर्तिं कुर्वन्ति, अङ्गानि वै होत्राशंसिनः, अस्य अङ्गानि एव तत् प्राणैः सन्दधाति) फिर जब होत्राशंसी लोग साम गान का फैलाव करते हैं, अङ्ग ही होत्राशंसी लोग है, इस [यजमान] के अङ्गों को उससे प्राणों के साथ वह मिलाता है। (अथ यत् यजमानः स्तोत्रम् उपासीदति आत्मा वै यजमानः, अस्य आत्मानम् एव तत् कल्पयति) फिर जब यजमान स्तोत्र को समीप से सेवता है, आत्मा ही यजमान है, इस [यजमान] के ही आत्मा को उससे वह [ऋत्विज्] समर्थ करता है। (तस्मात् एनं बहिर्वेदि न अभ्याश्रावयेयुः) इसलिये इससे [आवश्यकता के लिये बाहिर जाने पर यजमान से] वेदी से बाहिर स्थान में वे [ऋत्विज्] न बातचीत करें, (न अभ्युदियात् न अभ्यस्तमियात्) न [उसको दूसरे स्थान में] सूर्य उदय हो और न अस्त हो [दिन रात यजमान यज्ञ शाला में रहे], (न अधिष्ण्ये प्रतपेत्) वह [यजमान] धिष्ण्य [यज्ञाग्नि] से अन्यत्र न तापे, (प्राणेभ्यः आत्मानम् अन्तः नेत् अगात्) और प्राणों से [अलग पदार्थों को] अपने भीतर न आने दे ॥ ४ ॥

(प्रसूता) प्रेरिताः (स्तुयाम) स्तुतिं कुर्याम (अनुजानाति) अनुमन्यते (सामसन्ततिम्) सामगानविस्तृतिम् (कल्पयति) समर्थयति (बहिर्वेदि) अपपरिबहिरञ्चवः पञ्चम्या (पा० २ । १ । १२) समासान्तोऽव्ययीभावः । वेद्याः सकाशाद् बहिर्देशे (अभ्याश्रावयेयुः) अभ्याश्रावणम् अभितो वार्तालापं कुर्युः (अभ्युदियात्) उदयं प्राप्नुयात् (अस्तमियात्) अस्तं गच्छेत् (अधिष्ण्ये) धिष्ण्यनामकाग्निसकाशाद् भिन्नदेशे (अन्तः) मध्ये (अगात्) प्राप्नुयात् ॥

भावार्थः—जो मनुष्य प्राण अपान आदि प्राणों और जिह्वा नेत्र आदि इन्द्रियों को सावधान रखते हैं, वे अपने मनोरथ सिद्ध करते हैं ॥

विशेषः—प्रतीक वाला मन्त्र अर्थ सहित दिया जाता है ॥

१—सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः । जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः—ऋग्० ९ । ९६ । ५, साम० पू० ६ । ४ । ५ ॥ (सोमः) सोम [सर्वोत्पादक परमेश्वर] (पवते) शुद्ध है [वा व्यापक है], वह (मतीनाम्) मननशील मनुष्यों का (जनिता) उत्पन्न करने वाला, (दिवः) अ... [वा व्यवहार] का (जनिता) उत्पन्न करने वाला, (पृथिव्याः) पृथिवी का (जनिता) उत्पन्न करने वाला, (अग्नेः) अग्नि का (जनिता) उत्पन्न करने वाला, (सूर्यस्य) सूर्य का (जनिता) उत्पन्न करने वाला, (इन्द्रस्य) बिजुली [वा ऐश्वर्य] का (जनिता) उत्पन्न करने वाला (उत) और (विष्णोः) विष्णु [व्यापक वायु आदि] का (जनिता) उत्पन्न करने वाला है ॥

कण्डिका ५ ॥

प्रथमेषु पर्य्यायेषु स्तुवते, प्रथमेषु पदेषु निनर्दयन्ति, प्रथमरात्रादेव तदसुरान्निर्घ्नन्ति । मध्यमेषु पर्य्यायेषु स्तुवते, मध्यमेषु पदेषु निनर्दयन्ति, मध्यमरात्रादेव तदसुरान्निर्घ्नन्ति । उत्तमेषु पर्य्यायेषु स्तुवते, उत्तमेषु पदे[1]षु निनर्दयन्ति, उत्तमरात्रादेव तदसुरान्निर्घ्नन्ति । तद्यथाभ्याघारात् पुनः पुनः पाप्मानं निर्हरन्त्येवमेवैतत् स्तोत्रियानुरूपाभ्यामहोरात्राभ्यामेव तदसुरान्निर्घ्नन्ति । गायत्रीं शंसन्ति, तेजो वै ब्रह्मवर्च्चसं गायत्री, तेज एवास्मै तत् ब्रह्मवर्चसं यजमाने दधति । गायत्री [गायत्री] शस्त्वा जगतीं शंसन्ति, ब्रह्म ह वै जगती, ब्रह्मणैवास्मै तद् ब्रह्मवर्च्चसं यजमाने दधति । व्याह्वयन्ते गायत्रीश्च जगतीश्चान्तरेण, छन्दांस्येव तं नानावीर्य्याणि कुर्वन्ति । जगतीः शस्त्वा त्रिष्टुभः शंसन्ति पशवो वै जगती, पशूनेव तत् त्रिष्टुभः परिदधति । बलं वै वीर्य्यं त्रिष्टुप्, बलमेव तद्वीर्य्येऽन्ततः प्रतिष्ठापयति । अन्धस्वत्यो मद्वत्यः सुतवत्यः पीतवत्यस्त्रिष्टुभो याज्याः समृद्धा सुलक्षणाः, एतद्वै रात्रीरूपं जागृयात् । रात्रि यावदु ह वै न वा स्तुवते न वा शस्यते, तावदीश्वरा असुररक्षांसि च यज्ञमनुवनयन्ति । तस्मादाहवनीयं समिधमाग्नीध्रीयं गार्हपत्यं धिष्ण्यं समुज्ज्वलयते । अतिभाषयेरन् ज्वलयेरन् प्रकाशमिव वै तस्यादारे भिन्नं सुवीरंस्तान् हातःश्रेष्ठो वा इति पाप्मा नाभिवृक्णोति । ते तमःपाप्मानमपाघ्नते ते तमःपाप्मानमपाघ्नते ॥ ५ ॥

कण्डिका ५ ॥ यज्ञ के पर्य्यायों में स्तोत्रों और शस्त्रों के प्रयोग ॥

(प्रथमेषु पर्यायेषु स्तुवते, प्रथमेषु पदेषु निनर्दयन्ति, प्रथमरात्रात् एव तत् असुरान् निर्घ्नन्ति) पहिले पर्य्यायो में [क० २] वे स्तोत्र पढ़ते हैं, पहिले पदों में ऊँचे बोलते हैं, रात्रि के प्रथम भाग से ही तब असुरों को निकाल मारते हैं । (मध्यमेषु पर्यायेषु

५—(स्तुवते) स्तुवन्ति (निनर्दयन्ति) उच्चैः शब्दयन्ति (निर्घ्नन्ति)

१. पू. सं. "पदेषु" इति पाठः नास्ति ॥ सम्पा० ॥

स्तुवते, मध्यमेषु पदेषु निनर्दयन्ति, मध्यमरात्रात् एव तत् असुरान् निर्घ्नन्ति) मध्यम पर्य्यायों में वे स्तोत्र पढ़ते हैं, मध्यम पदों में ऊँचे बोलते हैं, रात्रि के मध्य से ही तब असुरों को निकाल मारते हैं। (उत्तमेषु पर्यायेषु स्तुवते, उत्तमेषु पदेषु निनर्दयन्ति, उत्तमरात्रात् एव तत् असुरान् निर्घ्नन्ति) पिछले पर्य्यायों में वे स्तोत्र पढ़ते हैं, पिछले पदों में ऊँचे बोलते हैं, रात्रि के पिछले भाग से ही तब असुरों को निकाल मारते हैं। (तत् यथा अभ्याधारात् पुनः पुनः पाप्मानं निर्हरन्ति, एवम् एव एतत्, स्तोत्रियानुरूपाभ्याम् अहोरात्राभ्याम् एव तत् असुरान् निर्घ्नन्ति) सो जैसे बड़े प्रकाश से बार बार पाप को निकाल देते हैं, वैसे ही यह है, स्तोत्रिय और अनुरूप [विषय के सदृश स्तोत्र] के द्वारा दिन और रात से ही तब से असुरों का निकाल मारते हैं॥

(गायत्रीं शंसन्ति, ब्रह्मवर्चसं तेजः वै गायत्री, ब्रह्मवर्चसं तेजः एव अस्मै तत् यजमाने दधति) गायत्री [गायत्री मन्त्र और छन्द] को वे पढ़ते हैं, ब्रह्मवर्चस तेज [वेद पढ़ने से पाया हुआ तेज] ही गायत्री है, ब्रह्मवर्चस तेज को ही इस [जगत् के] हित के लिए तब यजमान में वे धारण करते हैं। (गायत्री [गायत्रीं] शस्त्वा जगतीं शंसन्ति, ब्रह्म ह वै जगती, ब्रह्मणा एव अस्मै तत् ब्रह्मवर्चसं यजमाने दधति) गायत्री बोलकर जगती [जगती छन्द वा जगत् उपकारिका ऋचा] वे बोलते हैं, ब्रह्म [वेद ज्ञान] ही जगती है, ब्रह्म [वेदज्ञान] से ही इस [जगत्] के हित के लिए तब ब्रह्मवर्चस् को यजमान में वे धारण करते हैं। (गायत्रीः च जगतीः च अन्तरेण व्याह्वयन्ते, छन्दांसि एव तं नानावीर्याणि कुर्वन्ति) गायत्री छन्दों और जगती छन्दों को अलग अलग वे विविध प्रकार बोलते हैं, छन्द ही उस [यजमान] में बहुत से सामर्थ्य करते हैं। (जगतीः शस्त्वा त्रिष्टुभः शंसन्ति, पशवः वै जगती, पशून् एव तत् त्रिष्टुभः परिदधति) जगती छन्दों को बोलकर वे त्रिष्टुभों को बोलते हैं, पशु ही जगती [जगत् उपकारिका शक्ति] हैं, पशुओं को ही तब त्रिष्टुभ् धारण करते हैं। (बलं वै वीर्य्यं त्रिष्टुप्, बलम् एव तत् वीर्ये अन्ततः प्रतिष्ठापयति) बल वीर्य ही त्रिष्टुप् [तीन कर्म, उपासना और ज्ञान का ठहराव] है, बल को ही तब वीर्य [धातु पुष्टि] में अन्त में वह स्थापित करता है। (अन्धस्वत्यः, मद्वत्यः, सुतवत्यः, पीतवत्यः त्रिष्टुभः याज्याः समृद्धाः सुलक्षणाः, एतत् वै रात्रीरूपं जागृयात्) अन्धस्वती [अन्धस्, अन्न शब्द वाली], मद्वती [मद अर्थात् हर्ष शब्द वाली]; सुतवती [सुत, निचोड़े हुए सोम शब्द वाली] पीतवती [पीत, पीये हुये सोम रस शब्द वाली], त्रिष्टुभ ऋचायें यज्ञ करने योग्य, समृद्ध और सुन्दर लक्षण वाली हैं, इनसे ही रात्रि रूप [अन्धकार] में वह जागता रहे। (रात्रि यावत् उ ह वै न वा स्तुवते,

---

निःसार्यं नाशयन्ति (अभ्याधारात्) अभि+आ+धृ क्षरणे दीप्तौ च—घञ्। सर्वतः प्रकाशात् (निर्हरन्ति) नाशयन्ति (ब्रह्मवर्चसम्) वेदाध्ययनजन्यतेजः (दधति) धारयन्ति (ब्रह्म) वेदज्ञानम् (व्याह्वयन्ते) विविधमाह्वयन्ति कथयन्ति (नानावीर्याणि) विविधवीरकर्माणि (वीर्ये) धातुपुष्टौ (सुलक्षणाः) सुलक्षणयुक्ताः (जागृयात्) प्रबुध्येत् (ईश्वरा) शेर्लुक्। ईश्वराणि समर्थानि (अनुवनयन्ति) वन हिंसायाम्। निरन्तरं नाशयन्ति (सम्) सम्भूय (उ) एव (तस्य) दृश्यमानस्य सूर्यस्य (आदारे) आदारयन्ति शत्रून् यत्र। आ+दृ विदारणे—

न वा शस्यते, तावत् ईश्वरा असुररक्षासि च यज्ञम् अनुवनयन्ति) रात्रि में जब ही वह न तो स्तोत्र पढ़ता है और न शस्त्र पढ़ता है, तब समर्थ होते हुये असुर और राक्षस यज्ञ को नष्ट कर डालते हैं। (तस्मात् आहवनीयं समिधम् आग्नीध्रीयं गार्हपत्यं धिष्ण्यं सम् उज्ज्वलयते) इसलिए आहवनीय, समिध्, आग्नीध्रीय, गार्हपत्य और धिष्ण्य [पांच अग्नियों] को ठीक ठीक ही जलाता रहे। (तस्य प्रकाशम् इव वै आदारे भिन्नं सुवीरम् अतिभाषयेरन्, ज्वलयेरन्, स्तान् ह्रातः श्रेष्ठः वै इति, पाप्मा न अभिवृक्णोति) उस [सूर्य] के प्रकाश के समान ही संग्राम मे प्रफुल्ल बड़े वीर पुरुष को आदर से बोलें और प्रकाशित करें—यह अव्याकुल [दृढ स्वभाव], गतिमान् [पुरुषार्थी] और श्रेष्ठ है—[उसको] पाप नहीं पकड़ता है। (ते तमः पाप्मानम् अपाघ्नते ते तमः पाप्मानम् अपाघ्नते) वे [शूर लोग] अन्धकार रूप पाप को नष्ट कर देते हैं वे [शूर लोग] अन्धकार रूप पाप को नष्ट कर देते हैं [अवश्य ही नष्ट करते हैं] ॥ ५ ॥

भावार्थः—जैसे संग्राम के पड़ाव में मित्र और शत्रु की पहिचान के लिए विशेष बोलियां बोली जाती हैं, वैसे ही यज्ञ में सिद्धि पाने और विघ्नों के हटाने के लिये विशेष स्तोत्र और शस्त्र बोले जाते हैं ॥ ५ ॥

कण्डिका ६ ॥

विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन्स त्वष्टा हतपुत्रोऽभिचरणीयमपेन्द्रं सोममाहरत्। तस्मेन्द्रो जज्ञिरे। स संस्कृत्वा प्रासहा सोममपिबन् स विष्टद् व्यार्छत्। तस्मात् सोमो नानुपहूतेन पातव्यः। सोमपीथोऽस्य द्व्यृद्धिको भवति। तस्य मुखात् प्राणेभ्यः श्रीर्यशांस्यूर्ध्वान्युदक्रामन्। तानि पशून् प्राविशन्। तस्मात् पशवो यशो यशो ह भवति, य एवं वेद। ततोऽस्मा एतदश्विनौ च सरस्वती च यज्ञं समभरन् सौत्रामणिं भैषज्याय। तयेन्द्रमभ्यषिञ्चन्। ततो वै स देवानां श्रेष्ठोऽभवत्। श्रेष्ठः स्वानां चान्येषां च भवति, य एवं वेद यश्चैवं विद्वान् सौत्रामण्याभिषिच्यते ॥ ६ ॥

कण्डिका ६ ॥ आख्यायिका—त्वष्टा का इन्द्र से सोमरस छीनना और सौत्रामणी इष्टि ॥

(इन्द्रः विश्वरूपं त्वाष्ट्रं वै अहन्) इन्द्र [सूर्य] ने विश्वरूप [संसार में व्यापक] त्वाष्ट्र [त्वष्ट्रा प्रकाशमान सूर्य के पुत्र मेघ वा अन्धकार] को मार डाला। (हतपुत्रः सः त्वष्टा अभिचरणीयम् इन्द्रम् सोमम् अप आहरत्) मरे पुत्र वाले उस त्वष्टा ने सब प्रकार

घञ्। संग्रामे (भिन्नम्) प्रस्फुटितम्। विकसितम् (स्तान्) ष्टम अवैक्लव्ये—क्विप्। अनुनासिकस्य क्विझलोः क्ङिति (पा० ६ । ४ । १५) उपधादीर्घः। मो नो धातोः (पा० ८ । २ । ६४) मस्य नः। अव्याकुलः। दृढस्वभावः (ह्रातः) हसिमृग्रिण्वा० (उ० ३ । ८६) ओहाङ् गतौ—तन्। गतिमान् (अभिवृक्णोति) वृक आदाने—लट्। स्वागणदित्वमार्षम्। अभिवर्कते। अभिगृह्णाति ॥

६—(विश्वरूपम्) सर्वजगद्व्यापकरूपयुक्तम् (त्वष्टारम्) नप्तृनेष्टृ-त्वष्टृहोतृपोतृ० (उ० २ । ९५) त्विष दीप्तौ वा त्वक्षू तनूकरणे—तृच्, इकारस्य

प्राप्ति योग्य इन्द्र [सूर्य] से सोम रस [जल] को छीन लिया । (इन्द्रः तस्य जज्ञिरे) इन्द्र ने उसे जान लिया । (सः संस्कृत्वा प्रासहा सोमम् अपिबत्, सः विष्टद् व्यर्छत्) उस [त्वष्टा] ने शुद्ध करके बलात्कार सोमरस पी लिया, और वह [सोम को] प्रवेश करता हुआ मूर्छित हो गया । (तस्मात् सोमः अनुपहूतेन न पातव्यः) इसलिये सोमरस [यज्ञ में ओषधियों का तत्त्वरस] बिना बुलाये पुरुष को न पीना चाहिये । (अस्य सोमपीथः द्व्यृद्धिकः भवति) इस [यजमान] का सोमरस पान दो ऋद्धि वाला होता है । (तस्य मुखात् प्राणेभ्यः श्रीः यशांसि ऊर्ध्वानि उदक्रामन्) उसके मुख और प्राणों से श्री और अनेक यश [दोनों ऋद्धियाँ] ऊंचे चढ़ते हैं । (तानि पशून् प्राविशन्) वे [श्री और यश] पशुओं में प्रवेश करते हैं । (तस्मात् पशवः यशो यशः ह [तस्मै] भवति, यः एवं वेद) इसलिये पशु [सब प्राणी] बहुत यश रूप [उसके लिये] होते हैं, जो ऐसा विद्वान् है । (ततः अस्मै एतत् अश्विनौ च सरस्वती च सौत्रामणि यज्ञं भैषज्याय सम् अभरन्) इसी से इस [यजमान] के लिये इस प्रकार दोनों अश्वी [दिन रात वा सूर्य चन्द्रमा] और सरस्वती [विज्ञान वाली वेद विद्या] सौत्रामणी [अच्छे प्रकार रक्षक इन्द्र परमात्मा की भक्ति युक्त क्रिया] यज्ञ को औषध के लिये यथावत् पुष्ट करते हैं । (तया इन्द्रम् अभ्यषिञ्चन्) उस [सौत्रामणी इष्टि] से इन्द्र [बड़े ऐश्वर्य वाले पुरुष को उन्होंने अभिषेक किया है । (ततः वै सः देवानां श्रेष्ठः अभवत्) इसलिये ही वह देवों [विद्वानों] में श्रेष्ठ हुआ है । (स्वानां च अन्येषां च श्रेष्ठः भवति, यः एवं वेद, यः च एवं विद्वान् सौत्रामण्या अभिषिञ्चते) वह अपने और दूसरे लोगों में श्रेष्ठ होता है, जो ऐसा जानता है, और जो ऐसा विद्वान् सौत्रामणी [बड़े रक्षक परमात्मा की भक्ति वाली इष्टि] से अभिषेक किया जाता है ॥ ६ ॥

भावार्थः—जैसे सूर्य वृत्रासुर अर्थात् मेघ को हटाकर पृथिवी के जल को खींचकर समृद्ध होता है, वैसे ही वीर पुरुष शत्रुओं को मारकर संसार में यश पाता है ॥ ६ ॥

विशेषः—इस आख्या का मूल वेदमन्त्र है, जो अर्थ सहित लिखा जाता है—

अकारः । त्वष्ट-अण् । त्वष्टुः सूर्यस्य पुत्रम् इव मेघम् अन्धकारं वा (इन्द्रः) सूर्यः (अहन्) हतवान् (त्वष्टा) सूर्यः (अभिचरणीयम्) अभितः प्रापणीयम् (सोमम्) रसम् । मेघजलम् (जज्ञिरे) ज्ञा अवबोधने—लिट् । बहुवचनमार्षम् । जज्ञे । ज्ञातवान् (संस्कृत्वा) संस्कृत्य । संशोध्य (प्रासहा) प्रसह्य । बलात्कारेण (विष्टत्) विष्लृ व्याप्तौ वा विश प्रवेशे—क्तः । विष्ट इति नामधातुः, ततः शतृः । विष्टं प्रवेशं कुर्वन् । (व्यार्छत्) वि+ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु—लङ्, मूर्छामगात् (द्व्यृद्धिकः) द्विर्धासम्पत्तियुक्तः (यशो यशः) बहुकीर्तिरूपम् (अश्विनौ) गौ० उ० ५ । ३ । अहोरात्रौ । सूर्याचन्द्रमसौ (सरस्वती) विज्ञानवती वेदविद्या (सौत्रामणिम्) सर्वधातुभ्यो मनिन् (उ० ४ । १४५) सु+त्रैङ् पालने—मनिन् । साऽस्य देवता (पा० ४ । २ । २४) सुत्रामन्—अण्, टिलोपाभावः स्त्रियां ङीप् । ईकारस्य ह्रस्वत्वमार्षम् । महाराजकयोग्यां भक्तिं पूजां वा । इष्टिविशेषम् (स्वानाम्) ज्ञातीनां बन्धूनाम् ॥

अहन् वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन । स्कन्धांसीव कुलिशेना विवृक्णाऽहिः शयत उपपृक् पृथिव्याः—ऋ० १ । ३२ । ५ ॥ (इन्द्रः) इन्द्र [सूर्य वा बिजुली] ने (वृत्रतरम्) अत्यन्त ढक लेने वाले (वृत्रम्) वृत्र [रोकने वाले मेघ] को (महता वधेन) बड़े हथियार, (वज्रेण) वज्र [कुल्हाड़े के समान छेदने वाले किरण समूह] से (व्यंसम्) बिना कन्धे करके (अहन्) मार डाला (कुलिशेन) कुल्हाड़े से (विवृक्णा) काट डाले गये (स्कन्धांसि इव) वृक्ष दण्डों के समान (अहिः अहि [सब ओर चलता हुआ मेघ] (पृथिव्याः) पृथिवी से (उपपृक्) छूता हुआ (शयते) सोता है [अर्थात् सूर्य की किरणों से मेघ छिन्न भिन्न होकर पृथिवी पर बरसता है] ॥

कण्डिका ७ ॥

अथ साम गायति ब्रह्मा, क्षत्रं वै साम, क्षत्रेणैवैनं तदभिषिञ्चति । अथो साम्राज्यं वै साम, साम्राज्येनैवैनं तत् साम्राज्यं गमयति । अथो सर्वेषां वा एष वेदानां रसः, यत् साम, सर्वेषामेव तद्वेदानां रसेनाभिषिञ्चति । बृहत्यां गायन्ति, बृहत्यां वा असावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठितस्तपति । ऐन्द्र्यां बृहत्यां गायति । ऐन्द्रो वा एष यज्ञक्रतुर्यत् सौत्रामणिः । ऐन्द्रायतन एष एतर्हि यो यजते, स्व एवैनं तदायतने प्रीणाति । अथ कस्मात् संश्यानानि नाम, एतैर्वै सामभिर्देवा इन्द्रमिन्द्रियेण वीर्य्येण समश्यन्, तथैवैतद्यजमाना एतैरेव सामभिरिन्द्रियेणैव वीर्य्येण संश्यन्ति । संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति सामानि भवन्ति । एष्वेवैनं लोकेषु प्रतिष्ठापयति । चतुर्निधनं भवति, चतस्रो वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते । अथो चतुष्पादः पशवः, पशूनामाप्त्यै । तदाहुः, यदेतत् साम गीयते, अथ क्वैतस्य साम्न उक्थं, का प्रतिष्ठा । त्रयो देवा एकादशेत्याहुः, एतद्वा एतस्य साम्न उक्थमेषा प्रतिष्ठा । त्रयस्त्रिंशं ग्रहं गृह्णाति, साम्नः प्रतिष्ठायै प्रतिष्ठायै ॥ ७ ॥

कण्डिका ७ ।। साम सब वेदों का रस है, सौत्रामणी यज्ञ में साम गान ॥

(अथ ब्रह्मा साम गायति) फिर ब्रह्मा [चतुर्वेदी ऋत्विज्] साम [वेदों के सार, मोक्षज्ञान] को गाता है । (क्षत्रं वै साम, क्षत्रेण एव एनम् तत् अभिषिञ्चति) राज्य ही साम [मोक्ष ज्ञान] है, राज्य के साथ ही इस [यजमान] को तब वह अभिषेक करता है । (अथो साम्राज्यं वै साम, साम्राज्येन एव एनं तत् साम्राज्यं गमयति) फिर साम्राज्य [चक्रवर्ती राज्य] ही साम गान है, साम्राज्य [साम्राज्य के समान साम-गान] के साथ ही इस [यजमान] को तब साम्राज्य वह पहुँचाता है । (अथो सर्वेषां वेदानां वै एषः रसः, यत् साम) फिर सब वेदों का ही यह रस है, जो साम गान है ।

७—(साम) मोक्षज्ञानम् (क्षत्रम्) राज्यम् (साम्राज्यम्) सम्राज्—ष्यञ् । चक्रवर्तिराज्यम् । सार्वभौमराज्यम् (गमयति) प्रापयति (रसः) सारः

(सर्वेषां वेदानाम् एव रसेन तत् अभिषिञ्चति) सब ही वेदों के रस से तब वह [यजमान को] अभिषेक करता है । (बृहत्यां गायन्ति) बृहती [बड़े विषय वाली वेद विद्या वा बृहती छन्द] में वे [साम] गाते हैं । (बृहत्यां वै असौ आदित्यः श्रियां प्रतिष्ठायाम् प्रतिष्ठितः तपति) बृहती [बड़े विषय वाली वेद वाणी] में ही वह चमकने वाला सूर्य शोभा और प्रतिष्ठा में ठहरा हुआ तपता है । (ऐन्द्र्यां बृहत्यां गायति) इन्द्र [परमेश्वर] देवता वाली बृहती [वेदवाणी] में वह [साम] गाता है । (ऐन्द्रः वै एषः यज्ञक्रतुः यत् सौत्रामणिः) इन्द्र देवता वाला ही यह यज्ञ कर्म है जो सौत्रामणी [सुत्रामा बड़े रक्षक इन्द्र परमेश्वर देवता वाली इष्टि] है । (ऐन्द्रायतनः एषः, एतर्हि यः यजते, स्वे एव आयतने एनं तत् प्रीणाति) इन्द्र देवता वाले आश्रय से युक्त यह [यजमान] है जो अब यज्ञ करता है, अपने ही आश्रय में इस [यजमान] को तब वह [इन्द्र] प्रसन्न करता है ॥

(अथ कस्मात् संश्यानानि नाम, एतैः वै सामभिः देवाः इन्द्रम् इन्द्रियेण वीर्येण समश्यन्, तथा एव एतत् यजमानाः एतैः एव सामभिः इन्द्रियेण एव वीर्येण संश्यन्ति) फिर किसलिये संश्यान [आपस में मिले हुये साम ज्ञान] प्रसिद्ध हैं । [उत्तर] इन ही सामज्ञानों से विद्वानों ने इन्द्र [बड़े ऐश्वर्य वाले जीव] को इन्द्रपन [ऐश्वर्य] और वीर्य [पराक्रम] के साथ अच्छे प्रकार तीक्ष्ण किया है वैसे ही अब यजमानों को इन ही साम ज्ञानों से ऐश्वर्य और पराक्रम के साथ वे सब प्रकार तीक्ष्ण करते हैं । (संश्रवसे विश्रवसे सत्यश्रवसे श्रवसे इति सामानि भवन्ति) संश्रव [अच्छे प्रकार अन्न, धन और यश] के लिये, विश्रव [विविध अन्न धन और यश] के लिये, सत्यश्रव [सत्य अन्न धन और यश] के लिये और श्रव [सामान्यतः अन्न धन और यश] के लिये यह सामज्ञान होते हैं । (एषु एव लोकेषु एनं प्रतिष्ठापयति) इन ही लोकों में इस [यजमान] को वह प्रतिष्ठित करता है । (चतुः निधनं भवति, चतस्रः वै दिशः, दिक्षु तत् प्रतितिष्ठन्ते) चार बार निधन [अन्तिम यज्ञ कर्म] होता है, चार ही दिशायें हैं, दिशाओं में तब वे प्रतिष्ठा पाते हैं । (अथो चतुष्पादः पशवः, पशूनाम् आप्त्यै) फिर चार पांव वाले पशु हैं, पशुओं की प्राप्ति के लिये [साम है] ॥

(बृहत्याम्) बृहद्विषयायां वेदवाण्याम् (सौत्रामणिः) सर्वधातुभ्यो मनिन् (उ० ४ । १४५) सु+त्रैङ् पालने–मनिन् । साऽस्य देवता (पा० ४ । २ । २४) सुत्रामन्—अण्, टिलोपो न, ङीप्, अत्र पुंलिङ्गः । सौत्रामणी । महारक्षकयोग्या भक्तिः । इष्टिविशेषः (ऐन्द्रायतनः) इन्द्रदेवताकस्याश्रययुक्तः (संश्यानानि) सम+श्यैङ् गतौ–क्तः । संगतानि सामानि (समश्यन्) शो तनूकरणे—लङ् । सम्यक् तीक्ष्णीकृतवन्तः (यजमानाः) यजमानान् (संश्यन्ति) सम्यक् तीक्ष्णीकुर्वन्ति (संश्रवसे) श्रु श्रवणे—असुन् । श्रवः=अन्नम्—निघ० २ । ७, धनम्—२ । १० । सम्यग् अन्नस्य धनस्य यशसो वा प्राप्तये (चतुः) चतुर्वारम् (निधनम्) [illegible]कर्म (साम्नः) सामन्

(तत्, आहुः, यत् एतत् साम गीयते, अथ क्व एतस्य साम्नः उक्थम्, का प्रतिष्ठा) फिर वे कहते हैं—जो यह साम गाया जाता है, तब कहां इस साम का उक्थ है और क्या प्रतिष्ठा है। (त्रयः देवाः एकादश इति, आहुः, एतत् वै एतस्य साम्नः उक्थम्, एषा प्रतिष्ठा) [उत्तर] तीन [तीन बार] ग्यारह [तेंतीस] देवता हैं [देखो गो० उ० २ । १३]—ऐसा कहते हैं, यह ही इस साम का उक्थ है, यही प्रतिष्ठा है। (त्रयस्त्रिंशं ग्रहं साम्नः प्रतिष्ठायै प्रतिष्ठायै गृह्णाति) तेंतीस अवयव वाला पात्र वह [यजमान] साम से प्रतिष्ठा के लिये, प्रतिष्ठा के लिये ग्रहण करता है ॥ ७ ॥

भावार्थः—बुद्धिमान् चतुर्वेदी ब्रह्मा के वेदज्ञान के उपदेश से मनुष्य चक्रवर्ती राज्य आदि पाकर संसार में प्रतिष्ठा बढ़ाता है ॥ ७ ॥

कण्डिका ८ ॥

प्रजापतिरकामयत, वाजमाप्नुयाम्, स्वर्गं लोकमिति। स एतं वाजपेयमपश्यत्। वाजपेयो वा एषः, य एष तपति, वाजमेतेन यजमानः स्वर्गं लोकमाप्नोति। शुक्रवत्यो ज्योतिष्मत्यः प्रातःसवने भवन्ति, तेजो ब्रह्मवर्चसं ताभिराप्नोति। वाजवत्यो माध्यन्दिने सवने स्वर्गस्य लोकस्य समष्ट्यै। अन्नवत्यो गणवत्यः पशुमत्यस्तृतीयसवने भवन्ति, भूमानं ताभिराप्नोति। सर्वः सप्तदशो भवति, प्रजापतिर्वै सप्तदशः, प्रजापतिमेवाप्नोति। हिरण्यस्रज ऋत्विजो भवन्ति, महस एव तद्रूपं क्रियते। एष मेऽमुष्मिंल्लोके प्रकाशोऽसदिति, ज्योतिर्वै हिरण्यं, ज्योतिषैवैनमन्तर्दधत्यार्जि धावन्ति यजमानमुज्जापयन्ति, नाके रोहति, स महसे रोहति, विश्वमहसे रोहति, सर्वमहसे रोहति, मनुष्यलोकादेवैनमन्तर्दधति। देवस्य सवितुः सवं स्वर्गं लोकं वर्षिष्ठं नाकं रोहेयमिति ब्रह्मा रथचक्रं सर्पति, सवितृप्रसूत एवैनं तत् समर्पयति। अथो प्रजापतिर्वै ब्रह्मा, प्रजापतिमेवैनं वज्रादधिप्रसुवति, नाकस्योज्जित्यै वाजिनां सन्तत्यै। वाजिसामाभिगायति, वाजिमान् भवति। वाजो वै स्वर्गो लोकः, स्वर्गमेव तं लोकं रोहति। विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति, स्वर्गमेव तं लोकं रूढ्वा ब्रध्नस्य विष्टपमतिक्रामत्यतिक्रामति ॥ ८ ॥

कण्डिका ८ ॥ आख्यायिका—वाजपेय यज्ञ का वर्णन ॥

(प्रजापतिः अकामयत, वाजम् आप्नुयाम्, स्वर्गं लोकम् इति) प्रजापति [प्रजापालक चतुर्वेदी ऋत्विज्] ने चाहा—मैं वाज [ज्ञान वा बल] प्राप्त करूँ, और स्वर्गलोक पाऊँ। (सः एतं वाजपेयम् अपश्यत्) उसने इस वाजपेय [ज्ञान रक्षक यज्ञ] को देखा। (वाजपेयः वै एषः, यः एषः तपति) वाजपेय ही यह है जो यह तपता है [हवन

—अण्, सामयुक्तस्य (त्रयस्त्रिंशम्) त्रयस्त्रिंशावयवोपेतम् (ग्रहम्) पात्रम् (साम्नः) सामसकाशात् ॥

८—(एति) इयात्। प्राप्नुयात् (वाजपेयम्) वज गतौ—घञ्। अचो यत्

किया जाता है]। (एतेन यजमानः वाजं स्वर्गं लोकम् आप्नोति) इससे यजमान ज्ञानयुक्त स्वर्गलोक पाता है। (शुक्रवत्यः ज्योतिष्मत्यः प्रातःसवने भवन्ति) शुक्रवती [शुक्र शब्द वाली ऋचायें जैसे १—वायो शुक्रो अयामि ते ·· ऋग्० ४ । ४७ । १] और ज्योतिष्मती [ज्योतिः शब्द वाली ऋचायें जैसे २—अस्य देवाः प्रदिशि ज्योतिरस्तु ····· अथर्व० १ । ९ । २] प्रातःसवन में होती हैं। (ताभिः ब्रह्मवर्चसं तेजः आप्नोति) उन [ऋचाओं] से ब्रह्मवर्चस् तेज वह पाता है। (वाजवत्यः माध्यन्दिने सवने स्वर्गस्य लोकस्य समष्ट्यै) वाजवती [वाज शब्द वाली ऋचायें जैसे ३—मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु ।····· अथर्व० ४ । २७ । १] माध्यन्दिन सवन में स्वर्ग लोक की प्राप्ति के लिये हैं। (अन्नवत्यः गणवत्यः पशुमत्यः तृतीयसवने भवन्ति, ताभिः भूमानम् आप्नोति) अन्नवती [अन्न शब्द वाली ऋचायें जैसे ४—यत् ते अन्नं भुवस्पत आक्षियति पृथिवीमनु । अथर्व० १० । ५ । ४५], गणवती [गण शब्द वाली ऋचायें जैसे ५—मरुतो मा गणैरवन्तु ····· अथर्व० १९ । ४५ । १०] और पशुमती [पशु शब्द वाली ऋचायें जैसे ६—सं सं स्रवन्तु पशवः—अथर्व० २ । २६ । ३] तृतीय सवन में होती है, उन से वह [उन सबकी] बहुतायत पाता है। (सर्वः सप्तदशः भवति, प्रजापतिः वै सप्तदशः, प्रजापतिम् एव आप्नोति) यह सब सत्रह अवयव [मन्त्र] वाला होता है, प्रजापति [प्रजापालक यज्ञ ही] सत्रह अवयव वाला है, [उससे] प्रजापति [प्रजापालक परमेश्वर] को ही वह पाता है। (हिरण्यस्रजः ऋत्विजः भवन्ति, महसे एव तत् रूपं क्रियते) सुवर्ण की माला वाले ऋत्विज् होते हैं, महत्त्व के लिये ही वह रूप किया जाता है। (एषः प्रकाशः मे अमुष्मिन् लोके असत् इति) यह प्रकाश मेरे लिये उस लोक में होवे—यह प्रयोजन है। (ज्योतिः वै हिरण्यं, ज्योतिषा एव एनम् अन्तः दधति) ज्योति ही सुवर्ण है, ज्योति के साथ ही इस [यजमान] को भीतर धारण करते हैं, (आजिं धावन्ति यजमानम् उज्जापयन्ति)संग्राम को वे धावा करते हैं और यजमान को अच्छे प्रकार जिताते हैं। (सः नाके आरोहति,महसे रोहति,विश्वमहसे रोहति,सर्वमहसे रोहति, मनुष्यलोकात् एव एनम् अन्तः दधति) वह सुख के लिये चढ़ता है, महत्त्व के लिये चढ़ता है, व्यापक महत्त्व

(पा० ३ । १ । ९७) पा रक्षणे वा पा पाने—यत्। ईद्यति (पा० ६ । ४ । ६५) आकारस्य ईकारः, गुणश्च । वाजो विज्ञानं बलं च पेयं रक्षणीयं यस्मिन् स वाजपेयः । विज्ञानस्य बलस्य च रक्षकं यज्ञम् (वाजम्)। वाज—अर्शआद्यच्। विज्ञानवन्तम्। बलवन्तम् (शुक्रवत्यः) शुक्रशब्दयुक्ताः ऋचः, (भूमानम्) पृथ्वादिभ्य इमनिज् वा (पा० ५ । १ । १२२) बहु इमनिच्। बहोर्लोपो भू च बहोः (पा० ६ । ४ । १५८) इकारलोपः, बहोर्भूः । बहुत्वम् (सप्तदशः) बहुन्नीहौ संख्येये डजबहुगणात् (पा० ५ । ४ । ७३) सप्तदशन्–डच्। सप्तदशावयवयुक्तः (हिरण्यस्रजः) सुवर्णमालायुक्ताः (महसे) महत्त्वाय (असत्) भवेत् (अन्तः) मध्ये (आजिम्) अज्यतिभ्यां च (उ० ४ । १३१) अज गतिक्षेपणयोः—इण्। संग्रामम्—निघ० २ । १७ (उज्जापयन्ति) जि जये—णिच्। उत्कृष्टजयं कारयन्ति (विश्वमहसे) व्यापकमहत्वाय संसारे महत्त्वाय। (सवितुः) प्रेरकस्य परमेश्वरस्य (सवम्) सव—अर्शआद्यच्। ऐश्वर्य्योपेतम् (वर्षि-

के लिये चढ़ता है, सम्पूर्ण महत्त्व के लिये चढ़ता है, मनुष्य लोक से [अलग करके शूरवीरों में]ही इस [यजमान] को भीतर धारण करते हैं। (देवस्य सवितुः सवं स्वर्गं लोकं वर्षिष्ठं नाकं रोहेयम् इति ब्रह्मा रथचक्रं सर्पति, सवितृप्रसूतः एव एनं तत् समर्पयति) प्रकाशमान प्रेरक परमात्मा के ऐश्वर्य युक्त स्वर्ग लोक और सबसे बड़े सुख में मैं चढ़ूं—[यह ब्राह्मण वचन बोलकर] ब्रह्मा रथ के पहिये के पास जाता है, सर्वप्रेरक परमात्मा से प्रेरणा किया हुआ ही वह इस [यजमान] को उसे [रथ] सौंप देता है। (अथो प्रजापतिः वै ब्रह्मा, प्रजापतिम् एव एनम् वज्रात् नाकस्य उज्जित्यै वाजिनां सन्तत्यै अधि प्रसुवति) फिर प्रजापति [प्रजापालक] ही ब्रह्मा [चतुर्वेदी ऋत्विज्] है, प्रजापति [प्रजापालक] इस [यजमान] को ही वज्र से सुख के लाभ के लिये और ज्ञानियों के विस्तार के लिये वह अधिकार पूर्वक प्रेरणा करता है। (वाजिसाम अभिगायति, वाजिमान् भवति) ज्ञानियों का साम वह [ब्रह्मा] भली भांति गाता है, ज्ञानी पुरुषों वाला वह [यजमान] होता है। (वाजः वै स्वर्गः लोकः, तं स्वर्गं लोकम् एव रोहति) वाज [ज्ञान] ही स्वर्गलोक है, उस स्वर्ग लोक को ही वह [यजमान] चढ़ता है। (विष्णोः शिपिविष्टवतीषु बृहत् उत्तमं भवति, तं स्वर्गं लोकम् एव रूढ्वा ब्रध्नस्य विष्टपम् अतिक्रामति अतिक्रामति) विष्णु देवता [सर्वव्यापक परमेश्वर] की शिपिविष्टवती ऋचाओं में [शिपिविष्ट, प्रकाशयुक्त परमेश्वर शब्द वाली ऋचाओं मे जैसे ७—किमित्ते विष्णो परिचक्ष्यं भूत्···—ऋग् ७ । १०० । ६] बहुत बड़ा सबसे पिछला [अन्तिम यज्ञ भाग] होता है, उस स्वर्ग लोक को ही चढ़कर ब्रध्न [लोकों को आकर्षण में बांधने वाले सूर्य] के लोक को वह [यजमान] लाँघ जाता है, लाँघ जाता है ॥ ८ ॥

भावार्थः—मनुष्य को चाहिये कि महाविद्वानों की सम्मति से ज्ञानपूर्वक पराक्रमी होकर संसार में बड़ी से बड़ी प्रतिष्ठा पावे ॥ ८ ॥

विशेषः—सङ्केतित मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—शुक्रवती ऋचा—वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता—ऋग्० ४ । ४७ । १ ॥ (वायो) हे वायु! [वायु के समान वेग वाले वीर (शुक्रः) शुक्र [शुद्ध—स्वभाव वाला वा वीर्यवान्] मैं

ष्ठम्) वृद्ध—इष्ठन्। वृद्धतमम् (सर्पति) प्राप्नोति (समर्पयति) ऋ गतौ—णिच्। सम्प्रददाति (वाजिनाम्) ज्ञानिनाम् (वाजिसाम) वाजिनो ज्ञानिनः परमेश्वरस्य मोक्षज्ञानम् (वाजिमान्) ज्ञानिपुरुषैर्युक्तः (विष्णोः) व्यापकस्य परमेश्वरस्य (शिपिविष्टवतीषु) शिपिविष्टशब्दयुक्तासु। सर्वधातुभ्य इन् (उ० ४ । ११८) शिव् निशाने, छेदने—इन् कित् पुक् च, शिपि+विश प्रवेशने—क्तः। शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः। शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति—निरु० ५ । ८। रश्मिभिर्युक्तः। प्रकाशयुक्तः परमेश्वरः (ब्रध्नस्य) बन्धेर्ब्रधिबुधी च (उ० ३ । ५) बन्ध बन्धने—नक्, ब्रधादेशः। लोकानां बन्धकस्य आकर्षणे धारकस्य सूर्यस्य (विष्टपम्) विटपविष्टपविशिपोलपाः (उ० ३ । १४५) विश प्रवेशने—कपन्प्रत्ययः तुट् च। भुवनम्। लोकम् (अतिक्रामति) अतीत्य गच्छति ॥

(दिविष्टिषु) विजय की इच्छाओं में (ते) तेरे लिये (मध्वः) मधु [तत्त्व ज्ञान] का (अग्रम्) प्रधान अंश (अयामि) लाता हूं। (देव) हे देव! [विजय चाहने वाले शूर] (स्पार्हः) चाहने योग्य तू (सोमपीतये) सोम [तत्त्वरस] पीने के लिये (नियुत्वता) नित्य मेल वाले व्यवहार के साथ (आ याहि) आ ॥

२—ज्योतिष्मती ऋचा—अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यम्। सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम्—अथर्व० १ । ९ । २ ॥ (देवाः) हे व्यवहार जानने वाले महात्माओ! (अस्य) इसके [मेरे] (प्रदिशि) शासन में (ज्योतिः) तेज, [अर्थात्] (सूर्यः) सूर्य, (अग्निः) अग्नि, (उत वा) और भी (हिरण्यम्) सुवर्ण (अस्तु) होवे। (सपत्नाः) सब बैरी (अस्मत्) हमसे (अधरे) नीचे (भवन्तु) होवें। (उत्तमम्) अति ऊंचे (नाकम्) सुख में (इमम्) इसको [मुझको] (अधि) ऊपर (रोहय = रोहयत) तुम चढ़ाओ ॥

३—वाजवती ऋचा—मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु। आशूनिव सुयमानह्व ऊतये ते नो मुञ्चन्त्वंहसः—अथर्व० ४ । २७ । १ ॥ (मरुताम्) शत्रुनाशक वीरों का (मन्वे) मैं मनन करता हूं। (मे) मेरे लिये (अधि) अनुग्रह से (ब्रुवन्तु) वे बोलें और (इमम्) इस (वाजम्) बल को (वाजसाते) अन्न के सुख वा दान के निमित्त (प्र) अच्छे प्रकार (अवन्तु) तृप्त करें। (आशून् इव) शीघ्रगामी घोड़ों के समान (सुयमान्) उन सुन्दर नियम वालों को (ऊतये) अपनी रक्षा के लिये (अह्वे) मैंने पुकारा है। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥

४—अन्नवती ऋचा—यत् ते अन्नं भुवस्पत आक्षियति पृथिवीमनु। तस्य नस्त्वं भुवस्पत संप्रयच्छ प्रजापते—अथर्व० १० । ५ । ४५ ॥ (भुवः पते) हे भूपति [राजन्!] (यत्) जो (ते) तेरा (अन्नम्) अन्न (पृथिवीम् अनु) पृथिवी पर (आक्षियति) रहा करता है। (भुवः पते) हे भूपति! (प्रजापते) हे प्रजापति [राजन्!] (त्वम्) तू (नः) हमें (तस्य) उस [अन्न] का (संप्रयच्छ) दान करता रह ॥

५—गणवती ऋचा—मरुतो मा गणैरवन्तु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा—अथर्व० १९ । ४५ । १० ॥ (मरुतः) शूर पुरुष (मा) मुझे (गणैः) सेना दलों के साथ (अवन्तु) बचावें, (प्राणाय) प्राण के लिये, (अपानाय) अपान के लिये, (आयुषे) जीवन के लिये, (वर्चसे) प्रताप के लिये, (ओजसे) पराक्रम के लिये, (तेजसे) तेज के लिये, (स्वस्तये) स्वस्ति [सुन्दर सत्ता] के लिये और (सुभूतये) बड़े ऐश्वर्य्य के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥

६—पशुमती ऋचा—सं सं स्रवन्तु पशवः समश्वाः समु पूरुषाः। सं धान्यस्य या स्फातिः संस्राव्येण हविषा जुहोमि—अथर्व० २ । २६ । ३ ॥ (पशवः) गौ आदि पशु (सम्) मिलकर, (अश्वाः) घोड़े (सम्) मिल कर, (उ) और (पूरुषाः) सब पुरुष (सम् सम्) मिल मिल कर (स्रवन्तु) चलें। और (या) जो (धान्यस्य) धान्य [अन्न] की (स्फातिः) बढ़ती है, [वह भी] (सम् सम् स्रवन्तु) मिल मिलकर

चले । (संस्राव्येण) कोमलता से युक्त (हविषा) भक्ति वा अन्न के साथ [उन सब को] (जुहोमि) मैं ग्रहण करूं ॥

७—शिपिविष्टवती ऋचा—किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि । मा वर्पो अस्मदप गूह एतद् यदन्यरूपः समिथे बभूथ–ऋग्० ७ । १०० । ६ ॥ (विष्णो) हे विष्णु ! [व्यापक परमेश्वर] (किम् इत्) क्या ही [अद्भुत वर्णन] (ते) तेरा (परिचक्ष्यं भूत्) कथन योग्य है, (यत्) जो (प्र ववक्षे) तू कहता है (शिपिविष्टः अस्मि) मैं शिपिविष्ट [तेज में प्रवेश किये हुये] हूं— (अस्मत्) हम से (एतत् वर्पः) इस रूप को (मा अप गूहः) तू मत छिपा, (यत्) जब (समिथे) संग्राम में (अन्यरूपः) दूसरे रूप वाला तू (बभूथ) होता है ॥

कण्डिका ९ ॥

अथातो अप्तोर्यामाः, प्रजापतिर्वै यत् प्रजा असृजत, ता वै तां ता असृजत । ताः सृष्टाः पराच्य एवासन्नोपावर्तन्त । ता एकेन स्तोमेनोपागृह्णात् । ता अत्यरिच्यन्त, ता द्वाभ्यान्ताः सर्वैः । तस्मात् सर्वस्तोमः, ता एकेन पृष्ठेनोपागृह्णात् । ता अत्यरिच्यन्त, ता द्वाभ्यां ताः सर्वैः, तस्मात् सर्वस्पृष्टः । ता अतिरिक्तोक्थे वारवन्तीयेनावारयन्, तस्मादेषोऽतिरिक्तोक्थवान् भवति । तस्माद्वारवन्तीयं ता यदाप्त्वाऽयच्छत्, अतो वा अप्तोर्यामाः । अथो प्रजावाप्नुरित्याहुः, प्रजानां यमन इतीहैवैतदुक्थ ँ ता बर्हिः प्रजाः श्नायेरंस्तर्हि हैतेन यजते, स एषोऽष्टापृष्ठो भवति, तद्यथान्यस्मिन् यज्ञे विश्वजितः पृष्ठमनुसञ्चरं भवति, कथमेतदेवमत्रेति । पितैष यज्ञानां तद्यथा श्रेष्ठिनि संवशेयुरपि विद्विषाणाः, एवमेवैतच्छ्रेष्ठिनो वशेयान्नमन्नस्यानुचर्य्याय क्षमन्ते ॥ ९ ॥

कण्डिका ९ ॥ आख्यायिका—अप्तोर्याम यज्ञ का वर्णन ॥

(अथ अतः अप्तोर्यामाः) अब यहां अप्तोर्याम [पायी हुई प्रजा के नियम, यज्ञ विशेष—गो० पू० ५ । २३, कहे जाते हैं] । (प्रजापतिः वै यत् प्रजाः असृजत, ताः वै तान् ताः असृजत) प्रजापति [प्रजापालक परमेश्वर] ने जब प्रजाओं को सृजा, और (ताः) उन [प्रजाओं] को ही (तान्) वे [पुरुष] और (ताः) वे [स्त्रियां] बनाया । (ताः सृष्टाः पराच्यः एव आसन्, न उपावर्तन्त) वे उत्पन्न हुये [प्रजायें] पराङ्मुख [मुँह फेरे हुये] ही हुये और न लौटे । (ताः एकेन स्तोमेन उपागृह्णात्) उनको एक स्तोम से उस [प्रजापति] ने ग्रहण किया । (ताः अत्यरिच्यन्त) वे प्रजायें और आगे निकल गये । (ताः द्वाभ्यां ताः सर्वैः, तस्मात् सर्वस्तोमः) उनको दो [स्तोम] से उनको सबसे [सब स्तोमों से उसने ग्रहण किया], इसलिये वह सर्वस्तोम

९—(अप्तोः) गो० पू० ५ । २३ । आप्तायाः प्राप्तायाः प्रजायाः (यामाः) गो० पू० ५ । २३ । नियमाः (ताः) प्रजाः (तान्) पुरुषान् (ताः) स्त्रियः (पराच्यः) परा+अञ्चु गतिपूजनयोः—क्विन्, ङीप् । पराङ्मुख्यः (उपावर्तन्त) निवृत्ता अभवन् (अत्यरिच्यन्त) रिच वियोजनसंपर्चनयोः, रिचिर् विरेचने च—लङ् ।

[सब स्तोम वाला यज्ञ] है । (ताः एकेन पृष्ठेन उपागृह्णात्) उनको एक पृष्ठ [नाम वाले स्तोत्र] से उसने ग्रहण किया । (ताः अत्यरिच्यन्त) वे और आगे निकल गये । (ताः द्वाभ्यां ताः सर्वैः, तस्मात् सर्वस्पृष्टः) उनको दो [पृष्ठ] से, उनको सबों से [सब पृष्ठों से उसने ग्रहण किया], इसलिये वह सर्वस्पृष्ट [सर्वस्पृष्टों वा पृष्ठों वाला यज्ञ] है । (ताः अतिरिक्तोक्थे वारवन्तीयेन अवारयन्, तस्मात् एषः अतिरिक्तोक्थवान् भवति) उनको अतिरिक्त उक्थ [औरों से अधिक स्तोत्र वाले यज्ञ] में वारवन्तीय [रोकने के कर्म सेवने वाले स्तोत्र] से उसने रोका, इसलिये वह [यज्ञ] और से अधिक स्तोत्र वाला होता है । (तस्मात् यत् वारवन्तीयं ताः आप्त्वा अयच्छत् अतः वै अप्तोर्यामाः) इसलिये जब वारवन्तीय [स्तोत्र] से प्राप्त करके [प्रजाओं] को उसने नियम में किया, इसलिये वे अप्तोर्याम [प्राप्त हुये प्रजा के नियम वाले यज्ञ] हैं । (अथो प्रजावाप्नुः इति आहुः, प्रजानां यमनः इति, इह एव एतत् उक्थम्) फिर वह [प्रजापति] प्रजाओं का प्राप्त करने वाला और प्रजाओं का नियम में करने वाला है--ऐसा कहते हैं--इसलिये यहाँ ही यह उक्थ [अप्तोर्याम] है । (ताः प्रजाः बर्हिः श्नायेरन्, तर्हि ह एतेन यजते, सः एषः अष्टापृष्ठः भवति) उन प्रजाओं ने बर्हि [वृद्धिकारक कर्म वा कुश तृण] को शुद्ध किया, तब ही इस [बर्हि] से वह यज्ञ करता है, वह ही यह [यज्ञ] आठ पृष्ठों [स्तोत्रों] वाला होता है । (तत् यथा अन्यस्मिन् यज्ञे विश्वजितः अनुसञ्चरं पृष्ठं भवति, कथम् एतत् एवम् अत्र इति) सो जैसे दूसरे यज्ञ में विश्वजित् के पीछे चलने वाला पृष्ठ होता है, कैसे यह [पृष्ठ] ऐसा यहाँ है [उत्तर] (एषः यज्ञानां पिता) यह [विश्वजित्] यज्ञों का पिता है । [देखो गो० पू० ४ । १४] (तत् यथा श्रेष्ठिनि अपि विद्विषाणाः संवशेयुः, एवम् एतत् श्रेष्ठिनः वशेयाग्रम् अन्नस्य आनुचर्य्याय क्षमन्ते) सो जिस प्रकार से श्रेष्ठी [श्रेष्ठ कर्म वाले महाधनी सेठ] में ही द्वेष छोड़े हुये पुरुष कामना करते हैं, ऐसे ही यह है, श्रेष्ठी पुरुष के कामना योग्य अन्न को अन्न के अनुचरण [प्राप्ति के लिये] सहते हैं ॥ ९ ॥

अतिक्रान्ताः पृथग्भूता अभवन् (वारवन्तीयेन) वृञ् वरणे--घञ् । हसिमृग्रिण्० (उ० ३ । ८६) वन संभक्तौ--तन् । वारवन्त--छ । निवारणसेवनीयेन यज्ञेन (अयच्छत्) यम नियमने--लङ् । नियमितवान् (प्रजावाप्नुः) दाभाभ्यां नुः (उ० ३ । ३२) प्रजा+अव+आप्ल लम्भने--नुः । प्रजानां लम्भकः प्रापकः (यमनः) यम नियमने--ल्युट् । नियामकः (श्नायेरन्) ष्णै वेष्टनशोभाशौचेषु--भ्वा० वि० लि०, सस्य शः । स्नायेयुः । शोधयेयुः (अनुसञ्चरम्) पश्चाद्गमनशीलम् (श्रेठिनि) श्रेष्ठं कर्म अस्य--इनिः । श्रेष्ठकर्मकारके महाधनिके (संवशेयुः) वश कान्तौ--वि० लि० । सम्यक् कामनां कुर्युः (विद्विषाणाः) द्विष अप्रीतौ--शानच् । विगतद्वेषाः (वशेयाग्रम्) ढश्छन्दसि (पा० ४ । ४ । १०६) वशा--ढप्रत्ययो बाहुलकात् । कामनार्हमग्रम् (आनुचर्य्याय) अनुचर--ष्यञ् । अनुचरणाय । प्रापणाय (क्षमन्ते) सहन्ते । लभन्ते ॥

भावार्थः—जैसे प्रजापति परमात्मा प्रजाओं और अन्नों को उत्पन्न करके सबको अपने वश में रखता है, वैसे ही प्रजापालक वीर पुरुष सब लोगों को अन्न दान आदि से सन्तुष्ट करके परस्पर अनुकूल रक्खे ॥ ९ ॥

कण्डिका १० ॥

तद्यथैवादोऽह्न उक्थानामाग्नेयं प्रथमं भवति, एवमेवैतदत्राप्याग्नेयं प्रथमं भवति । ऐन्द्रे वाव तत्रोत्तरे ऐन्द्रे वा एते ऐन्द्रावैष्णवमच्छावाकस्योक्थं भवति । चतुराहावान्यतिरिक्तोक्थानि भवन्ति, चतुष्टया वै पशवः, अथो चतुष्पादः पशवः, पशूनामाप्त्यै । त एते स्तोत्रियानुरूपास्तृचा अर्द्धर्चशस्याः । प्रतिष्ठा वा अर्द्धर्चः प्रतिष्ठित्या एव । अथैतेषामेवाश्विनानां सूक्तानां द्वे द्वे समाहावमेकैकमहरहः शंसति, अश्विनौ वै देवानां भिषजौ, तस्मादाश्विनानि सूक्तानि शंसन्ति, तदश्विभ्यां प्रददुरिदं भिषज्यतमिति । क्षेत्रवत्यः परिधानीया भवन्ति, यत्र हतस्तत्प्रजा अशनायन्तीः पिपासन्तीः संरुद्धा स्थिता आसन्, ता दीना एताभिर्यथाक्षेत्रं पाययाञ्चकार, तर्पयाञ्चकार, अथो इयं वै क्षेत्रं पृथिवी, अस्यामदीनायामन्ततः प्रतिष्ठास्यामहा इति । त्रिष्टुभो याज्या भवन्ति, यत्र हतस्तत्प्रजा अशनायन्तीः पिपासन्तीः संरुद्धा स्थिता बभूवुः, ता हैवैना एताभिर्यथौकसं व्यवसाययाञ्चकार, तस्मादेता याज्या भवन्ति तस्मादेता याज्या भवन्ति ॥ १० ॥

कण्डिका १० ॥ अप्तोर्याम यज्ञ का अधिक वर्णन ॥

(तत् यथा एव अह्नः उक्थानाम् अदः आग्नेयं प्रथमं भवति, एवम् एव एतत् अत्र अपि आग्नेयं प्रथमं भवति) सो जैसे ही दिन के [यज्ञों के] उक्थों में अब अग्नि देवता वाला स्तोत्र पहिले होता है, वैसे ही यहा [अप्तोर्याम में—क० ९] भी यह अग्नि देवता वाला स्तोत्र पहिले होता है । (तत्र ऐन्द्रे वाव, उत्तरे ऐन्द्रे वै एते) वहां [उक्थों में] दो इन्द्र देवता वाले स्तोत्र ही हैं और पिछले [अप्तोर्याम] में दो इन्द्र देवता वाले ही यह [स्तोत्र] हैं । (अच्छावाकस्य ऐन्द्रावैष्णवम् उक्थं भवति) अच्छावाक ऋत्विज् का इन्द्र और विष्णु देवता वाला उक्थ होता है । (चतुराहावानि अतिरिक्तोक्थानि भवन्ति, चतुष्टयाः वै पशवः, अथो चतुष्पादः पशवः, पशूनाम् आप्त्यै) चार आवाहन मन्त्र वाले अतिरिक्त उक्थ [औरों से अधिक मन्त्र वाले उक्थ] हैं, चार अङ्ग वाले ही पशु यज्ञ हैं, फिर चार पांव वाले पशु हैं, पशुओं की प्राप्ति के लिये [यह यज्ञ है]। (ते एते स्तोत्रियानुरूपाः तृचाः अर्धर्चशस्याः) सो यह ही स्तोत्रिय और अनुरूप वाले तृच [सामवेद उत्तरार्चिक देखो] आधी आधी ऋचाओं में बोलने योग्य हैं । (प्रतिष्ठा वै अर्धर्चः, प्रतिष्ठित्यै एव) प्रतिष्ठा [स्थिति समान] ही आधी ऋचा है, प्रतिष्ठा के लिये ही [यह विधान है] । (अथ एतेषाम् एव आश्विनानां सूक्तानां द्वे द्वे, एकैकं समाहावम्

१०—(अदः) इदानीम् (आग्नेयम्) अग्नेर्ढक् (पा० ४ । २ । ३३) अग्नि—ढक् । अग्निदेवताकम् (चतुराहावानि) चतुरावाहनयुक्तानि (चतुष्टयाः) चतुर्—तयप् । चतुरवयवाः (पशवः) पशुनामकयज्ञाः । गवादयः (समाहावम्)

अहरहः शंसति) फिर इन ही आश्विन [अश्वि देवता वाले] सूक्तों के दो दो [स्तोत्र] हैं, एक एक समाह्वाव [आवाहन स्तोत्र] को दिन दिन वह बोलता है। (अश्विनौ वै देवानां भिषजौ, तस्मात् आश्विनानि सूक्तानि शंसन्ति) दोनों अश्वी [दिन रात] ही विद्वानों के दो वैद्य हैं, इसलिये अश्वियों के सूक्तों को वे बोलते हैं। (तत् अश्विभ्यां प्रददुः, इदं भिषज्यतम् इति) वह [यज्ञकर्म दोनों अश्वियों को उन्होंने दिया--इसकी तुम दोनों ओषधि करो। (क्षेत्रवत्यः परिधानीयाः भवन्ति) क्षेत्रवती [क्षेत्र शब्द वाली ऋचायें जैसे—शं नो देवः सविता····· अथर्व १९ । १० । १०] परिधानीया [अन्तिम इष्टि] होती हैं। (यत्र हतः तत् प्रजाः अशनायन्तीः पिपासन्तीः संरुद्धाः स्थिता आसन्) जहां वह [यज्ञ] मारा गया [परिधानीय स्तोत्र ठीक न हुआ], वहां प्रजायें भूख की मारी और प्यास की मारी रुकी हुई स्थित होती हैं। (ताः दीनाः एताभिः यथाक्षेत्रं पाययाञ्चकार तर्पयाञ्चकार) उन दीन [दुखिया प्रजाओं] को इन [परिधानीया ऋचाओं] से खेत के अनुसार उस [यजमान] ने जलपान कराया और तृप्त किया। (अथो इयं वै पृथिवी क्षेत्रम्, अस्याम् अदीनायाम् अन्ततः प्रतिष्ठास्यामहै इति) फिर यह ही पृथिवी खेत है, इस अदीना [बलवती और उपजाऊ पृथिवी] पर अन्त में [पुरुषार्थ के पीछे] हम प्रतिष्ठा पावेंगे। (त्रिष्टुभः याज्याः भवन्ति) त्रिष्टुप् [तीन कर्म, उपासना, ज्ञान के सहारे वाली, वा त्रिष्टुप् छन्द वाली स्तुतियां] याज्या [यज्ञ करने योग्य] होती हैं। (यत्र हतः, तत् प्रजाः अशनायन्तीः पिपासन्तीः संरुद्धाः स्थिताः बभूवुः) जहां वह [यज्ञ] मारा गया है [याज्या स्तोत्र ठीक नहीं होते], वहां प्रजायें भूख की मारी, प्यास की मारी और रुकी हुई स्थित होती हैं। (ताः ह एव एनाः एताभिः यथौकसं व्यवसाययाञ्चकार) उन ही इन [प्रजाओं] को इन [याज्या स्तुतियों] से घर घर के अनुसार उस [यजमान] ने उद्यमी बनाया। (तस्मात् एताः याज्याः भवन्ति, तस्मात् एताः याज्याः भवन्ति) इसलिये यह [प्रजायें] याज्या [पूजने योग्य] होती हैं इसलिये यह [प्रजायें] याज्या [पूजनीया] होती हैं ॥ १० ॥

भावार्थः—विचारशील पुरुष ही अपनी प्रजाओं अर्थात् सन्तानों और अन्य लोगों को उत्तम उत्तम उपायों द्वारा भूख प्यास से बचाकर सुखी रखते हैं ॥ १० ॥

विशेषः—सङ्केतित मन्त्र अर्थ सहित दिये जाते हैं।

१- आश्विन सूक्त--इमा उ वां दिविष्टय·····। देखो गो० उ० ५ । ३ । विशेषः ४ ।

२--क्षेत्रवती ऋचा--शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः । शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः—अथर्व०

आवाहनमन्त्रयुक्तम् (क्षेत्रवत्यः) क्षेत्रपदयुक्ताः (अशनाय तीः) अशन-क्यच् शतृ, ङीप् । अशनायन्त्यः । बुभुक्षिताः (पिपासन्तीः) पिपासन्त्यः । पिपासिताः (दीनाः) दुःखिताः (पाययाञ्चकार) जलपानं कारितवान् (तर्पयाञ्चकार) तर्पितवान् (अदीनायाम्) बलवत्याम् । शस्योत्पादिकायाम् (प्रतिष्ठास्यामहै) प्रतिष्ठिताः भविष्यामः (व्यवसाययाञ्चकार) व्यवसायमुद्योगं कारितवान् ॥

१६ । १० । १० ॥ (देवः) प्रकाशमान (सविता) लोकों का चलाने वाला सूर्य (त्रायमाणः) रक्षा करता हुआ (नः)हमें (शम्) सुखदायक हो, (विभातीः) जगमगाती हुयी (उषसः) प्रभात वेलायें (नः) हमें (शम्) सुखदायक (भवन्तु) हों। (पर्जन्यः) सींचने वाला मेघ (नः) हमें और (प्रजाभ्यः) प्रजाओं के लिये (शम्) सुखदायक (भवतु) हो, (शंभुः) मङ्गल दाता (क्षेत्रस्य) खेत का (पतिः) स्वामी (नः) हमें (शम्) सुखदायक (अस्तु) हो ॥

कण्डिका ११ ॥

अथातोनैकाहिकं श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति, प्रातःसवनेऽहीनमेव तत्सन्तन्वन्त्यहीनस्य सन्तत्यै । तद्यथा ह वा एकाहःसुत एवमहीनः सुतः, तद्यथैकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि यन्ति, एवमहीनस्य सुतस्याहानि सन्तिष्ठमानानि यन्ति । तद्यच्छ्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति, प्रातःसवनेऽहरेव तदह्नो रूपं कुर्वन्ति । अपरेणैव तदह्नापरमहरभ्यारभन्ते, तत्तथा न माध्यन्दिने सवने । श्रीर्वै पृष्ठानि तानि तस्मिन्नेवावस्थितानि भवन्ति । एतेनैव विधिना तृतीयसवने न श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति ॥ ११ ॥

कण्डिका ११ ॥ अनैकाहिक वा अहीन अर्थात् अनेक दिनों में होने वाले यज्ञ का वर्णन ॥

(अथ अतः अनैकाहिकम्) अब यहाँ अनैकाहिक [वा अहीन अर्थात् अनेक दिनों में होने वाला वा सम्पूर्ण अङ्ग वाला यज्ञ कर्म कहा जाता है] । (श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति) आगामी दिन में होने वाले स्तोत्रिय [स्तोत्र] को आज होने वाले स्तोत्रिय के अनुरूप [छन्द, देवता आदि से सदृश] करते हैं । (प्रातःसवने अहीनम् एव तत् अहीनस्य सन्तत्यै सन्तन्वन्ति) प्रातःसवन में अहीन [बहुत दिनों में होने वाले वा सम्पूर्ण अङ्ग वाले यज्ञ] को ही तब अहीन के फैलाव के लिये फैलाते है [क० १५] । (तत् यथा ह वै एकाहः सुतः एवम् अहीनः सुतः) सो जैसे ही एकाह [एक दिन में होने वाला यज्ञ] निचोड़ा जाता है, वैसे ही अहीन [बहुत दिन में होने वाला यज्ञ] निचोड़ा जाता है । (तत् यथा एकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि यन्ति, एवम् अहीनस्य सुतस्य अहानि सन्तिष्ठमानानि यन्ति । सो जैसे एकाह यज्ञ के निचोड़े हुए सोम के

११--(अनैकाहिकम्) कालाट्ठञ् (पा० ४ । ३ । ११) एकाह--ठञ्, नञ्समासः । अनेकदिनवर्तमानं यज्ञकर्म । अहीननामकयज्ञः (श्वःस्तोत्रियम्) आगामिदिने क्रियमाणं स्तोत्रम् (अद्यस्तोत्रियस्य) अस्मिन् दिने क्रियमाणस्य स्तोत्रस्य (अनुरूपम्) छन्दोदेवतादिना सदृशम् (अहीनम्) गो० ब्रा० उ० २ । ८ । अहर्गणसाध्यसुत्याकम् । बहुदिनेषु क्रियमाणं यज्ञविशेषम् । सम्पूर्णाङ्गयज्ञम् (सन्तन्वन्ति) सम्यग् विस्तारयन्ति । अनुतिष्ठन्ति (एकाहः) राजाहःसखिभ्यष्टच् (पा० ५ । ४ । ९१) एकाहन्--टच् । उत्तमैकाभ्याञ्च (पा० ५ ।

[तीन] सवन साथ साथ वर्तमान होकर चलते हैं, वैसे ही अहीन यज्ञ के निचोड़े हुये सोम के दिन [दिनों में होने वाले यज्ञ कर्म] साथ साथ वर्तमान होकर चलते हैं। (तत् यत् श्व.स्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति, प्रातःसवने अहः एव तत् अह्नः रूपं कुर्वन्ति) सो जब आगामी दिन में होने वाले स्तोत्रिय को आज होने वाले स्तोत्रिय के अनुरूप [समान रूप] करते हैं, प्रातः सवन में दिन को ही तब दिन के अनुरूप करते हैं। (अपरेण एव अह्ना तत् अपरम् अहः अभ्यारभन्ते, तत् तथा न माध्यन्दिने सवने) दूसरे ही दिन के साथ तब दूसरे दिन को आरम्भ करते हैं, सो वैसा माध्यन्दिन सवन में नहीं [आरम्भ करते]। (श्रीः वै पृष्ठानि तानि तस्मिन् एव अवस्थितानि भवन्ति) श्री ही पृष्ठ [स्तोत्र] हैं, वे [पृष्ठ] उस [माध्यन्दिन सवन] में ही ठहरे हुये हैं। (एतेन एव विधिना तृतीयसवने श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं न कुर्वन्ति) इस ही विधि से तीसरे सवन में आगामी दिन में होने वाले स्तोत्रिय को आज होने वाले स्तोत्रिय के अनुरूप नहीं करते हैं ॥ ११ ॥

भावार्थः—यज्ञों को यथा विधान करना चाहिये ॥ ११ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६ । १७ ॥

विशेषः २—(प्रातःसवने ऽहीनमेव तत् सन्तन्वन्त्यहीनस्य सन्तत्यै) ऐसा पाठ राजेन्द्रलाल मित्र एशियाटिक सोसैटी के पुस्तक से और आगे वाली कण्डिका १५ के पाठ से (प्रातःसवनेऽहीनस्य सन्तत्यै) जीवानन्द विद्यासागर के पाठ के स्थान पर शुद्ध किया है। (तद्यश्वः) के स्थान पर (तद्यच्छ्वः) ऐतरेय ब्राह्मण में है ॥

कण्डिका १२ ॥

अथात आरम्भणीया एव, ऋजुनीती नो वरुण इति मैत्रावरुणस्य। मित्रो नयतु विद्वानिति, प्रणेता वा एष होत्रकाणां, यन्मैत्रावरुणः, तस्मादेषा प्रणेत्रिमती [प्रणेतृमती] भवति, इन्द्रं वो विश्वतस्परीति ब्राह्मणाच्छंसिनः। हवामहे जनेभ्य इति, इन्द्रमेवैतयाहरहर्निर्ह्वयन्ते, न हैवैषां विहवेऽन्य इन्द्रं वृङ्क्ते, यत्रैवं विद्वान् ब्राह्मणाच्छंस्येतामहरहः शंसति। यत् सोम आ सुते नर इत्यच्छावाकस्य। इन्द्राग्नी अजोहवुरितीन्द्राग्नी एवैतयाहरहर्निर्ह्वयन्ते, न हैवैषां विहवेऽन्य इन्द्राग्नी वृङ्क्ते। यत्रैवं विद्वानच्छावाक एताम् अहरहः शंसति, ता वा एताः स्वर्गस्य लोकस्य नावः सन्तारण्यः। स्वर्गमेवैताभिर्लोकमनुसञ्चरन्ति ॥ १२ ॥

कण्डिका १२ ॥ अहीन [अहर्गण यज्ञ] में आरम्भणीया ऋचाओं का वर्णन ॥

(अथ अतः आरम्भणीयाः एव) अब यहां आरम्भणीया [अहर्गण यज्ञ की पहिली ऋचायें] ही हैं। (ऋजुनीती नो वरुणः इति मैत्रावरुणस्य) ऋजुनीती नो

---

४ । ६०) अहन् इत्यस्य अह्न इत्ययमादेशो न। एकस्मिन् दिने क्रियमाणो यज्ञः (सन्तिष्ठमानानि) सहवर्त्तमानानि (यन्ति) गच्छन्ति। अनुष्ठीयन्ते ॥

वरुणः ··· १ ऋ० १ । ९० । १ । यह ऋचा मैत्रावरुण ऋत्विज् की [आरम्भणीया] है। (मित्रो नयतु विद्वान् इति, एषः वै होत्रकाणां प्रणेता, यत् मैत्रावरुणः) मित्रो नयतु विद्वान् [यह उसी मन्त्र का दूसरा पाद है, उसमें नयतु ले चले—यह पद णीञ् = ले चलना, धातु से है] इससे यह होता लोगों का प्रणेता [प्रवर्त्तक, ले चलने वाला] है, जो मैत्रावरुण ऋत्विज् है। (तस्मात् एषा प्रणेत्रिमती [प्रणेतृमती] भवति) इसलिये यह ऋचा प्रणेतृ [ले चलने वाले शब्द] वाली है। (इन्द्र वो विश्वतस्परि इति ब्राह्मणाच्छसिनः) इन्द्र वो विश्वतस्परि··· ··· २, अथर्व० २० । ३९ । १ । यह ब्राह्मणाच्छंसी की [आरम्भणीया] है। (हवामहे जनेभ्यः इति, इन्द्रम् एव एतया अहरहः निर्ह्वयन्ते) हवामहे जनेभ्यः [यह उसी मन्त्र का दूसरा पाद है, उसमें हवामहे—हम बुलाते हैं—यह पद है] इस ऋचा से इन्द्र को ही दिन दिन वे बुलाते हैं। (एषां ह एव विहवे अन्यः इन्द्रं न वृङ्क्ते, यत्र एवं विद्वान् ब्राह्मणाच्छसी एताम् अहरहः शंसति) इन [यजमानों] के विशेष आवाहन में दूसरा कोई इन्द्र को नही रोकता है, जहां ऐसा विद्वान् ब्राह्मणाच्छंसी इस ऋचा को दिन दिन बोलता है। (यत् सोम आ सुते नरः इति अच्छावाकस्य) यत् सोम आ सुते नरः ·· ३, ऋ० ७ । ९४ । १० । यह अच्छावाक ऋत्विज् की [आरम्भणीया] है। (इन्द्राग्नी अजोहवुः इति, इन्द्राग्नी एव एतया अहरहः निर्ह्वयन्ते) इन्द्राग्नी अजोहवुः [यह उस मन्त्र का दूसरा पाद है उसमें अजोहवुः—वे बुलाते हैं—यह पद है] इससे इन्द्र और अग्नि को ही इस ऋचा से दिन दिन वे बुलाते रहते हैं। (एषां ह एव विहवे इन्द्राग्नी न वृङ्क्ते यत्र एवं विद्वान् अच्छावाकः एताम् अहरहः शंसति) इन ही [यजमानों] के विशेष आवाहन में दूसरा कोई इन्द्र और अग्नि को नही रोकता है, जहां ऐसा विद्वान् अच्छावाक इस [ऋचा] को दिन दिन बोलता है। (ताः वै एताः स्वर्गस्य लोकस्य सन्तारण्यः नावः) वे ही यह [तीनों ऋचायें] स्वर्ग लोक की तरा देने वाली नावें हैं। (स्वर्गम् एव लोकम् एताभिः अनुसञ्चरन्ति) स्वर्ग लोक को ही इन [ऋचाओं] से वे निरन्तर चले जाते हैं ॥ १२ ॥

१२—(आरम्भणीयाः) अहर्गणे आरब्धुमर्हाः ऋचः (ऋजुनीती) सुपां सुलुक्० (पा० ७ । १ । ३९) तृतीयायाः पूर्वसवर्णदीर्घः । ऋजुनीत्या । सरलनयनेन (नः) अस्मान् (वरुणः) श्रेष्ठः (मित्रः) सर्वोपकारी (नयतु) गमयतु (प्रणेता) प्रवर्त्तकः (प्रणेतृमती) प्रणेतृवाचकशब्दवती (इन्द्रम्) परमैश्वर्य्यवन्तं परमात्मानम् (वः) युष्मभ्यम् (विश्वतः) सर्वेभ्यः (परि) सर्वतः (हवामहे) आह्वयामः (जनेभ्यः) प्राणिनां हिताय (निर्ह्वयन्ते) नितराम् आह्वयन्ते (एषाम्) यजमानानाम् (विहवे) विशेषाह्वाने (वृङ्क्ते) वर्जयति (अजोहवुः) आहूतवन्तः । आह्वयन्ते (सन्तारण्यः) सम्यारण्यः । सम्यक् पारनेभ्यः (अनुसञ्चरन्ति) निरन्तरं गच्छन्ति ॥

भावार्थः—जहाँ यज्ञ में ऋत्विज् लोग मन्त्रों का प्रयोग ठीक२ करते हैं, वहाँ यजमान परमानन्द पाते हैं ॥ १२ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६ । ६ ॥

विशेषः २—शुद्धिपत्र नीचे है ।

अशुद्ध	शुद्ध	प्रमाण
प्रणेत्रिर्मती	प्रणेतृमती	ऐ० ब्रा० ६ । ६
आ सते	आ सुते	वेद और ऐ० ब्रा०
अच्छावाकस्येता	अच्छावाक एता	ऐ० ब्रा० ६ । ६

विशेषः ३—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् । अर्यमा देवैः सजोषाः ·· ऋ० १ । ९० । १ ॥ (वरुणः) श्रेष्ठ गुण वाला (मित्रः) सबका उपकारी, (विद्वान्), जानकार, (अर्यमा) न्यायकारी पुरुष, (देवैः) दिव्य गुण वाले विद्वानों से (सजोषाः) समान प्रीति करता हुआ (नः) हमको (ऋजुनीती) सीधी नीति से (नयतु) ले चले ॥

२—इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवल.—अथर्व० २० । ३९ । १, ऋ० १ । ७ । १०, साम० उ० ८ । १ । २ । [हे मनुष्यो !] (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले परमेश्वर] को (वः) तुम्हारे लिये और (विश्वतः जनेभ्यः) सब प्राणियों के लिये (परि) सब प्रकार (हवामहे) हम बुलाते हैं वह (अस्माकम्) हमारा (केवलः) सेवनीय (अस्तु) हो ॥

३—यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः । सप्तीवन्ता सपर्यवः—ऋ० ७ । ९४ । १० ॥ (यत्) जब (सोमे सुते) सोम [तत्त्वरस] निचुड़ने पर (सपर्यवः) सत्कार करने वाले (नरः) नर [नेता लोग] (सप्तीवन्ता) उत्तम घोड़ों वाले (इन्द्राग्नी) इन्द्र और अग्नि [सूर्य और अग्नि के समान राजा और मन्त्री] को (आ अजोहवुः) बुलाते हैं [तब वे दोनों सहायता करते हैं] ॥

कण्डिका १३ ॥

अथातः परिधानीया एव, ते स्याम देव वरुणेति, मैत्रावरुणस्य । इषं स्वश्च धीमहीति, अयं वै लोक इषमित्यसौ वै लोकः स्वरिति, उभावेवैनौ तौ लोकाच्चारभते । व्यन्तरिक्षमतिरदिति ब्राह्मणाच्छंसिनो विवृतृचम् । स्वर्गमेवैताभिर्लोकं विवृणोति । मदे सोमस्य रोचनेन्द्रो यदभिनद् वलमिति, सिषासवो ह वा एते यद् दीक्षिताः, तस्मादेषा वलवती भवति । उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहासतीः । अर्वाञ्चं नुनुदे वलमिति, सनिमेतेभ्य एतयावरुन्धे । इन्द्रेण रोचना दिवो दृढानि दृंहितानि च । स्थिराणि न पराणुद इति, स्वर्गमेवैतयाहर-

हलौकमवरुन्धे । आहं सरस्वतीवतोरित्यच्छावाकस्य । इन्द्राग्न्योरवो वृण इति, एतद् ह वा इन्द्राग्न्योः प्रियं धाम यद्वागिति, प्रियेणैवैनौ तद्धाम्ना समर्द्धयति । प्रियेणैव धाम्ना समृध्यते, य एवं वेद ॥ १३ ॥

कण्डिका १३ ॥ अहीन वा अहर्गण यज्ञ में परिधानीया अर्थात् समाप्ति वाली ऋचाओं का वर्णन ॥

(अथ अतः परिधानीयाः एव) अब यहाँ परिधानीया ही [समाप्ति वाली ऋचायें कही जाती हैं]। (ते स्याम देव वरुण इति, मैत्रावरुणस्य) ते स्याम देव वरुण ·····१, ऋग्० ७ । ६६ । ६, यह मैत्रावरुण की [परिधानीया] है । (इषं स्वश्च धीमहि इति, अयं वै लोकः इषम् इति, असौ वै लोकः स्वः इति, उभौ एव एनौ तौ लोकात् च आरभते) इषं स्वश्च धीमहि--अन्न और सुख को हम धारण करें [यह उस मन्त्र का तीसरा पाद है], यह ही लोक अन्न है, वह ही लोक सुख है, इससे दोनों ही उन [दो लोकों] को इस लोक से वह अवश्य पाता है । (व्यन्तरिक्षमतिरत् इति ब्राह्मणाच्छंसिनः विवृतृचम्) व्यन्तरिक्षम् अतिरत् ·····अथर्व० २० । २८ । १—३, यह ब्राह्मणाच्छंसी का विवृतृच् [विवृ-खोलना, शब्द वाला तीन मन्त्रों का समूह, परिधानीया] है । (स्वर्गम् एव लोकम् एताभिः विवृणोति) स्वर्ग ही लोक को इन [तीन ऋचाओं] से वह खोल देता है [विवृ शब्द का अर्थ--खोलना-है, मन्त्र के वि शब्द से विवृ-खोलना-लिया है] (मदे सोमस्य रोचना, इन्द्रो यदभिनद् वलम् इति, सिषासवः ह वै एते यत् दीक्षिताः, तस्मात् एषा वलवती भवति) मदे सोमस्य रोचना, इन्द्रः यत् अभिनद् वलम् [तृच के पहिले मन्त्र के यह दूसरे और तीसरे पाद हैं, तीसरे पाद में वल शब्द है], देने की इच्छा वाले ही यह सब है जो दीक्षा पाये हुये हैं, इसलिये यह ऋचा वलवती [वल शब्द वाली] है । (उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः, अर्वाञ्चं नुनुदे वलम् इति, सनिम् एतेभ्यः एतया

१३--(परिधानीयाः) समाप्तिसाधनभूता ऋचः (इषम्) अन्नम् (स्वः) सुखम् (धीमहि) धारयामहे (लोकात्) अस्माल्लोकात् (च) अवधारणे (आरभते) आलभते । प्राप्नोति (वि) विविधम् । वियुक्तम् । (अतिरत्) पारं कृतवान् (विवृतृचम्) विवृशब्दयुक्त तृचम् (विवृणोति) विवृतं करोति (मदे) आनन्दे (सोमस्य) ऐश्वर्यस्य (रोचना) विभक्तेराकारः । रोचनया । प्रीत्या (इन्द्रः) परमैश्वर्यवान् परमात्मा (यत्) यदा (अभिनत्) व्यदारयत् (वलम्) हिंसकम् । विघ्नम् (सिषासवः) षणु दाने वा षण संभक्तौ—सनि उप्रत्ययः । सनीवन्तर्द्ध० (पा० ७ । २ । ४९) इटो विकल्पनाद् अभावपक्षे जनसनखनां० (पा० ६ । ४ । ४२) आत्वम् । सनितुं दातुं वेच्छवः (वलवती) वलशब्दयुक्ता ऋक् (उत्) ऊर्ध्वम् (गाः) वाणीः । विद्याः (आजत्) अज गतिक्षेपणयोः—लङ् । अगमयत् (अङ्गिरोभ्यः) विज्ञानिभ्यः (आविष्कृण्वन्) प्रकटयन् (गुहा) गुहायाम् । गुप्तावस्थायाम् (सतीः) विद्यमानाः (अर्वाञ्चम्)

अवरुन्धे) उद्गा आजदङ्गिरोभ्यः·····[यह उस तृच का दूसरा मन्त्र है] इससे लाभ इन [दीक्षितों] के लिये इस [ऋचा] से वह प्राप्त करता है। (इन्द्रेण रोचना दिवो दृह्लानि दृंहितानि च स्थिराणि न पराणुदे इति, स्वर्गम् एव लोकम् एतया अहरहः अवरुन्धे) इन्द्रेण रोचना दिवः·····[यह तृच का तीसरा मन्त्र है] स्वर्ग ही लोक को इस [ऋचा] से दिन दिन वह [यजमान] प्राप्त करता है। (आहं सरस्वतीवतोः, इति अच्छावाकस्य) आहं सरस्वतीवतोः ···· ऋग्० ८ । ३८ । १० । यह अच्छावाक की [परिधानीया ऋचा] है। (इन्द्राग्न्योरवो वृणे, इति, एतत् ह वै इन्द्राग्न्योः प्रियं धाम यत् वाक् इति) इन्द्राग्न्योरवो वृणे, [यह उसी मन्त्र का दूसरा पाद है], इन्द्र और अग्नि का यह ही प्रिय धाम है [मन्त्रोक्त—अवः—रक्षा ही धाम वा स्थान है], जो वाणी [सरस्वती] है। (प्रियेण एव धाम्ना एनौ तत् समर्धयति) प्रिय धाम से ही इन दोनों [इन्द्र और अग्नि] को तब वह [अच्छावाक] समृद्ध [सफल] करता है। (प्रियेण एव धाम्ना समृध्यते यः एवं वेद) प्रिय धाम से ही वह समृद्ध होता है, जो ऐसा विद्वान् है ॥ १३ ॥

भावार्थ :—कण्डिका १२ के समान है ॥ १३ ॥

विशेषः १—इस कण्डिका को मिलाओ—ऐ० ब्रा० ६ । ७ ॥

विशेषः २—शुद्धिपत्र नीचे दिया जाता है ॥

अशुद्ध	शुद्ध	प्रमाण
इषांश्च	इषं	वेद तथा ऐ० ब्रा०
स्वधी०	स्वश्च धी०	,, ,,
व्यन्ततरिक्ष	व्यन्तरिक्ष	,, ,,
धामः	धाम	ऐतरेय ब्राह्मण

विशेषः ३—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि—ऋ० ७ । ६६ । ६, साम० उ० ४ । १ । ८ ॥ (देव) हे देव ! [विजय चाहने वाले वीर] (वरुण) हे वरुण ! [श्रेष्ठ] (मित्र) हे मित्र ! [सर्वोपकारी] (सूरिभिः सह) बुद्धिमानों सहित (ते ते) तेरे ही (स्याम) हम होवें और (इषम्) अन्न (च) और (स्वः) सुख (धीमहि) धारण करें ॥

अधोगतम् (नुनुदे) प्रेरितवान् (सनिम्) लब्धम् (इन्द्रेण) परमैश्वर्यवता परमात्मना (रोचना) रोचनानि । प्रकाशाः (दिवः) व्यवहारस्य (दृह्लानि) दृह वृद्धौ—क्तः । दृढीकृतानि (दृंहितानि) दृंहि वृद्धौ—क्तः । वर्धितानि । विस्तारितानि (स्थिराणि) स्थितिशीलानि (न) निषेधे (पराणुदे) परा+णुद प्रेरणे क्विप् । परानोदनाय । दूरे प्रेरणाय (सरस्वतीवतोः) वाग्वतोः (अवः) रक्षणम् (आ वृणे) सर्वतः प्रार्थयामि (धाम्ना) स्थानेन (समर्धयति) समृद्धौ करोति ॥

२—व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद् बलम्—अथर्व० २० । २८ ।१—३, ऋग्० ८ । १४ । ७—९, साम० उ० ८ । १ । तृच ९ ॥ (इन्द्रः) इन्द्र [बड़े ऐश्वर्यवान् परमात्मा] ने (सोमस्य) ऐश्वर्य के (मदे) आनन्द में (रोचना) प्रीति के साथ (अन्तरिक्षम्) आकाश को (वि अतिरत्) पार किया है, (यत्) जब कि उसने (वलम्) वल [हिंसक विघ्न] को (अभिनत्) तोड़ डाला ॥ १ ॥

३—उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ॥ (गुहा) गुहा [गुप्त अवस्था] में (सतीः) वर्तमान (गाः) वाणियों को (आविः कृण्वन्) प्रकट करते हुये उस [परमेश्वर] ने (अङ्गिरोभ्यः) विज्ञानी पुरुषों के लिये (उत् आजत्) ऊँचा पहुँचाया और (वलम्) वल [हिंसक विघ्न] को (अर्वाञ्चम्) नीचे (नुनुदे) हटाया है ॥ २ ॥

४—इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ॥ (इन्द्रेण) इन्द्र [बड़े ऐश्वर्य वाले परमात्मा] कर के (दिवः) व्यवहार के (स्थिराणि) ठहराऊ (रोचना) प्रकाश (न पराणुदे) न हटने के लिये (दृळ्हानि) पक्के किये गये (च) और (दृंहितानि) बढ़ाये गये [फैलाये गये] हैं ॥ ३ ॥

५—अहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे । याभ्यां गायत्रमृच्यते—ऋ० ८ । ३८ । १० ॥ (अहम्) मैं (सरस्वतीवतोः) सरस्वती [विज्ञानवती वेद वाणी] वाले (इन्द्राग्न्योः) इन्द्र और अग्नि [सूर्य और अग्नि के समान तेजस्वी राजा और मन्त्री] की (अवः) रक्षा (आ वृणे) चाहता हूँ, (याभ्यां) जिन दोनों के लिये (गायत्रम्) गायत्र [गाने योग्य वैदिक स्तोत्र] (ऋच्यते) गाया जाता है ॥

कण्डिका १४ ॥

उभय्यो होत्रकाणां परिधानीया भवन्ति, अहीनपरिधानीयाश्चैकाहिन्यस्य [न्यश्च] तत एकाहिकीभिरेव मैत्रावरुणः परिदधाति, तेनास्माल्लोकान्न प्रच्यवते । आहिनीकीभिरच्छावाकः स्वर्गस्य लोकस्याप्त्यै; उभयीभिर्ब्राह्मणाच्छंसी, एवमसावुभौ व्यन्वारभमाण एतीमञ्च लोकममुञ्च । अथोऽहीनञ्चैकाहञ्च, अथो संवत्सरञ्चाग्निष्टोमञ्च, अथो मैत्रावरुणञ्चाच्छावाकञ्च, एवमसावुभौ व्यन्वारभमाण एति । अथ तत एकाहिकीभिरेव तृतीयसवने होत्रकाः परिद[1]धति, तेनास्माल्लोकान्न प्रच्यवते । आहिनीकीभिरच्छावाकः स्वर्गस्य लोकस्य समष्ट्यै । कामं तद्धोता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः । यद्वै होता तद्धोत्रकाः, प्राणो वै होता, अङ्गानि होत्रकाः, समानो वा अयं प्राणोऽङ्गान्यनुसञ्चरन्ति । तस्मात् तत् कामं होता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः । यद्वै होता तद्धोत्रकाः, आत्मा वै होता, अङ्गानि होत्रकाः, समानो वा इमेऽङ्गानामन्ताः, तस्मात् तत् कामं होता शंसेत्, यद्धोत्रकाः पूर्वेद्युः शंसेयुः । यद्वै होता तद्धोत्रकाः, सूक्तान्तैर्होता परिदधाति, अथ समान्य एव होत्रकाणां परिधानीया भवन्ति ॥ १४ ॥

---

१. पू. सं. "परिदधाति" इति पाठः ॥ सम्पा० ॥

कण्डिका १४ ॥ अहीन और एकाह यज्ञों में होत्रक लोगों की दो प्रकार की परिधानीया ऋचायें ॥

(उभय्यः होत्रकाणां परिधानीयाः भवन्ति, अहीनपरिधानीयाः च एकाहिन्यस्य = एकाहिन्यः च) दो प्रकार की होत्रक लोगों [तीन सहायक होताओं] की परिधानीया [समाप्ति वाली ऋचायें] होती हैं, अहीनपरिधानीया [बहुत दिन वाले यज्ञ की परिधानीया] और एकाहिनी [एक दिन वाले यज्ञ की] । (ततः एकाहिकीभिः एव मैत्रावरुणः परिदधाति, तेन अस्मात् लोकात् न प्रच्यवते) इसलिये एकाहिकी [एक दिन में होने वाले यज्ञ की ऋचाओं] से ही मैत्रावरुण ऋत्विज् परिधानीया बोलता है, इस कारण इस लोक से वह [यजमान] नहीं गिरता है । (आहिनीकीभिः अच्छावाकः स्वर्गस्य लोकस्य आप्त्यै) आहिनीकी [बहुत दिन में होने वाले यज्ञ की ऋचाओं] से अच्छावाक ऋत्विज् स्वर्ग लोक की प्राप्ति के लिये [परिधानीया बोलता है] । (उभयीभिः ब्राह्मणाच्छंसी, एवम् असौ उभौ इमं च अमुं च लोकं व्यन्वारभमाणः एति) दोनों प्रकार वाली [ऋचाओं] से ब्राह्मणाच्छंसी [परिधानीया बोलता है], इस प्रकार से वह [यजमान] दोनों इस और उस लोक को निरन्तर पाता हुआ चलता है। (अथो अहीनं च एकाहं च, अथो संवत्सरं च अग्निष्टोमं च, अथो मैत्रावरुणं च अच्छावाकं च, एवम् असौ उभौ व्यन्वारभमाणः एति) फिर अहीन [बहुत दिनों में होने वाले] और एकाह [एक दिन में होने वाले यज्ञ] को, फिर संवत्सर और अग्निष्टोम [यज्ञ] को, फिर मैत्रावरुण और अच्छावाक [ऋत्विज्] को, इस प्रकार वह [यजमान] दो दो को ग्रहण करता हुआ चलता है ॥

(अथ ततः एकाहिकीभिः एव तृतीयसवने होत्रकाः परिदधति तेन अस्मात् लोकात् न प्रच्यवते) फिर तब एकाहिकी [एक दिन में होने वाले यज्ञ की ऋचाओं] से ही तीसरे सवन में होत्रक लोग परिधानीयायें बोलते हैं, इस कारण इस लोक से वह [यजमान] नहीं गिरता । (आहिनीकीभिः अच्छावाकः स्वर्गस्य लोकस्य समष्टयै) आहिनीकी [बहुत दिन में होने वाले यज्ञ की ऋचाओं] से अच्छावाक स्वर्ग लोक की प्राप्ति के लिये [परिधानीया बोलता है] । (तत् होता कामं शंसेत्, यत् होत्रकाः पूर्वेद्युः शंसेयुः) तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहिले दिन बोले थे । (यत् वै होता, तत् होत्रकाः) जो ही होता ऋत्विज् है वे ही होत्रक लोग हैं । (प्राणः वै होता,

---

१४—(उभय्यः) उभय—ङीप् द्विविधाः (एकाहिन्यस्य) लेखप्रमादः । एकाहिन्यश्च । एकाह—इनिः, ङीप्, जसि रूपम् । एकाहिन्यः । एकाहयज्ञे विहिता ऋचः (एकाहिकीभिः) एकाह—ठन्, ङीप् । ऐकाहिकाभिः । एकाहविहिताभिः (परिदधाति) परिधानीयां शंसति (आहिनीकीभिः) अहीन—ठक्, ङीप्, वर्णव्यत्ययः । आहीनिकीभिः । अहीनेषु अहर्गणेषु विहिताभिः (व्यन्वारभमाणः) लस्य रः । विविधमालभमानः स्पृशन् (एति) गच्छति । प्राप्नोति (कामम्) यथाकामम् । यथेष्टम् (समानः) तुल्यः (पूर्वेद्युः) सद्यः

अङ्गानि होत्रकाः, अयं प्राणः वै समानः अङ्गानि अनुसञ्चरन्ति = अनुसञ्चरति) प्राण [के तुल्य] ही होता ऋत्विज् है, और अङ्ग होत्रक लोग हैं, यह प्राण ही समान [एक रस फैलने वाला होकर अङ्गों में घूमता रहता है। **(तस्मात् तत् कामं होता शंसेत् यत् होत्रकाः पूर्वेद्युः शंसेयुः)** इसलिये तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहिले दिन बोले थे। **(यत् वै होता तत् होत्रकाः)** जो ही होता ऋत्विज् है वे ही होत्रक लोग हैं। **(आत्मा वै होता, अङ्गानि होत्रकाः, अङ्गानां वै इमे अन्ताः समानः = समानाः)** आत्मा ही होता ऋत्विज् है, और अङ्ग होत्रक लोग हैं, अङ्गों के यह अन्त [हाथ पैर अङ्गुली आदि] एक से हैं। **(तस्मात् तत् होता कामं शंसेत् यत् होत्रकाः पूर्वेद्युः शंसेयुः)** इसलिये तब होता चाहे तो [वे मन्त्र] बोले, जो होत्रक लोगों ने पहले दिन बोले थे। **(यत् वै होता तत् होत्रकाः, सूक्तान्तैः होता परिदधाति)** जो ही होता ऋत्विज् है, वे ही होत्रक लोग हैं, [इसलिये] सूक्त के पिछले [मन्त्रों] से होता परिधानीया बोलता है। **(अथ होत्रकाणाम् एव परिधानीयाः समान्यः भवन्ति)** फिर होत्रक लोगों की परिधानीया भी समान [एक साथ बोली हुई] होती हैं ॥ १४ ॥

भावार्थः—जहाँ विद्वान् ऋत्विज् लोग अपना अपना काम यथाविधि करते हैं, वह यज्ञ सर्वथा सुफल होता है ॥ १४ ॥

विशेषः—इस कण्डिका को क० १३ और ऐतरेय ब्राह्मण ६ । ८ से मिलाओ ।

कण्डिका १५ ॥

यः श्वःस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवनेऽहीनमेव तत्सन्तन्वन्ति, अहीनस्य सन्तत्यै । त एते होत्रकाः प्रातःसवने षडहस्तोत्रियं शस्त्वा माध्यन्दिनेऽहीनसूक्तानि शंसन्त्या सत्यो यातु मघवा ऋजीषीति । सत्यवन्[1] मैत्रावरुणो अस्मा इदु प्रतवसे तुरायेति ब्राह्मणाच्छंसी । शासद्वह्निर्दुहितुर्नप्त्य गादित्यच्छावाकः । तदाहुः कस्मादच्छावाको वह्निवदेतत् सूक्तमुभयत्र शंसति, स पराक्षु चैवाह सर्वाक्षु चेति । वीर्य्यवान् वा एष बह्वृचः, यदच्छावाकः । वहति ह वै वह्नेर्दधुरः, यासु युज्यते । तस्मादच्छावाको वह्निवदेतत् सूक्तमुभयत्र शंसति, स पराक्षु चैवाह सर्वाक्षु चेति । तानि पञ्चस्वहःसु शस्यन्ते । चतुर्विंशेऽभिजिति विषुवति विश्वजिति महाव्रते तान्येतान्यहीनसूक्तानीत्याचक्षते । न ह्येषु किञ्चन हीयते, पराञ्चि ह वा एतान्यहान्यभ्यावर्त्तीनि भवन्ति । तस्मादेतान्येतेष्वहःसु शस्यन्ते । यदेतानि शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम् । यद्वैवैतानि शंसति, इन्द्रमेवैतैर्निर्ह्वयन्ते, यथा ऋषभं वासितायै ते वै देवाश्च ऋषयश्चाब्रुवन्, समानेन

परुत्परार्य्येषमः० (पा० ५ । ३ । २२) पूर्व—एद्युस् । पूर्वदिने (सूक्तान्तैः) सूक्तानाम् अन्तिमाभिर्ऋग्भिः (समान्यः) तुल्याः ॥

---

१. पू. सं. 'सत्यवान्' इति पाठः ॥ सम्पा० ॥

यज्ञꣳ सन्तन्वामहा इति । तदेतद्यज्ञस्य समानमपश्यत् । समानां प्रगाथां समानीः प्रतिपदः समानानि सूक्तानि ओकःसारी वा इन्द्रो यत्र वा इन्द्रः पूर्वं गच्छति, गच्छत्येव तत्रापरं यज्ञस्यैव सेन्द्रतायै ॥ १५ ॥

इत्यथर्ववेदस्य गोपथब्राह्मणोत्तरभागे पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥

कण्डिका १५ ॥ यज्ञों में अच्छावाक ऋत्विज् के विशेष स्तोत्र ॥

(यः श्वःस्तोत्रियम् अद्यस्तोत्रियस्य अनुरूपं कुर्वन्ति, प्रातःसवने अहीनम् एव तत् अहीनस्य सन्तत्यै सन्तन्वन्ति) जब आगामी दिन में होने वाले स्तोत्रिय [स्तोत्र] को आज होने वाले स्तोत्रिय के अनुरूप [छन्द, देवता आदि से सदृश] करते हैं, प्रातःसवन में अहीन [बहुत दिनों में होने वाले यज्ञ] को ही तब अहीन [पूर्ण व्यवहार] के फैलाव के लिए फैलाते हैं [कण्डिका ११ तथा ऐ० ब्रा० ६ । १७]। (ते एते होत्रकाः प्रातःसवने षडहस्तोत्रियं शंस्त्वा माध्यन्दिने अहीनसूक्तानि शंसन्ति) वे ही यह होत्रक लोग प्रातःसवन में छह दिन वाले यज्ञ के स्तोत्रिय बोलकर माध्यंदिन सवन में अहीन [बहुत दिनों में होने वाले यज्ञ] के सूक्तों को बोलते हैं— (आ सत्यो यातु मघवान् ऋजीषी इति, सत्यवत् मैत्रावरुणः, अस्मा इदु प्र तवसे तुराय इति, ब्राह्मणाच्छंसी, शासद् वह्निर्दुहितुर्नप्त्यं गात् इति, अच्छावाकः) आ सत्यो यातु मघवाँ ऋजीषी··· अथर्व० २० । ७७ । १—८, इस सत्यवत् [सत्य शब्द वाले आठ मन्त्र के सूक्त] को मैत्रावरुण [बोलता है]। (अस्मा इदु प्र तवसे तुराय··· अथर्व० ० । ३५ । १—१६ इस [सोलह मन्त्र वाले सूक्त] को ब्राह्मणाच्छंसी [बोलता है]। (शासद् वह्निर्दुहितुर्नप्त्यं गात् इति··· ऋग्० ३ । ३१ । १—२२, इस [बाईस मन्त्र वाले सूक्त] को अच्छावाक [बोलता है] ॥

(तत् आहुः, कस्मात् अच्छावाकः वह्निवत् एतत् सूक्तम् उभयत्र शंसति सः पराक्षु च एव सर्वाक्षु च आह इति) वे कहते हैं—किसलिये अच्छावाक वह्निवत् [वह्निशब्द वाले] इस सूक्त को दो जगह बोलता है, [अर्थात्] आवृत्ति रहित [चतुर्विंश आदि यज्ञों] में और भी आवृत्ति वाले [षडह आदि यज्ञों] में बोलता है। [समाधान] (वीर्यवान् वै एषः बह्वृचः, यत् अच्छावाकः वह्नेः धुरः ह वै वहति यासु

१५—(यः) यत् । यदा (मघवान्) धनवान् (ऋजीषी) ऋजीष–इनिः । सरलस्वभावः । (सत्यवत्) सत्यशब्दयुक्तं सूक्तम् (अस्मै) संसारहिताय (इत्) एव (उ) विचारे (तवसे) बलाय (तुराय) त्वर त्वरणे—कः । वेगवते (शासत्) शासु अनुशिष्टौ—शतृ । जक्षित्यादयः षट् (पा० ६ । १ । ६) अभ्यस्तसंज्ञात्वात् नुमभावः । अनुशासनं कुर्वन् (वह्निः) वोढा । गृहवाहकः (दुहितुः) नप्तृनेष्टृत्वष्टृ० (उ० २ । ९५) दुह प्रपूरणे–तृच् । इडागमः । सुखस्य पूरयित्र्याः कन्यायाः (नप्त्यम्) नप्तृ–यत् स्वार्थे । रलोपः । नप्तारम् । दौहित्रम्–निरु० ३ । २१ । दुहितृपुत्रम् (गात्) अगमत् । प्राप्नोति । (पराक्षु) परा–अञ्चु गतिपूजनयोः–क्विन् । परा अञ्चति गच्छतीति पराक् । आवृत्तिरहितेषु चतुर्विंशादिषु अहस्सु (आह) ब्रवीति (सर्वाक्षु)

युज्यते) सामर्थ्य वाला ही यह बहुत ऋचायें जानने वाला है जो अच्छावाक है और वह वह्नि [बोझ ले चलने वाले] के बोझों को ही ले जाता है, जिन [बोझों] में वह जोड़ा जाता है। (तस्मात् अच्छावाकः वह्निवत् एतत् सूक्तम् उभयत्र शंसति, सः पराक्षु च एव सर्वाक्षु च आह इति) इसलिये अच्छावाक वह्निवत् [वह्नि शब्द वाले] इस सूक्त को दो जगह बोलता है, [अर्थात्] आवृत्ति रहित [चतुर्विंश आदि यज्ञों] में और भी आवृत्ति वाले [षडह आदि यज्ञों] में बोलता है। (तानि पञ्चसु अहःसु शस्यन्ते, चतुर्विंशे अभिजिति विषुवति विश्वजिति महाव्रते तानि एतानि अहीनसूक्तानि इति आचक्षते हि एषु किंचन न हीयते) वे [सूक्त] पाँच दिन [यज्ञों] में बोले जाते हैं, [अर्थात्] चतुर्विंश में, अभिजित् में, विषुवान् में, विश्वजित् में और महाव्रत में, वे ही यह अहीन [बहुत दिन रहने वाले वा हीनता रहित यज्ञ के] सूक्त हैं—ऐसा कहते हैं, क्योंकि इन [सूक्तों] में कुछ भी [अङ्ग] नहीं छोड़ा जाता है। (पराञ्चि ह वै एतानि अहानि अभ्यावर्तीनि भवन्ति) आवृत्ति रहित ही यह दिन आवृत्ति वाले होते है। (तस्मात् एतानि एतेषु अहःसु शस्यन्ते) इसलिये यह [सूक्त] इन दिनों में बोले जाते हैं। (यत् एतानि शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम्) जो वे इनको बोलते है, वह स्वर्ग लोक का रूप [चिह्न] है। (यत् उ एव एतानि शंसति [शंसन्ति] इन्द्रम् एव निर्ह्वयन्ते, यथा ऋषभं वासितायै) जो ही इन [सूक्तों] को वे बोलते हैं, इन्द्र को ही इनसे वे बुलाते हैं, जैसे गतिमान् [पुरुषार्थी वीर] को निवास करायी हुई प्रजा के लिये [बुलाते हैं] [ऐ० ब्रा० ६ । १८] ॥

(ते वै देवाः च ऋषयः च अब्रुवन्, समानेन यज्ञं सन्तन्वामहै इति) वे ही देव [विजयी पुरुष] और ऋषि लोग [दूरदर्शी पुरुष] बोले—एक से विधान से यज्ञ को हम फैलावें। (तत् एतत् यज्ञस्य समानम् अपश्यत् [अपश्यन्], समानां प्रगाथां समानीः प्रतिपदः समानानि सूक्तानि) सो यह ही यज्ञ के एक से विधान को उन्होंने देखा—अर्थात् एक सी प्रगाथा को, एक सी आरम्भणीया ऋचाओं को और एक से सूक्तों को। (ओकःसारी वै इन्द्रः, यत्र वै इन्द्रः पूर्वं गच्छति तत्र यज्ञस्य एव सेन्द्रतायै अपरम् एव गच्छति) घर घर पहुँचने वाला ही इन्द्र है जहाँ ही इन्द्र पहिले घर जाता है, वहाँ यज्ञ में इन्द्र सहित विद्यमानता के लिये दूसरे [घर] भी जाता है [ऐ० ब्रा० ६ । १७] ॥ १५ ॥

सर्व–अञ्चु गतिपूजनयोः–क्विन्। सर्वम् अञ्चति गच्छतीति सर्वाक्। आवृत्तिसहितेषु षडहगतेषु अहःसु (वीर्यवान्) शक्तिमान् (बह्वृचः) बह्वीनाम् ऋचामध्येता (धुरः) भारान् (हीयते) त्यज्यते (पराञ्चि) आवृत्तिरहितानि (अभ्यावर्तीनि) आवृत्तिसहितानि (ऋषभम्) ऋषिवृषिभ्यां कित् (उ० ३ । १२३) ऋष गतौ दर्शने च—अभच्, कित्। गतिमन्तं पुरुषार्थिनम् (वासितायै) वस निवासे—णिच्—क्तः, टाप्। निवासितायै प्रजायै (समानेन) सदृशेन विधानेन (प्रतिपदः) आरम्भणीया ऋचः (ओकःसारी) गृहेषु सञ्चरणशीलः (सेन्द्रतायै) इन्द्रेण सह वर्तमानतायै ॥

भावार्थः--ऋत्विज् लोग समय के अनुकूल मन्त्रों से देवताओं का आवाहन करें ॥ १५ ॥

विशेषः १--इस कण्डिका को ऐ० ब्रा० ६ । १७, । ६ । १८ से मिलाओ ॥

विशेषः २--प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ।

१--आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः । तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः--अथर्व० २० । ७७ । १--८, ऋ० ४ । १६ । १--८ ॥ (सत्यः) सच्चा [सत्यवादी, सत्यकर्मी]. (मघवान्) महाधनी, (ऋजीषी) सरल स्वभाव वाला [राजा] (आ यातु) आवे और (अस्य) इस [राजा] के (हरयः) मनुष्य (नः) हमारे (उप द्रवन्तु) पास आवें । (तस्मै) उसके लिये (इत्) ही (सुदक्षम्) सुन्दर बल वाला (अन्धः) अन्न (सुषुम) हमने सिद्ध किया है, (गृणानः) उपदेश करता हुआ वह (इह) यहाँ (अभिपित्वम्) मेल मिलाप (करते) करे ॥ [सूक्त में आठ मन्त्र हैं, शेष के लिये वेद देखो] ॥

२--अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय । ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा--अथर्व० २० । ३५ । १--१६ ऋ० १ । ६१ । १--१६ ॥ (अस्मै) इस [संसार] के हित के लिए (इत्) ही (उ) विचार पूर्वक (तवसे) बल के निमित्त, (तुराय) फुर्तीले (माहिनाय) पूजनीय, (ऋचीषमाय) स्तुति के समान गुण वाले, (अध्रिगवे) वे रोग गति वाले, (इन्द्राय) इन्द्र [बड़े ऐश्वर्य वाले सभापति] के लिए (स्तोमम्) स्तुति को (ओहम्) पूरे विचार को और (राततमा) अत्यन्त देने योग्य (ब्रह्माणि) धनों को (प्रयः न) तृप्ति करने वाले अन्न के समान (प्र हर्मि) मैं आगे लाता हूँ [सूक्त में १६ मन्त्र हैं, शेष के लिए वेद देखो] ॥

३--शासद् वह्निर्दुहितुर्नप्त्यं गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन् । पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे--ऋ० ३ । ३१ । १--२२ ॥ (विद्वान्) जानकार (वह्निः) वह्नि [घर का चलाने वाला पिता] (ऋतस्य) सत्य नियम के (दीधितिम्) धारण करने वाले [जामाता] को (शासत्) शिक्षा देता हुआ और (सपर्यन्) पूजता हुआ (दुहितुः) पुत्री से (नप्त्यम्) नाती [नाती के समान दोहते] को (गात्) पाता है, (यत्र) जहाँ [गृहस्थ व्यवहार में] (दुहितुः) पुत्री के (सेकम्) सेचन [सींचे हुए पुत्र] को (ऋञ्जन्) समर्थ पाता हुआ (पिता) वह पिता (शग्म्येन) सुखी (मनसा) मन के साथ (सं दधन्वे) संगत होता है, [अर्थात् पुत्रहीन पिता बेटी से दोहते को लेकर नाती के समान अपना दायभागी करता और सुखी होता है ॥ यह मन्त्र निरु० ३ । ४ और ५ में व्याख्यात है । सूक्त में २२ मन्त्र हैं, शेष के लिए वेद देखो] ॥

इति श्रीमद्राजाधिराज-प्रथितमहागुणमहिम-*श्रीसयाजीराव-गायकवाडाधिष्ठित-बडोदेपुरीगत-श्रावणमासदक्षिणापरीक्षायाम्* ऋक्सामाथर्ववेदभाष्येषु

लब्धदक्षिणेन *श्री पण्डित क्षेमकरणदास त्रिवेदिना* अथर्ववेदभाष्यकारेण कृते गोपथब्राह्मणभाष्योत्तरभागे पञ्चमः प्रपाठकः समाप्तः ।।

अयं प्रपाठकः प्रयागनगरे फाल्गुनमासे शुक्लपक्षे पञ्चम्यां तिथौ १९८० [अशीत्युत्तरैकोनविंशतिशतके] विक्रमीये संवत्सरे समाप्तिमगात् ।।

मुद्रितम्—कार्तिककृष्ण ८ संवत् १९८० वि० ता० २१ अक्टूबर सन् १९२४ ई० ।।

अथ षष्ठः प्रपाठकः ।।

कण्डिका १ ।।

ओम् । तान्वा एतान् सम्पातान् विश्वामित्रः प्रथममपश्यत्, एवा त्वामिन्द्र वज्रिन्नत्र, यत्र इन्द्रो जुजुषे यच्च वष्टि कथा महामवृधत् कस्य होतुरिति । तान् विश्वामित्रेण दृष्टान् वामदेवो असृजत । स हेक्षाञ्चक्रे विश्वामित्रो यान् वाहं सम्पातानदर्शंस्तान्वामदेवो असृजत । कानि न्वहं हि सूक्तानि सम्पातांस्तत्प्रतिमान् सृजेयमिति । स एतानि सूक्तानि सम्पातांस्तत्प्रतिमानसृजत, सद्यो ह जातो वृषभः कनीन, उदु ब्रह्माण्यैरत श्रवस्याभितष्टेव दीधया मनीषामिति विश्वामित्रः । इन्द्रः पूर्भिदातिरद्दासमर्कैर्य एक इद्धव्यश्चर्षणीनां यस्तिग्मशृङ्गो वृषभो न भीम इति वसिष्ठः । इमामू षु प्रभृतिं सातये धा इच्छन्ति त्वा सोम्यासः सखायः शासद्वह्निर्दुहितुर्नप्त्यङ्गादिति भरद्वाजः । एतैर्वै सम्पातैरेत ऋषय इमान् लोकान् समपतन् । तद्यत्समपतन्, तस्मात् सम्पाताः, तत् सम्पातानां सम्पातत्वम् । ततो वा एतांस्त्रीन् सम्पातान् मैत्रावरुणो विपर्य्यासमेकैकमहरहः शंसति, एवा त्वामिन्द्र वज्रिन्नत्रेति प्रथमेऽहनि, यत्र इन्द्रो जुजुषे यच्च वष्टीति द्वितीये, कथा महामवृधत् कस्य होतुरिति तृतीये । त्रीनेव सम्पातान् ब्राह्मणाच्छंसी विपर्य्यासमेकैकमहरहः शंसति, इन्द्रः पूर्भिदातिरद्दासमर्कैरिति प्रथमेऽहनि, य एक इद्धव्यश्चर्षणीनामिति द्वितीये, यस्तिग्मशृङ्गो वृषभो न भीम इति तृतीये । त्रीनेव सम्पातानच्छावाको विपर्यासमेकैकमहरहः शंसति, इमामू षु प्रभृतिं सातये धा इति प्रथमेऽहनि, इच्छन्ति त्वा सोम्यासः सखाय इति द्वितीये, शासद्वह्निर्दुहितुर्नप्त्यङ्गादिति तृतीये । तानि वा एतानि नव त्रीणि चाहरहः शंस्यानि । तानि द्वादश भवन्ति । द्वादश ह वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिर्यज्ञः, तत् संवत्सरं प्रजापतिं यज्ञमाप्नोति । तस्मिन् संवत्सरे प्रजापतौ यज्ञे अहरहः प्रतितिष्ठन्तो यन्ति, प्रतितिष्ठन्ते । इदं सर्वमनु प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । तान्यन्तरेणावापमावपेरन्, अन्यूह्य विराजश्चतुर्थेऽहनि, वैमदीश्च पङ्क्तीः पञ्चमे, पारुच्छेपीः षष्ठेऽथ यान्यन्यानि महास्तोत्राण्यष्टच्चान्यावपेरन् ।। १ ।।

कण्डिका १ ।। अहीन यज्ञ में सम्पात सूक्तों का वर्णन ।।

(ओम्) ओम् [हे रक्षक परमेश्वर] । (तान् वै एतान् सम्पातान् विश्वामित्रः प्रथमम् अपश्यत्, एवा त्वामिन्द्र वज्रिन्नत्र, यत्र इन्द्रो जुजुषे यच्च वष्टि, कथा

महामवृधत् कस्य होतुः—इति) उन ही इन सम्पातों [भली भाँति प्राप्ति योग्य वा ऐश्वर्ययुक्त ज्ञान वाले सूक्त विशेषों] को विश्वामित्र [सब के मित्र वा सब के प्यारे ऋषि] ने पहिले ही पहिले देखा [विचारा]—एवा त्वामिन्द्र·····ऋ० ४ । १९ । १—११, यन्न इन्द्रो जुजुषे यच्च वष्टि····· ऋ० ४ । २२ । १–११, और कथा महामवृधत् कस्य होतुः····· ऋ० ४ । २३ । १–११ । (विश्वामित्रेण दृष्टान् तान् वामदेवः असृजत) विश्वामित्र के देखे हुए उन [तीन सम्पातों] को वामदेव [श्रेष्ठ विद्वान् ऋषि] ने प्रकट कर दिया । (सः ह विश्वामित्रः ईक्षाञ्चक्रे, अहं वा यान् सम्पातान् अदर्शम् तान् वामदेवः असृजत) उस ही विश्वामित्र ने देखा [विचारा]—मैंने जिन सम्पातों को देखा था, इनको वामदेव ने प्रकट कर दिया । (कानि नु अहं सूक्तानि हि तत्प्रतिमान् सम्पातान् सृजेयम् इति) कौन से सूक्तों को अब मैं उनके सदृश सम्पात प्रकट करूँ । (सः एतानि सूक्तानि तत्प्रतिमान् सम्पातान् असृजत—सद्यो ह जातो वृषभः कनीनः, उदु ब्रह्माण्यैरत श्रवस्या, अभि तष्टेव दीधया मनीषाम् इति विश्वामित्रः, इन्द्रः पूर्भिदातिरद्दासमर्कैः, य एक इद्धव्यश्चर्षणीनाम्, यस्तिग्मशृङ्गो वृषभो न भीमः इति वसिष्ठः, इमामू षु प्रभृतिं सातये धाः, इच्छन्ति त्वा सोम्यासः सखायः, शासद् वह्निर्दुहितुर्नप्त्यं गात् इति भरद्वाजः) उसने इन सूक्तों को उनके सदृश सम्पात प्रकट किया—सद्यो ह जातो वृषभो कनीनः·····ऋ० ३ । ४८ ।१—५, उदु ब्रह्माण्यैरत श्रवस्या····· ऋ० ७ । २३ । १–६, अभि तष्टेव दीधया मनीषाम्·····ऋ० ३ । ३८ । १–१०, इन [तीन सूक्तों] के विश्वामित्र [ऋषि] हैं, इन्द्रः पूर्भिदातिरद्दासमर्कैः—ऋ० ३ । ३४ । १–११, यः एकइद् धव्यश्चर्षणीनाम्—ऋ० ६ । २२ । १–११, यस्तिग्मशृङ्गो वृषभो न भीमः—ऋ० ७ । १९ । १–११, इन [तीन सूक्तों] के वसिष्ठ [ऋषि] हैं, इमामू षु प्रभृतिं सातये धाः—ऋ० ३ । ३६ । १—९, इच्छन्ति त्वा सोम्यासः सखायः—ऋ० ३ । ३१ । १–२२, शासद् वह्निर्दुहितुर्नप्त्यं गात्····· ऋ० ३ । ३० । १—२२, इन [तीन सूक्तों] के भरद्वाज [ऋषि] हैं । (एतैः वै सम्पातैः एते ऋषयः इमान् लोकान् समपतन्) इन ही सम्पातों [प्राप्ति योग्य ज्ञानों] से इन ऋषियों ने इन लोकों को पाया । (तत् यत् समपतन् तस्मात् सम्पाताः, तत् सम्पातानां सम्पातत्वम्) सो जो उन्होंने [लोकों को] अच्छे प्रकार पाया, इसी से वे सम्पात [अच्छे प्रकार पाने योग्य ज्ञान] हैं, वह ही सम्पातों का सम्पातत्व [अच्छे पाने योग्य धर्म है]। (ततः वै एतान् त्रीन् सम्पातान् मैत्रावरुणः विपर्यासम् एकैकम् अहरहः शंसति, एवा त्वामिन्द्र वज्रिन्नत्र इति–प्रथमे अहनि, यन्न इन्द्रो जुजुषे यच्च वष्टि इति द्वितीये, कथा महामवृधत् कस्य होतुः इति तृतीये) फिर ही इन तीन सम्पातों

१—(सम्पातान्) सम्+पत गतौ ऐश्वर्ये च–घञ्, अथवा पा रक्षणे—क्तः । सम्पतनशीलान् । सम्यक् प्राप्तव्यान् सम्यगैश्वर्ययुक्तान् बोधान् । सूक्तविशेषान् (अपश्यत्) दृष्टवान् । वेदमध्ये ज्ञातवान् (जुजुषे) जुषते । सेवते (वष्टि) कामयते (कथा) केन प्रकारेण (महाम्) महान्तम् (अवृधत्) वर्धते

को मैत्रावरुण ऋत्विज् उलटे क्रम से एक एक को दिन दिन बोलता है—[अर्थात्] एवा त्वामिन्द्र वज्रिन्नश्व—इस [सम्पात] को पहिले दिन में, यन्न इन्द्रो जुजुषे यच्च वष्टि—इसको दूसरे में, कथा महामवृधत् कस्य होतुः—इसको तीसरे में ।

(त्रीन् एव सम्पातान् ब्राह्मणाच्छंसी विपर्य्यासम् एकैकम् अहरहः शंसति, इन्द्रः पूर्भिदातिरद्दासमर्कैः—इति प्रथमे अहनि, य एक इद् वव्यश्चर्षणीनाम्—इति द्वितीये, यस्तिग्मशृङ्गो वृषभो न भीमः—इति तृतीये) तीन ही सम्पातों को ब्राह्मणाच्छंसी उलटे क्रम से एक एक को दिन दिन बोलता है—[अर्थात्] इन्द्रः पूर्भिदातिरद् दासमर्कैः—इसको पहिले दिन में, यः एक इद्धव्यश्चर्षणीनाम्—यह दूसरे में, यस्तिग्मशृङ्गो वृषभो न भीमः—यह तीसरे में । (त्रीन् एव सम्पातान् अच्छावाकः विपर्य्यासम् एकैकम् अहरहः शंसति, इमामू षु प्रभृतिं सातये धाः—इति प्रथमे अहनि इच्छन्ति त्वा सोम्यासः सखायः—इति द्वितीये, शासद् वह्निर्दुहितुर्नप्त्यं गात्—इति तृतीये) तीन ही सम्पातों को अच्छावाक उलटे क्रम से एक एक को दिन दिन बोलता है—इमामू षु प्रभृतिं सातये धाः—यह पहिले दिन में, इच्छन्ति त्वा सोम्यासः सखायः—यह दूसरे में, शासद् वह्निर्दुहितुर्नप्त्यं गात्—यह तीसरे में । (तानि त्रीणि वै एतानि नव च अहरहः शंस्यानि) वे तीन [वामदेव वाले] और यह नौ [विश्वामित्र, वसिष्ठ और भरद्वाज वाले सूक्त] दिन दिन बोलने चाहियें । (तानि द्वादश भवन्ति) वे बारह होते हैं । (द्वादशह वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिः यज्ञः, तत् प्रजापतिं संवत्सरं यज्ञम् आप्नोति) बारह ही महीने संवत्सर हैं, संवत्सर प्रजापति है और प्रजापति यज्ञ है, इसलिए प्रजापति, संवत्सर और यज्ञ को वह [यजमान] पाता है । (तस्मिन् प्रजापतौ संवत्सरे यज्ञे अहरहः प्रतितिष्ठन्तः यन्ति, प्रतितिष्ठन्ते) उस प्रजापति, संवत्सर और यज्ञ में दिन दिन दृढ़ बैठे हुए वे चलते हैं और प्रतिष्ठा पाते हैं । (इदं सर्वम् अनु प्रतितिष्ठति) इस सब [कर्म] के पीछे पीछे मनुष्य प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) प्रजा के साथ और पशुओं के साथ वह प्रतिष्ठा [बड़ाई] पाता है जो ऐसा विद्वान् है । (तानि अन्तरेण आवापम् आवपेरन्, अन्यूङ्खाः विराजः चतुर्थे अहनि, वैमदीः च पङ्क्ती पञ्चमे, पारुच्छेपीः षष्ठे) उन

(असृजत) प्रकटीकृतवान् (ईक्षांचक्रे) विचारितवान् (वा) वै । एव (तत्-प्रतिमान्) तैः सदृशान् (सृजेयम्) प्रकटीकरवाणि (कनीनः) गो० उ० ४ । १ । दीप्तिमान् (उद् ऐरत) ईर गतौ—लङ् । ते उदीरितवन्तः । उच्चारितवन्तः (उ) एव (ब्रह्माणि) वेदज्ञानानि (श्रवस्या) श्रवसे यशसे हितानि (तष्टा) सूक्ष्मीकरणशीलः (दीधय) प्रकाशय (मनीषाम्) प्रज्ञाम् (चर्षणीनाम्) कृषेरादेश्च चः (उ० २ । १०४) कृष विलेखने—अनिः, कस्य चः । मनुष्याणाम् —निघ० २ । ३ (सोम्यासः) सोममर्हति यः (पा० ४ । ४ । १३७) सोम—यः । तत्त्वरसयोग्याः (समपतन्) सम्यक् प्राप्तवन्तः (विपर्य्यासम्) वि+परि+असु क्षेपे-घञ् । यथा भवति तथा विपर्य्यासेन । विपरीतक्रमेण (आवापम्) आ उप्यते स्थाप्यते । डुवप बीजतन्तुसन्ताने—घञ् । प्रक्षेपणीयम् (आवपेरन्)

[सूक्तों] में आवाप [क्षेपक सूक्त] को वे [ऋत्विज्] डालें--[अर्थात् न्यूङ्ख को छोड़कर विराट् छन्द छह दिन वाले यज्ञ के] चौथे दिन में, वैमदी [विमदी अर्थात् विमद ऋषि की देखी हुई ऋचायें] पङ्क्ति छन्द वाली पाचवें में, और पारुच्छेपी [परुच्छेपी अर्थात् परुच्छेप ऋषि की देखी हुई ऋचायें] छठे में [इस विषय में विशेषः ४ देखो] (अथ यानि अन्यानि महास्तोत्राणि अष्टर्चानि, आवपेरन्) जो दूसरे महास्तोत्र आठ ऋचा वाले हैं, [उनको] आवाप [क्षेपणीय] बनावें [कण्डिका २ देखो] ॥१॥

भावार्थः—यज्ञ में ठीक ठीक मन्त्रों के प्रयोग से ऋत्विज् लोग यजमान को स्वर्ग में पहुँचाते हैं ॥ १ ॥

विशेषः १—इस कण्डिका को ऐतरेय ब्राह्मण ६ । १८ तथा ६ । १९ से मिलाओ ।

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित दिये जाते हैं ॥

१—एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः । महामुभे रोदसी वृद्धमृष्वं निरेकमिद् वृणते वृत्रहत्ये--ऋ० ४ । १९ । १—११, वामदेव ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ । शेष मन्त्र वेद में देखो ।

२—यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान् करति शुष्म्या चित् । ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति--ऋग्० ४ । २२ । १—११, वामदेव ऋषि ॥ (यत् इन्द्रः) जो इन्द्र [बड़े ऐश्वर्य वाला राजा] (नः) हमें (जुजुषे) सेवता है (च) और (यत्) जो (वष्टि) चाहता है, (तत्) वह (महान्) महान् [पूजनीय], (शुष्मी) अति बली (नः) हम को (चित्) ही (आ करति) स्वीकार करे, (यः) जो (मघवा) महाधनी [राजा] (ब्रह्म) बहुत धन वा अन्न, (स्तोमम्) प्रशंसनीय गुण, (सोमम्) तत्त्वरस, (उक्था) प्रशंसनीय वस्तुओं और (अश्मानम्) मेघ [के समान उपकारी गुण] को (शवसा) बल के साथ (बिभ्रत्) धारण करता हुआ (एति) चलता है ॥ [शेष मन्त्र वेद में देखो] ॥

३—कथा महामवृधत् कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः । पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय--ऋ० ४ । २३ । १—११, वामदेव ऋषि ॥ (कथा) किस प्रकार से (कस्य होतुः) किस दानी के (महाम्) बड़े (यज्ञम्) यज्ञ [सङ्गति योग्य व्यवहार] को (जुषाणः) सेवन करता हुआ वह [इन्द्र विद्वान्] (ऊधः) निवाहने वाले (सोमम् अभि) सोम [तत्त्वरस] के लिये (अवृधत्) बढ़ता है । [उस सोम को] (उशानः) चाहता हुआ (पिबन्) पीता हुआ, और (जुषमाणः) प्रसन्न होता हुआ (ऋष्वः) वह महान् पुरुष (अन्धः) अन्न (ववक्ष) पहुँचाता है, और (धनाय) धन के लिये (शुचते) सोचता है ॥ [शेष मन्त्र वेद में देखो] ॥

प्रक्षिपेयुः (अन्यूङ्खाः) न्यूङ्खाख्याभिर्ऋग्भी रहिताः (वैमदीः) विमद—अण्, ङीप् । विमदाख्येन महर्षिणा दृष्टाः (पारुच्छेपीः)—ऐ० ब्रा० ६ । १९ । परुच्छेपेण दृष्टाः ॥

४—सद्यो ह जातो वृषभः कनीनः—·· ·····ऋ० ३ । ४८ । १—५, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ ॥ शेष मन्त्र वेद मे देखो ॥

५—उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ । आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि—अथर्व० २० । १२ । १—६, ऋग्० ७ । २३ । १ ६, वसिष्ठ ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ ॥ शेष मन्त्र वेद में देखो ॥

६—अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः । अभिप्रियाणि मर्मृशत् पराणि कवीँरिच्छामि संदृशे सुमेधाः—ऋ० ३ । ३८ । १—१० । विश्वामित्र के गोत्र का प्रजापति, अथवा वाच्य वाक् का पुत्र, अथवा प्रजापति और वाच्य दोनों, अथवा विश्वामित्र ही ऋषि—शाकलर्क संहिता और सायण भाष्य ॥ [हे इन्द्र विद्वन् !] (तष्टा इव) बढ़ई के समान और (सुधुरः) बहुत बोझ उठाने वाले, (अत्यः) लगातार चलने वाले (वाजी न) घोड़े के सदृश (जिहानः) चलता हुआ तू (मनीषाम्) बुद्धि को (अभि) सब ओर से (दीधय) प्रकाशित कर, (प्रियाणि) प्रिय और (पराणि) श्रेष्ठ कर्मों को (अभि ममृशत्) सब ओर से विचारता हुआ (सुमेधाः) उत्तम बुद्धि वाला मैं (कवीन्) बड़े विद्वानों को (सन्दृशे) ठीक ठीक दर्शन के लिए (इच्छामि) चाहता हूँ ॥ [शेष मन्त्र वेद में देखो] ॥

७—इन्द्रः पूर्भिदातिरद् दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् । ब्रह्मजतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे—ऋ० ३ । ३४ । १—११, विश्वामित्र ऋषि—अथर्व० २० । ११ । १—११ ॥ यह मन्त्र आ चुका है—गो० उ० ४ । २, शेष मन्त्र वेद में देखो ॥

८—य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः । यः पत्यते वृषभो वृष्ण्यावान् त्सत्यः सत्वा पुरुमायः सहस्वान्—ऋ० ६ । २२ । १—११, भरद्वाज ऋषिः । अथर्व० २० । ३६ । १—११ ॥ (तम्) उस (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले परमात्मा] को (आभिः) इन (गीर्भिः) वाणियों से (अभि) सब प्रकार (अर्चे) मैं पूजता हूँ । (यः) जो (एकः) अकेला (इत्) ही (चर्षणीनाम्) मनुष्यों के बीच (हव्यः) ग्रहण करने योग्य है और (यः) जो (वृषभः) श्रेष्ठ (वृष्ण्यावान्) पराक्रम वाला (सत्यः) सच्चा (सत्वा) वीर (पुरुमायः) बहुत बुद्धि वाला और (सहस्वान्) महाबलवान् (पत्यते) स्वामी है ॥ [शेष मन्त्र वेद में देखो] ॥

९—यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः । यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः—ऋ० ७ । १९ । १—११, वसिष्ठ ऋषि, अथर्व० २० । ३७ । १—११ ॥ (एकः) अकेला [वही] (विश्वाः) सब (कृष्टीः) मनुष्य प्रजाओं को (प्र) अच्छे प्रकार (च्यावयति) चलाता है, (यः) जो (तिग्मशृङ्गः न) तीखी किरणों वाले सूर्य के समान (भीमः) भयङ्कर और (वृषभः) वर्षा करने वाला है । और (यः) जो तू (शश्वतः) निरन्तर (अदाशुषः)

न देने वाले के (गयस्य) घर का (वेदः) धन (सुश्वितराय) अधिक ऐश्वर्य वाले व्यवहार के लिए (प्रयन्ता) देने वाला (असि) है ॥ [शेष मन्त्र वेद में देखो] ॥

१०—इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्ादमानः । सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत्—ऋ० ३ । ३६ । १—९, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । ३ ॥ शेष मन्त्र वेद में देखो ॥

११—इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि । तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः—ऋ० ३ । ३० । १—२२, विश्वामित्र ऋषि ॥ (सोम्यासः) तत्त्वरस के योग्य [ब्रह्मज्ञानी] (सखायः) मित्र लोग (त्वा) तुझे (इच्छन्ति) चाहते हैं, (सोमम्) ऐश्वर्य को (सुन्वन्ति) सिद्ध करते हैं, (प्रयांसि) तृप्त करने वाले अन्न आदि वस्तुयें (दधति) धारण करते हैं और (जनानाम्) मनुष्यों की (अभिशस्तिम्) सब ओर से हिंसा का (आ तितिक्षन्ते) भले प्रकार सहते हैं, (हि) क्योंकि, (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले वीर] (त्वत्) तुझसे [अधिक] (प्रकेतः) उत्तम बुद्धिवाला (कः चन) कौन सा है ? ॥ शेष मन्त्र वेद में देखो ॥

१२—शासद् वह्निर्दुहितुर्नप्त्यं गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन् । पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे—ऋ० ३ । १ । १—२०, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है । गो० उ० ५ । १५ ॥ शेष मन्त्र वेद में देखो ॥

विशेषः ३—(अन्यूङ्खा विराजः—इत्यादि) न्यूङ्ख रहित । विराट् छन्द, वैमदी, पङ्क्ति, और पारुच्छेपी ऋचायें । (यज्ञकर्मण्यजपन्यूङ्खसामसु पाणिनि १ । २ । ३४) यज्ञ कर्म में जप, न्यूङ्ख और साम गान को छोड़ कर एक श्रुति स्वर हो—यहाँ न्यूङ्ख शब्द आया है । सोलह प्रकार के ओङ्कार सहित वेद मन्त्र न्यूङ्ख कहाते हैं । सायण भाष्य ऐ० ब्रा० ६ । १९ में अन्यूङ्ख आदि इस प्रकार माने हैं—(न ते गिरो अपि मृष्ये—ऋ० ७ । २२ । ५–८) तथा (प्र वो महे महिवृधे भरध्वं—ऋ० ७ । ३१ । १०–१२) यह सात विराट् ऋचायें हैं जिनका प्रयोग न्यूङ्ख बिना होता है ॥

(यजामह इन्द्रं—ऋ० १० । २३ । १—७) यह सात ऋचायें वैमदी हैं, अर्थात् इन के विमद ऋषि हैं । (यच् चिद्धि सत्य सोमपा ऋ० १ । २९ । १—७) यह सात ऋचायें पङ्क्ति छन्द वाली हैं ॥

(इन्द्राय हि द्यौरसुरो—ऋ० १ । १३१ । १—७) यह सात ऋचायें पारुच्छेपी हैं, इन के परुच्छेप ऋषि हैं ॥

कण्डिका २ ॥

को अद्य नर्यो देवकाम इति मैत्रावरुणः । वने न वा यो न्यधायि चाक-न्निति ब्राह्मणाच्छंसी । आ याह्यर्वाङुप बन्धुरेष्ठा इत्यच्छावाकः । एतानि वा आवपनानि, एतैरेवावपनैर्देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यज-

माना एतैरेवावपनैः स्वर्गं लोकं यन्ति । सद्यो ह जातो वृषभः कनीन इति मैत्रावरुणः पुरस्तात् सम्पातानामहरहः शंसति । तदेतत् सूक्तं स्वर्ग्यमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदृषभवत् पशुमद्भवति पशूनामाप्त्यै । तत्पञ्चर्चं भवति, अन्नं वै पङ्क्तिः, अन्नाद्यस्यावरुद्ध्यै, अरिष्टैर्नः पथिभिः पारयन्तेति स्वर्गताया एवैतदहरहः शंसति । उदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी । ब्रह्मण्वदेतत् सूक्तं समृद्धमेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गं लोकमायन् । तथैवैतद्यजमाना एतेनैव सूक्तेन स्वर्गं लोकं यन्ति । तदु वै षडर्चं, षड् वा ऋतवः ऋतूनामाप्त्यै । तदुपरिष्टात् सम्पातानामहरहः शंसति । अभि तष्टेव दीधया मनीषामित्यच्छावाकोऽहरहः शंसति । अभिवदति तत्यै रूपमभिप्रियाणि मर्मृशत्परागीति, यान्येव पराण्यहानि, तानि प्रियाणि, तान्येव तदभिमर्मृशन्तो यन्त्यभ्यारभमाणाः परो वा अस्माल्लोकात् स्वर्गो लोकः, स्वर्गमेव तं लोकमभिमृशन्ति । कवीँरिच्छामि मन्दृशे सुमेधा इति, ये ह वा अनेन पूर्वे प्रीतास्ते वै कवयः तानेव तदभ्यभिवदति । यदु वै दशर्चं, दश वै प्राणाः, प्राणानेव तदाप्नोति प्राणानां सन्तत्यै । यदु वै दशर्चं, दश वै पुरुषे प्राणाः, दश स्वर्गा लोकाः, प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नोति । प्राणेषु चैवैतत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति । यदु वै दशर्चं, दशाक्षरा विराड् *इयं वै वि[1]राड्* इय वै स्वर्गस्य लोकस्य प्रतिष्ठा, तदेतदस्यां प्रतिष्ठायां प्रतिष्ठापयति । सकृदिन्द्रं निराह तेने[2]न्द्राद्रूपान्न प्रच्यवते, तदुपरिष्टात् सम्पातानामहरहः शंसति ।। २ ।।

कण्डिका २ ॥ अहीन यज्ञ में आवाप सूक्तों का वर्णन और महत्त्व ॥

(को अद्य नर्यः देवकामः इति मैत्रावरुणः) को अद्य नर्यः देवकामः—ऋ० ४ । २५ । १—८, इस सूक्त को मैत्रावरुण [अहीन यज्ञ में बोलता है] । (वने न वा यो न्यधायि चाकन्—इति ब्राह्मणाच्छंसी) वने न वा यो न्यधायि चाकन्—ऋ० १० । २९ । १—८, इस सूक्त को ब्राह्मणाच्छंसी [बोलता है] । (आ याह्यर्वाङुप बन्धुरेष्ठाः—इति अच्छावाकः) आ याह्यर्वाङुप बन्धुरेष्ठाः—ऋ० ३ । ४३ । १—८, इस सूक्त को अच्छावाक [बोलता है] । (एतानि वै आवपनानि, एतैः एव आवपनैः देवाः च ऋषयः च स्वर्गं लोकम् अायन्) यह ही आवपन [क्षेपणीय सूक्त] हैं, इन ही आवपनों से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्गलोक पाया है । (तथा एव एतत्, यजमानाः एतैः एव आवपनैः स्वर्गं लोकं यन्ति) वैसे ही यह है—यजमान लोग

२—(अद्य) इदानीम् (नर्यः) नृषु साधुः (देवकामः) देवान् विदुषः कामयमानः (वने) अरण्ये वृक्षे (न) इव (वायः) शकुनिः (नि अधायि) निहितः (चाकन्) कामयमानः । उत्सुकमनाः (आ याहि) आगच्छ (अर्वाङ्)

---

१. पुष्पाङ्कितः पाठः जर्मनसंस्करणे नास्ति ॥

२. पू. सं. 'तेनेन्द्रात्' इति पाठः ॥ सम्पा० ॥

इन ही आवपनों से स्वर्गलोक पाते हैं। (सद्यो ह जातो वृषभः कनीनः—इति मैत्रावरुणः सम्रातानां पुरस्तात् अहरहः शंसति) सद्यो ह जातः वृषभः कनीनः—ऋ० ३ । ४८ । १—५, गो० उ० ४ । १,—इस सूक्त को मैत्रावरुण सम्पातों से पहिले [कण्डिका १] दिन दिन बोलता है। (तत् एतत् सूक्त स्वर्ग्यं एतेन सूक्तेन देवाः च ऋषयः च स्वर्गं लोकम् आयन्) सो यह सूक्त स्वर्ग के लिए हितकारी है, इस सूक्त से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्गलोक पाया है। (तथा एव एतत् यजमानाः एतेन एव सूक्तेन स्वर्गं लोकं यन्ति) वैसे ही यह है—यजमान लोग इस ही सूक्त से स्वर्ग लोक पाते हैं। (तत् ऋषभवत् पशुमत् पशूनाम् आप्त्यै भवति) वह ऋषभ [वृषभ] शब्द वाला पशु युक्त [सूक्त] पशुओं की प्राप्ति के लिये हैं [ऋषभ वा वृषभ बैल भी है और वह पशु है]। (तत् पञ्चर्चं भवति, अन्नं वै पङ्क्तिः अन्नाद्यस्य अवरुद्ध्यै) वह पाँच ऋचा वाला [सूक्त] है, अन्न भी पङ्क्ति [पाँच तत्त्व वाला] है। खाने योग्य अन्न की प्राप्ति के लिए है [पंचभूतात्मके देहे आहारः पाञ्चभूतिकः। विपक्वः पंचधा सम्यग् गुणान् स्वानभिवर्धयेत्—सुश्रुत—आहारविधिः। पृथिवी जल अग्नि वायु आकाश इन पाँच तत्त्वों से बने देह में आहार पाँच तत्त्वों के स्वरूप का है, अच्छे प्रकार पका हुआ आहार पाँच प्रकार अपने गुणों को बढ़ाता है—जैसे पार्थिव गुण गन्ध को बढ़ाता है, इसी प्रकार और भी जानो]। (अरिष्टैः नः पथिभिः पारयन्ता इति स्वर्गतायै एव एतत् अहरहः शंसति) अरिष्टैनैः पथिभिः पारयन्ता [सं वां कर्मणा—ऋ० ६ । ६९ । १, इस मन्त्र का यह चौथा पाद है, देखो गो० उ० ४ । १७] स्वर्ग की प्राप्ति के लिए ही इसको वह [मैत्रावरुण] बोलता है। (उदु ब्रह्माण्यैरत श्रवस्या इति ब्राह्मणाच्छंसी) उदु ब्रह्माण्यैरत श्रवस्या—ऋ० ७ । २३ । १—६ । गो० उ० ४ । १ तथा ६ । १, इस सूक्त को ब्राह्मणाच्छंसी [बोलता है]। (ब्रह्मण्वत् एतत् समृद्धं सूक्तम्, एतेन सूक्तेन देवाः च ऋषयः च स्वर्गं लोकम् आयन्) ब्रह्मन् [ब्रह्माणि] शब्द वाला यह समृद्ध सूक्त है, इस सूक्त से देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शक महात्माओं] ने स्वर्ग लोक पाया है। (तथा एव एतत्, यजमानाः एतेन सूक्तेन स्वर्गं लोक यन्ति) उसी प्रकार ही यह है—यजमान लोग इस ही सूक्त से स्वर्ग लोक पाते हैं। (तत् उ वै षडर्चं, ऋतवः, ऋतूनाम् आप्त्यै) यह सूक्त छह ऋचा वाला है, छह ही ऋतुयें हैं, ऋतुओं की प्राप्ति के लिये [यह सूक्त है]। (तत् सम्पातानाम् उपरिष्टात् अहरहः शंसति) उसको सम्पात सूक्तों के उपरान्त [क० १] दिन दिन वह पढ़ता है॥

(अभि तष्टेव दीधया मनीषाम्—इति अच्छावाकः अहरहः शंसति) अभि तष्टेव दीधया मनीषाम्—ऋ० ३ । ३८ । १—१० गो० उ० ६ । १, इस सूक्त को

अभिमुखः (उप) समीपे (बन्धुरेष्ठाः) मद्गुरादयश्च (उ० १ । ४१) बन्ध बन्धने—उरच्, बन्धुर—तिष्ठतेर्विच्। बन्धुरे बन्धनयुक्ते रम्ये वा रथे तिष्ठन् (आवपनानि) आवपनेयानि। प्रक्षेपणीयानि सूक्तानि (ऋषभवत्) ऋषभेण वृषभशब्देन युक्तम् (पङ्क्तिः) पचि व्यक्तीकरणे, विस्तारे—क्तिन् क्तिच् वा। पञ्चावयवा श्रेणिः पञ्चतत्त्वयुक्तत्वात् (अरिष्टैः) गो० उ० ४ । १६। अहिंसितैः (पारयन्ता) पारं गमयन्तौ (अभिवदति) अभिशब्दयुक्तं सूक्तं ब्रूते (तत्यै)

अच्छावाक दिन दिन बोलता है। (अभिवदति तत्यै रूपम्, अभिप्रियाणि मर्मृशत् पराणि, इति यानि एव पराणि अहानि, तानि प्रियाणि तानि एव तत् अभिममृशन्तः अभ्यारभमाणाः यन्ति) अभि, [सब ओर], शब्द वाला [पहिला पाद] वह बोलता है, वह विस्तार के लिये रूप है, अभिप्रियाणि मर्मृशत् पराणि [यह उसी मन्त्र का तीसरा पाद है], जो ही श्रेष्ठ दिन हैं, वे ही प्रिय हैं, उनको ही तब सब ओर से विचारते हुये और आरम्भ करते हुये लोग चलते हैं। (अस्मात् लोकात् परः वै स्वर्गः लोकः तं स्वर्गम् एव लोकम् अभिमृशन्ति) इस [सामान्य] लोक से श्रेष्ठ ही स्वर्ग लोक है, उस स्वर्ग लोक को ही वे छूते हैं [पाते हैं] (कवीँरिच्छामि सन्दृशे सुमेधाः इति ये ह वै पूर्वे अनेन प्रीताः ते वै कवयः, तान् एव तत् अभ्यभिवदति) कवीँरिच्छामि सन्दृशे सुमेधाः [यह उस मन्त्र का चौथा पाद है] जो ही पहिले ऋषि इस [सूक्त भाग] से प्रसन्न हुये हैं, वे ही कवि [महाज्ञानी] हैं, उनको ही इस [पाद से] वह प्रणाम करता है। (यत् उ वै दशर्चम्, दश वै प्राणाः, प्राणान् एव तत् प्राणानां सन्तत्यै आप्नोति) जो वह दश ऋचा वाला सूक्त है, दश ही प्राण [पांच ज्ञानेन्द्रिय और पांच कर्मेन्द्रिय] हैं, प्राणों को ही तब प्राणों के फैलाव के लिये वह पाता है। (यत् उ वै दशर्चम् दश वै पुरुषे प्राणाः, दश स्वर्गाः लोकाः, तत् प्राणान् च एव स्वर्गान् लोकान् च आप्नोति) जो यह दस ऋचा वाला सूक्त है, और दस ही पुरुष में प्राण हैं, [दस इन्द्रियों की स्वस्थता से] दस स्वर्ग लोक है, उससे ही प्राणों और स्वर्ग लोकों [इन्द्रियों की स्वस्थ गोलको] को वह पाता है। (एतत् प्राणेषु च एव स्वर्गेषु च लोकेषु प्रतितिष्ठन्तः यन्ति) इससे ही प्राणों और स्वर्ग लोकों में दृढ़ ठहरे हुये बह चलते हैं। (यत् उ वै दशर्चम्, दशाक्षरा विराट्, इयं वै विराट् इयं वै स्वर्गस्य लोकस्य प्रतिष्ठा, तत् एतत् अस्यां प्रतिष्ठायां प्रतिष्ठापयति) जो ही यह [सूक्त] दश ऋचा वाला है, दश अक्षर वाला विराट् छन्द है, यह [पृथिवी] ही विराट् [विविध ऐश्वर्य वाली] है, यह [पृथिवी] ही स्वर्ग लोक की प्रतिष्ठा [दृढ़ स्थिति] है, सो यह इस प्रतिष्ठा में [यजमान को] प्रतिष्ठित करता है। (सकृत् इन्द्रं निराह, तेन ऐन्द्रात् रूपात् न प्रच्यवते) एक बार इन्द्र को वह बोलता है, इसलिये इन्द्र वाले रूप [ऐश्वर्य] से नहीं गिरता है। (तत् सम्पातानाम् उपरिष्टात् अहरहः शंसति) इसलिये सम्पात सूक्तों के उपरान्त [इस सूक्त को] दिन दिन वह बोलता है ॥ २ ॥

भावार्थः—कण्डिका १ के समान है ॥ २ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । १९ और ६ । २० से मिलाओ ॥

विशेषः २—प्रतीक वाले मन्त्र अर्थ सहित लिखे जाते हैं ॥

१—को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष । को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे—ऋ० ४ । २५ । १—८ वामदेव ऋषि ॥

सन्तत्यै (अभिममृशन्तः) अभितः पुनः स्पृशन्तः, विचारयन्तः, (अभ्यभिवदति) अभि अभि इति शब्दद्वययुक्तं सूक्तं ब्रूते। अभितो अभिवादनं नमस्करोति (सकृत्) एकवारम् (ऐन्द्रात्) इन्द्रसम्बन्धिनः सकाशात् ॥

(अद्य) आज (कः) कौन (नर्य्यः) नरों [नेताओं] में श्रेष्ठ, (देवकामः) विद्वानों को चाहने वाला और (इन्द्रस्य) इन्द्र [बड़े ऐश्वर्य वाले पुरुष] की (सख्यम्) मित्रता की (उशन्) कामना करता हुआ [मनुष्य] (जुजोष) सेवा करता है । (वा) अथवा (कः) कौन (समिद्धे) प्रज्वलित (अग्नौ) अग्नि में (सुतसोमः) सोम [तत्त्वरस] निचोड़ता हुआ [मनुष्य] (महे) बड़े (पार्याय) पार लगाने वाले (अवसे) रक्षणादि कर्म के लिये (ईट्टे) ऐश्वर्यवान् होता है ॥ [शेष मन्त्र वेद में देखो] ॥

२–वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः । यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान्–ऋ० १० । २९ । १–८, वसुक्र ऋषि, अथर्व० २० । ९६ । १–८ ॥ (वने) वृक्ष पर (न) जैसे (चाकन्) प्रीति करने वाला (वा, यः=वायः) पक्षी का बच्चा (नि अधायि) रखा जाता है, [वैसे ही] (भुरणौ) हे दोनों पोषको ! [माता पिताओ] (शुचिः) पवित्र (स्तोमः) बड़ाई योग्य गुण ने (वाम्) तुम दोनों को (अजीगः) ग्रहण किया है । (यस्य) जिस [बड़ाई योग्य गुण] का (इत्) ही ग्रहण करने वाला (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला पुरुष] (पुरुदिनेषु) बहुत दिनों के भीतर (नृणाम्) नेताओं का (नृतमः) सबसे बड़ा नेता, (नर्यः) पुरुषों का हितकारी (क्षपावान्) श्रेष्ठ रात्रियों वाला है ॥ [शेष मन्त्र वेद में देखो] ॥

३–आ याह्यर्वाङुप बन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् । प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते–ऋ० ३ । ४३ । १–८ विश्वामित्र ऋषि ॥ [हे इन्द्र राजन्] (बन्धुरेष्ठाः) बन्धनों वाले वा सुन्दर रथ में बैठा हुआ तू (अर्वाङ्) सामने (उप आ याहि) समीप आ, (प्रदिवः तव) उत्तम प्रकाश वाले तेरे (इत्) ही (सोमपेयम् अनु) सोम [तत्त्व वा ओषधियों के रस] पीने के लिये (प्रिया सखाया) दो प्रिय मित्र [अध्यापक और उपदेशक वर्त्तमान हैं], (बर्हिः) ऊंचे आसन को (वि मुच) छोड़ दे, (इमे) यह (हव्यवाहः) देने लेने योग्य पदार्थ लाने वाले लोग (त्वाम्) तुझको (उप हवन्ते) आदर से बुलाते है ॥ [शेष मन्त्र वेद में देखो] ॥

४–सद्यो ह जातो वृषभः कनीनः प्रभर्त्तुमावदन्धसः सुतस्य । साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य–ऋ० ३ । ४८ । १–४, विश्वामित्र ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ४ । १ तथा ६ । १ । शेष मन्त्र वेद में देखो ॥

५–सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता—ऋ० ६ । ६९ । १–८ ॥ भरद्वाज बृहस्पति का पुत्र ऋषि ॥ यह मन्त्र आ चुका है गो० उ० ४ । १७ शेष मन्त्र वेद में देखो ॥

६—उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ । आ यो विश्वानि शवसा ततानोप श्रोता म ईवतो वचांसि–ऋ० ७ । २३ । १–६, वसिष्ठ ऋषि ॥ यह मन्त्र आ चुका है गो० उ० ४ । १ तथा ६ । १ ॥ शेष मन्त्र वेद में देखो ॥

७—अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः अभि-प्रियाणि मर्मृशत् परागि कवीँरिच्छामि सन्दृशे सुमेधाः—ऋ० ३ । ३८ । १—१०, विश्वामित्र के गोत्र का प्रजापति, अथवा वाच्य वाक् का पुत्र, अथवा प्रजापति और वाच्य दोनों, अथवा विश्वामित्र ही ऋषि ॥ यह मन्त्र आ चुका है—गो० उ० ६ । १ ॥ शेष मन्त्र वेद मे देखो ॥

कण्डिका ३ ॥

कस्तमिन्द्र त्वावसुं कन्नव्यो अतसीनां कदून्व१स्याकृतं इति कद्वन्तः प्रगाथा अहरहः शस्यन्ते । को वै प्रजापतिः, प्रजापतेराप्त्यै । यदेव कद्वन्तः, तत् स्वर्गस्य लोकस्य रूपम् । यद्वेव कद्वन्तः, अथो अन्नं वै कम्, अथो अन्नस्यावरुध्यै । यद्वेव कद्वन्तः अथो सुखं वै कम्, अथो सुखस्यावरुध्यै यद्वेव कद्वन्तः, अथोऽहरहर्वा एते, शान्तान्यहीनसूक्तान्युपयुञ्जाना यन्ति, तानि कद्वद्भिः प्रगाथैः शमयन्ति तान्येभ्यः शान्तानि कं भवन्ति तान्येताञ्छान्तानि स्वर्गं लोकमभिवहन्ति । त्रिष्टुभः सूक्तप्रतिपदः शंसेयुः, ता हैके पुरस्तात् प्रगाथानां शंसन्ति, धाय्या इति वदन्तस्तदु तथा न कुर्यात् । क्षत्रं वै होता, विशो होत्राशंसिनः, क्षत्रस्येव तद्विशं प्रत्युद्यामिनीं कुर्युः । पापवस्यसं त्रिष्टुभो म इमा सूक्तप्रतिपद इत्येवं विद्यात्, यथा वै समुद्रं प्रतरेयुः, एवं हैवैते प्प्लवन्ते ये संवत्सरं द्वादशाहं वोपासन्ते, तद्यथा सैरावतीं नावं पारकामाः समारोहेयुः एवं हैवैतास्त्रिष्टुभः स्वर्गकामाः समारोहन्ति । न ह वा एतच्छन्दो गमयित्वा स्वर्गं लोकमुपावर्त्तन्ते वीर्य्यवन्तं महिताभ्यो न व्याह्वयीत समानं हि छन्दः, अथो नेद् धाय्या करवाणीति । यदेनाः शंसन्ति, तत् स्वर्गस्य लोकस्य रूपम् । यद्वैवैनाः शंसन्ति, इन्द्रमेवैतैर्निह्वयन्ते, यथा ऋषभं वासितायै ॥ ३ ॥

कण्डिका ३ ॥ अहीन यज्ञ में कद्वत् प्रगाथों का उपयोग और महत्त्व ॥

(कस्तमिन्द्र त्वावसुं, कन्नव्यो अतसीनां, कदू न्वस्याकृतम् इति कद्वन्तः प्रगाथाः अहरहः शस्यन्ते) कस्तमिन्द्र त्वावसुम्—·····ऋ० ७ । ३२ । १४; कन्नव्यो अतसीनाम्····ऋ० ८ । ३ । १३, कदू न्व१स्याकृतम् ···ऋ० ८ । ६६ । ९, [सायणभाष्य ५५] । यह कत् वा क शब्द वाले प्रगाथ दिन दिन बोले जाते हैं । (कः वै प्रजापतिः, प्रजापतेः आप्त्यै) क शब्द प्रजापति [का वाचक] है, प्रजापति के पाने के लिये [यह हैं] । (यत् एव कद्वन्तः, तत् स्वर्गस्य लोकस्य रूपम्) जो यह [प्रगाथ] कत् अथवा क शब्द वाले हैं, वह स्वर्गलोक का रूप है । (यत् उ एव कद्वन्तः अथो अन्नं वै कम्, अथो अन्नस्य अवरुध्यै) जिस कारण से यह [प्रगाथ] कत् शब्द वाले हैं, और अन्न ही क

३—(त्वावसुम्) गो० उ० ४ । १ त्वया प्राप्यवनम् (कत्) कथम् (नव्यः) नव—ईयसुन्, ईकारलोपः । नवीयः । नवतरं कर्म (अतसीनाम्) अत्यविचमि-तमि० (उ० ३ । ११७) अत सातत्यगमने—असच्, ङीष् सन्ततगामिनीनां

(सः ह बुडिलः, आश्वितराः स्युः, विश्वजितः होता सन् ईक्षांचक्रे एतेषां वै एषां शिल्पानां सांवत्सरिके विश्वजिति होतुः द्वे उक्थे माध्यन्दिनम् अभि प्रच्यवेते) वह [प्रसिद्ध] बुडिल [त्यागी ऋषि] यह विचार कर, कि [यह लोग] बलवान् पुरुषों के तराने वाले हों, विश्वजित् यज्ञ का होता होकर विचारने लगा—इन शिल्पों [नाभानेदिष्ठ आदि] के संवत्सर रहने वाले विश्वजित् यज्ञ में होता के दो उक्थ माध्यन्दिन सवन पर होते हैं ।(हन्त, अहम् इच्छम् एवयामरुतं शंसयानि इति, तत् ह तथा शंसयाञ्चक्रे) हर्ष है—मैंने चाहा है—मै एवयामरुत् सूक्त बोलूँ· उसको उसने उसी प्रकार उच्चारण कराया । (तत् ह तथा शंसमाने गोश्लः आजगाम) तब ही वैसा बोले जाने पर गोश्ल [वेदवाणी का सेवक, ऋषि] आ गया । (सः ह उवाच, होतः कथा ते शस्त्रं विचक्रं प्लवते इति) वह गोश्ल बोला—हे होता ! कैसे तेरा स्तोत्र बिना पहिये चलता है । (किं हि अभूत् इति) [बुडिल बोला] क्या ही [दोष] हुआ है । (एवयामरुत् अयम् उत्तरतः शस्यते [शंसति] इति) । [गोश्ल बोला] एवयामरुत् सूक्त को यह [अच्छावाक] उत्तर ओर से बोलता है । (सः ह उवाच, इन्द्रः [ऐन्द्रः] वै माध्यन्दिनः, कथा इन्द्रं माध्यन्दिनानि अनीकसि इति) वही [गोश्ल फिर] बोला—इन्द्र देवता वाला ही माध्यन्दिन सवन है, कैसे इन्द्र को माध्यन्दिन सूक्तों से तूने निकाला है । (इन्द्रं माध्यन्दिनानि न अनीषाम् इति) [बुडिल बोला] इन्द्र को माध्यन्दिन सूक्तों से मैंने नहीं निकाला । (सः उवाच, इदम् उ छन्दः तु माध्यन्दिनं साति जागतं वा अतिजागतं वा) वह [गोश्ल] बोला—यह छन्द तो माध्यन्दिन के अवसान मे जगती छन्द वा अतिजगती छन्द [तो ठीक है, परन्तु] (सः उ मारुतः, एवं मा संसृष्ट [शंसिष्ट] इति) वह [स्तोम] मरुत् देवता वाला है, इस प्रकार वह [उसे] न बोले । (सः ह उवाच अरम् अच्छावाक इति, अथ अस्मिन् अनुशासनम् ईषे) वह [बुडिल] बोला—हे अच्छावाक ! बस [चुप रह], क्योंकि इसमें [गोश्ल का] अनुशासन मै मानता हूं । (सः ह उवाच एषः इन्द्रं विष्णुं न्यङ्कानि शंसति = शंसतु) वह [गोश्ल] बोला—यह अच्छावाक इन्द्र को विष्णु के चिह्नों सहित

न्याः (बुडिलः) बुड त्यागे संवरणे च—इलच्, कित् । त्यागी । ऋषिविशेषः (आश्वितराः) अश्व—इञ् स्वार्थे + तॄ तारणे—अप् आश्वीनाम् अश्वानां बलवत्पुरुषाणां तारकाः (ईक्षाञ्चक्रे) विचारितवान् (अभि) अभिलक्ष्य (प्रच्यवेते) प्रवर्तेते (हन्त) हर्षोऽस्ति (इच्छम्) लङि आर्षरूपम् । ऐच्छम् (शंसयाञ्चक्रे) शंसनं कारितवान् (गोश्लः) गो + श्रिञ् सेवायां—डप्रत्ययः, रस्य लः । वेदवाणीसेवकः । ऋषिविशेषः (कथा) कथम् (विचक्रम्) चक्ररहितं (प्लवते) गच्छति प्रवर्तते (उत्तरतः) उत्तरस्यां दिशि (अनीकसि) णीञ् प्रापणे—लुङ्, आर्षम् । अनैषीः । प्रेरितवान् असि (अनीषाम्) लुङ्, आर्षम् । अनैषम् । प्रेरितवान् अस्मि (साति) ऊतियूतिजूतिसाति० (पा० ३ । ३ । ९७) षो अन्तकर्मणि यद्वा षै क्षये—क्तिन्, विभक्तेर्लुक् । सातौ । अवसाने (मा संसृष्ट) मा शंसिष्ट । शंसनं मा करोतु (अरम्) अलम् । पर्याप्तम् (ईषे) ईष गतौ । गच्छामि । प्राप्नोमि (विष्णुम्) विष्णोः (न्यङ्कानि) लिङ्गानि (होतुः)

मन्त्रों [ऋ० ६ । २० । १–१३ जिसके दूसरे मन्त्र में विष्णु शब्द है और जो इन्द्र देवता वाला है] बोले । (अथ त्वम् होतुः [होतः] उपरिष्टात् या रौद्रिया धाय्या, अस्य मारुतस्य सूक्तस्य पुरस्तात् अपि धाः इति) और तू हे होता ! अन्त में जो रुद्र देवता वाली धाय्या है, [उसको] इस मारुत सूक्त के पहिले ही धारण कर । (तथा इति) । [बुडिल बोला] वैसा ही हो । (तत् अपि एतर्हि तथा एव शस्यते, यथा षष्ठे पृष्ठ्याहनि) वह अब भी वैसा ही बोला जाता है, जैसे पृष्ठ्याह यज्ञ के छठे दिन ॥

(यज्ञः एव कल्पते, यजमानस्य प्रजापतिः कल्पते, कथम् अत्र नाभानेदिष्ठः अशस्तः एव भवति) यज्ञ ही समर्थ होता है और यजमान का प्रजापालक व्यवहार समर्थ होता है, कैसे यहां नाभानेदिष्ठ स्तोम बिना बोला हुआ ही रहता है । (अथ बालखिल्याः शंसति, रेतः वै अग्रे अथ प्राणाः, एवं ब्राह्मणाच्छंसी [ब्राह्मणाच्छंसिना] नाभानेदिष्ठः अशस्तः एव भवति) फिर वह बालखिल्य ऋचायें बोलता है, वीर्य ही पहिले है फिर प्राण हैं, इस प्रकार ब्राह्मणाच्छंसी करके नाभानेदिष्ठ स्तोम बिना बोला हुआ ही होता है । (अथ वृषाकपिं शंसति, रेतः वै अग्रे अथ आत्मा, कथम् अत्र यजमानस्य प्रजापतिः कथं प्राणाः अवरुद्धाः भवन्ति इति) फिर वृषाकपि [वृषाकपि वाले स्तोम] को वह बोलता है, वीर्य ही पहिले फिर आत्मा होता है, कैसे यहाँ यजमान का प्रजापालक व्यवहार [समर्थ होता है], और कैसे प्राण रक्षित होते हैं । (यजमानं वै एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति, यथा सः गर्भः योन्याम् अन्तः एव सम्भवन् शेते) [उत्तर] यजमान को ही इस सब यज्ञ कर्म से वे संस्कार युक्त करते हैं, जैसे गर्भ गर्भाशय के भीतर ही उत्पन्न होता हुआ रहता है । (सर्वं सकृत् एव अग्रे न ह वै सम्भवति, एकैकं वा अङ्गं सम्भवति) सब एक बार ही पहिले नहीं समर्थ होता, एक एक ही अङ्ग समर्थ होता है । (सर्वाणि चेत् समाने अहनि क्रियेरन्, यज्ञः एव कल्पते, यजमानस्य प्रजापतिः कल्पते) जो सब [शिल्प स्तोत्र] एक दिन में किये जावें, यज्ञ अवश्य समर्थ होता है, और यजमान का प्रजापालक व्यवहार समर्थ होता है । (अथ ह एव एवयामरुतं होता शंसेत्, तस्य अस्य प्रतिष्ठा, तस्यैं एव एनम् अन्ततः प्रतिष्ठापयति प्रतिष्ठापयति) फिर ही एवयामरुत् स्तोम को होता बोले, उस [यजमान] की प्रतिष्ठा है, उस [प्रतिष्ठा] के लिए ही इस [एवयामरुत् स्तोम] को अन्त में वह स्थापित करता है, वह स्थापित करता है ॥ ६ ॥

भावार्थः—मनुष्य यज्ञ के अङ्ग अङ्ग के विचार के साथ यज्ञ सिद्धि करके प्रतिष्ठा पावे ॥ ६ ॥

विशेषः १—इस कण्डिका के लिये देखो पीछे क० ७ । ८ और ऐ० ब्रा० ५ । १५ और ६ । ३०, ३१ ॥

विशेषः २—संकेतित मन्त्रों में से दो मन्त्र यहाँ लिखते हैं, शेष वेद में देखो—द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान् । तं नः सहस्र-

---

हे होतः (धाः) अधाः । धेहि (प्रजापतिः) प्रजातिः । जन्म (अवरुद्धाः) रक्षिताः (संस्कुर्वन्ति) संस्कारयुक्तं कुर्वन्ति (योन्याम्) गर्भाशये (सम्भवन्) उत्पन्नः सन् (शेते) वर्तते (कल्पते) समर्थयते ॥

भरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् । १ । दिवो न तुभ्यमन्विन्द्र सत्रा-सुर्यं देवेभिर्धायि विश्वम् । अहिं यद् वृत्रमपो वव्रिवांसं हन्नृजीषिन् विष्णुना सचानः । २ । ऋ० ६ । २० । १, २ ॥

१—(इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (यः रयिः) जो धन (द्यौः न भूम) सूर्य के समान सत्तामात्र को, (शवसा) बल से (पृत्सु) सङ्ग्रामों में (अर्यः=अरेः) बैरी के (जनान्) मनुष्यों को (अभि तस्थौ) वश में करता है । (सहसः सूनो) हे बल से प्रेरणा करने वाले [शूर !] (नः) हमें (तम्) उस (सहस्रभरम्) सहस्रों पदार्थ धारण करने वाले, (उर्वरासाम्) उपजाऊ भूमि के सेवने वाले (वृत्रतुरम्) शत्रुओं के नाश करने वाले [धन] को (दद्धि) दें ॥ १ ॥

२—(इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (दिवः=दिवे न) सूर्य समान (तुभ्यम्) तेरे लिये (सत्रा) सत्य से (विश्वम्) सब (असुर्यम्) असुरों का ऐश्वर्य (देवेभिः) विद्वानों करके (अनु धायि) निरन्तर धारण किया गया है । (ऋजीषिन्) हे सरल धर्म वाले ! (यत्) जब कि तूने (वृत्रम्) बैरी को, (विष्णुना) बिजुली से (सचानः) मिले हुए [सूर्य के समान] (अपः) जलों को (वव्रिवांसम्) बाँटने वाले (अहिम्) मेघ को (हन्) मारा है ॥ २ ॥

कण्डिका १० ॥

देवक्षेत्रं वै षष्ठमहः । देवक्षेत्रं वा एत आगच्छन्ति, ये षष्ठमहरागच्छन्ति । न वै देवा अन्योऽन्यस्य गृहे वसन्ति, नर्त्वृतोर्गृहे वसतीत्याहुः, तद्यथायथ-मृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायम्, तद्यदृतून् कल्पयति, यथायथं जनिता । तदाहुः नर्त्वृतुप्रैषी प्रेष्येयुर्नर्त्वृतुप्रैषी वषट्कुर्युः, वाग्वा ऋतुप्रैषा, आप्यायते वै वाक् षष्ठेऽहनीति । यदृतुप्रैषी प्रेष्येयुः, यदृतुप्रैषी वषट्कुर्य्युः, वाचमेव तदाप्तां शान्तामुक्तवतीं वहरावणीमृच्छेयुः, अच्युताद्यज्ञस्य च्यवेरन्, यज्ञान् प्राणान् प्रजायाः पशुभ्यो जिह्मायेयुः, तस्मादृग्मेभ्य एव प्रेषितव्यमृग्मेभ्योऽधि वषट्कृत्यम् । तन्न वाचमाप्तां शान्तामुक्तवतीं वहरावणीमृच्छन्ति, नाच्युताद्यज्ञस्य च्यवेरन्, यज्ञान् प्राणान् प्रजायाः, पशुभ्यो जिह्मायन्ति । पारुच्छेपीरुपदधति, द्वयोः सव-नयोः पुरस्तात् प्रस्थितयाज्यानाम् । रोहितं वै नामैतच्छन्दः, यत् पारुच्छेपम् । एतेन ह वा इन्द्रः सप्त स्वर्गाल्लोकानारोहत् । आरोहति सप्त स्वर्गाल्लोकान्, य एवं वेद । तदाहुः, यत् पञ्चपद एव पञ्चमस्याह्नोरूपं, षट्पदात् षष्ठस्य, अथ कस्मात् सप्तपदात् षष्ठेऽहनि शस्यन्त इति । षड्भिरेव पदैः षष्ठमहरवाप्नुवन्ति, विच्छिद्ये[1] वै तदहः, यत् सप्तमम् । तदेव सप्तमेन पदेनाभ्यारुह्य वसन्ति, सन्त-तैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति, य एवं विद्वांस उपयन्ति ॥ १० ॥

कण्डिका १० ॥ षडह यज्ञ में पारुच्छेपी ऋचाओं का प्रयोग ॥

(देवक्षेत्रं वै षष्ठम् अहः) देवक्षेत्र [विद्वानों का घर] ही छठा दिन है । (देवक्षेत्रं वै एते आगच्छन्ति, ये षष्ठम् अहः आगच्छन्ति) विद्वानों के घर ही यह

१. "विच्छिद्यैवैतद्" पाठोऽत्र समीचीनः ॥ सम्पा० ॥

[यजमान लोग] आते हैं, जो छठे दिन आते हैं। (न वै देवाः अन्योन्यस्य गृहे वसन्ति, न ऋतुः ऋतोः गृहे वसति इति आहुः) न तो देवता [सूर्य वायु आदि] एक दूसरे के घर में बसते हैं, न ऋतु [वसन्त आदि] ऋतु के घर में बसता है—ऐसा लोग कहते हैं। (तत् यथायथं ऋत्विजः असम्प्रदायम् ऋतुयाजान् यजन्ति, यत् तत् जनिता यथायथम् ऋतून् कल्पयति) फिर यथायोग्य स्थान पर बैठे ऋत्विज् लोग दूसरे को स्थान न देकर ऋतुओं के यज्ञों को करते हैं, जिससे तब जनिता [ऋतुओं का ठीक करने वाला ऋत्विज्] यथायोग्य स्थान पर बैठा हुआ ऋतुओं को समर्थ करता है। (तत् आहुः ऋतुप्रैषी न प्रेष्येयुः न ऋतुप्रैषी वषट्कुर्युः) फिर कहते हैं—ऋतुप्रैषी [ऋतु यज्ञ के मन्त्र बतलाने वाला] प्रेष्य मन्त्र [होता यक्षदिन्द्रम्—इत्यादि यजु० २१ । ४५] को न बोले और न ऋतुप्रैषी वषट्कार [समाप्ति कर्म] करे। (वाक् वै ऋतुप्रैषा, वाक् वै षष्ठे अहनि आप्यायते इति) वाणी ही ऋतुप्रैष मन्त्र है, वाणी ही छठे दिन में समाप्त हो जाती है। (यत् ऋतुप्रैषी प्रेष्येयुः यत् ऋतुप्रैषी वषट्कुर्युः, तत् आप्तां शान्तां ऋक्तवतीं वहरावणीं वाचम् एव ऋच्छेयुः यज्ञस्य अच्युतात् च्यवेरन्) यदि ऋतुप्रैषी प्रैष मन्त्रों को बोले, और जो ऋतुप्रैषी वषट्कार करे, वह तब समाप्त हुई थकी हुई शून्य वाली [निरर्थक] और बोझ से चिल्लाती हुई वाणी को ही प्राप्त करें और यज्ञ के न गिरते हुए प्रयोग से वे गिर पड़ें। (यज्ञान् प्राणान् प्रजायाः पशुभ्यः जिह्मायेयुः) यज्ञों और प्राणों को प्रजा से और पशुओं से वे टेढ़ा [प्रतिकूल] करें। (तस्मात् ऋग्मेभ्यः एव प्रेषितव्यम्, ऋग्मेभ्यः अधि वषट्कृत्यम्) इसलिये ऋचा [तुभ्यं हिन्वानो वसिष्ठ—ऋ० २ । ३६ । १] को पहिले बोलकर ही प्रैष मन्त्र बोले और ऋचा को ही पहिले बोलकर वषट्कार बोले। (तत् आप्तां शान्ताम् ऋक्तवतीम् वहरावणीं वाचं न ऋच्छन्ति, न यज्ञस्य अच्युतात् च्यवेरन्, [न] यज्ञान् प्राणान् प्रजायाः पशुभ्यः जिह्मायन्ति) तब वे समाप्त हुई, थकी हुयी, शून्य वाली [निरर्थक] बोझ से चिल्लाती हुई वाणी को नहीं प्राप्त करते,

१०—(देवक्षेत्रम्) क्षि निवासे—ष्ट्रन्। देवानां विदुषां गृहम् (अन्योन्यस्य) परस्परस्य (यथायथम्) यथायोग्यम्। स्वस्वस्थानग्रहणेन (असंप्रदायम्) नञ्+सम्+प्र+ददातेः—णमुल्। युक् च, स्वस्थानम् अन्यस्मै अदत्वा (ऋतुप्रैषी) ऋतुप्रैष—इनिः। ऋतुप्रैषाणाम् ऋतुयाजार्थं मन्त्राणां प्रवर्तकः (प्रेष्येयुः) प्रेष्येत। प्रवर्तेत (ऋतुप्रैषा) ऋतुप्रवर्तिका (आप्यायते) आ समाप्तौ+प्यैङ् वृद्धौ—लट्। समाप्यते (आप्ताम्) समाप्ताम् (शान्ताम्) श्रान्ताम्। खेदयुक्ताम् (ऋक्तवतीम्) रिचिर् विरेचने पृथग्भावे च—क्तः, मतुप् [1]आर्षरूपम्। ऋक्तां शून्याम् (वहरावणीम्) वह+रवण—स्वार्थे—अण्, ङीप्,। वहेन गुरुभारेण रवणं रोदनं यस्याः ताम् (ऋच्छेयुः) प्राप्नुयुः (अच्युतात्) अनष्टात् प्रयोगात् (च्यवेरन्) पतनं प्राप्नुयुः (जिह्मायेयुः) जहातेः सन्वदाकारलोपश्च (उ० १ । १४१) ओहाक् त्यागे—मन्, जिह्म इति नामधातुः। कुटिलान् विरुद्धान् कुर्युः (ऋग्मेभ्यः) ऋच+माङ् माने—कः। ऋक्शिरस्केभ्यः प्रैषमन्त्रेभ्यः ऊर्द्ध्वम् (जिह्मायन्ति) कुटिलान् कुर्वन्ति (पारुच्छेपीः)

१. यहाँ "रिक्त" पाठ ही शुद्ध होना चाहिये ॥ सम्पा० ॥

और न यज्ञ के न गिरे हुए प्रयोग से गिरते और [न] यज्ञों और प्राणों को प्रजा से और पशुओं से टेढ़ा करते हैं ॥

(पारुच्छेपीः द्वयोः सवनयोः प्रस्थितयाज्यानां पुरस्तात् उपदधति) पारुच्छेपी [परुच्छेप की देखी ऋचाओं--अग्नि होतारं मन्ये—इत्यादि, ऋ० १ । सूक्त १२७—१३९] ऋचाओं को दोनों [पहिले] सवनों मे प्रयोग के योग्य याज्याओं के पहिले वे धरते हैं । (रोहितं वै नाम एतत् छन्दः यत् पारुच्छेपम्) रोहित [चढ़ने योग्य] ही नाम यह छन्द है जो पारुच्छेप [परुच्छेप ऋषि के सूक्तों वाला] है । (एतेन ह वै इन्द्रः सप्त स्वर्गान् लोकान् आ-अरोहत्) इस [रोहित छन्द] से ही इन्द्र [परम ऐश्वर्यवान् जीव] सात स्वर्ग लोकों [अर्थात् भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् सात व्याहृतियों से जिनका सम्बन्ध शिर, नेत्र, कण्ठ, हृदय, नाभि, पाद और शिर से है] को चढा । (सप्त स्वर्गान् लोकान् आरोहति, यः एवं वेद) सात स्वर्ग लोकों को वह चढ़ता है जो ऐसा विद्वान् है । (तत् आहुः यत् पञ्चपदः एव पञ्चमस्य अह्नः रूपम्, षट्पदात् षष्ठस्य, अथ कस्मात् सप्तपदात् षष्ठे अहनि शस्यन्ते इति) फिर वे कहते हैं—पांच पाद वाली ऋचायें ही पाँचवें दिन का रूप हैं, छह पद वाले मन्त्र से छठे का [रूप है], फिर किस लिए सात पाद वाले मन्त्र से छठे दिन में वे स्तुति करते हैं । (षड्भिः एव पदैः षष्ठम् अहः अवाप्नुवन्ति, विच्छिद्य वै तत् अहः यत् सप्तमम्) छह ही पादों से छठे दिन को वे पाप्त करते हैं, काट लेने पर [सातवाँ पाद निकाल देने पर] ही वह दिन है जो सातवाँ है [पारुच्छेपी सूक्त छन्दों और अतिछन्दों वाले हैं और अतिछन्दों में पाँच, छह और सात पाद हैं] । (तत् एव सप्तमेन पदेन अभ्यारुह्य वसन्ति, संततैः अव्यवच्छिन्नैः त्र्यहैः यन्ति, ये एवं विद्वांसः उपयन्ति) तब ही वे लोग सातवें पाद से चढ़कर बसते हैं और फैले हुए और न टूटे हुए तीन दिन वाले यज्ञों से चलते हैं, जो ऐसे विद्वान् आते हैं ॥ १० ॥

भावार्थः—मन्त्रों के यथावत् विचारपूर्वक प्रयोग करने से यज्ञ सिद्धि करनी चाहिए ॥१०॥

विशेषः—इस कण्डिका को ऐ० ब्रा० ५ । ९७, १० से मिलाओ ॥

कण्डिका ११ ॥

देवासुरा वा एषु लोकेषु समयतन्त । ते देवा षष्ठेनाह्ना एभ्यो लोकेभ्योऽसुरान् पराणुदन्त । तेषा यान्यन्तर्हस्तानि वसून्यासन्, तान्यादायन् समुद्रं प्रारूप्यन्त । तेषां वै देवा अनुहायैतेनैव च्छन्दसा अन्तर्हस्तानि वसून्यादद्त । तदेवैतत् पदं, पुनःपदम् । स वांकुश आकुञ्चनाया द्विषतो वसु दत्ते, निरेवैनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते, य एवं वेद । द्यावें देवता[1] षष्ठमहर्वहति, त्रयस्त्रिंशस्तोमो रैवतं

परुच्छेपेन महर्षिणा दृष्टाः ऋचः (प्रस्थितयाज्यानाम्) प्रातयाज्यानाम् (पञ्चपदः) पंचपादोपेताः (षट्पदात्) षट्पादयुक्ताच्छन्दसः (सप्तपदात्) सप्तपादयुक्तात् (विच्छिद्य) छिदिर् द्वैधीकरणे—क्यप् । विच्छेदनीये सति (सन्ततैः) सम्+तनु विस्तारे—क्तः । विस्तृतैः (अव्यवच्छिन्नैः) विच्छेदरहितैः । परस्परसंयुक्तैः ॥

---

१. पू. सं. 'देवताः' इति पाठः ॥

सामातिच्छन्दश्छन्दो यथादैवतमनेन यथास्तोमं यथासाम यथाछन्दः समृध्नोति, य एवं वेद । यद्वै समानोदर्क, तत् षष्ठस्याह्नो रूपम् । यद्येव प्रथममहः, तदुत्तममहः, तदेवैतत् पदम् । पुनर्यत् षष्ठं, यदश्ववद्यद्रथवद्यत् पुनरावृत्तं, यत् पुर्नानवृत्तं, यदन्तरूपं, यदसौ लोकोऽभ्युदितः, यन्नाभानेदिष्ठं, यत् पारुच्छेपं, यन्नाराशंसं, यद् द्वैपदा, यत् सप्तपदा, यत् कृतं, यद्रैवतं, तत्तृतीयस्याह्नो रूपम् । एतानि वै षष्ठस्याह्नो रूपाणि छन्दसामु ह षष्ठेनाह्नाक्तानां रसो निनेजत्, तं प्रजापतिरुदानए नाराशꣳस्या गायत्र्या रैभ्या त्रिष्टुभा पारिक्षित्या जगत्या गाथया अनुष्टुभा एतानि वै छन्दांसि षष्ठेऽहनि शस्तानि भवन्ति अयातयामानि, छन्दसामेव तत् सरसताया अयातयामतायै । सरसानि हास्य छन्दांसि षष्ठेऽहनि शस्तानि भवन्ति, सरसैः छन्दोभिरिष्टं भवति, सरसैः छन्दोभिर्यज्ञं तनुते य एवं वेद ॥ ११ ॥

कण्डिका ११ ॥ देवासुर सङ्ग्राम की आख्यायिका, यज्ञों में छठे दिन के कर्म ॥

(देवासुराः वै एषु लोकेषु समयतन्त) देवता और असुर इन लोकों में युद्ध करने लगे । (ते देवाः षष्ठेन अह्ना एभ्यः लोकेभ्यः असुरान् पराणुदन्त) उन देवताओं ने छठे दिन [के यज्ञ] द्वारा इन लोकों से असुरों को निकाल दिया । (तेषां यानि अन्तर्हस्तानि वसूनि आसन्, तानि आदायन् समुद्रं प्रारूप्यन्त) उन [देवताओं] के जो हाथों में धन थे, उन्हें वे [असुर] ले गये और समुद्र में फेंक दिया । (देवाः वै तेषाम् अनुहाय एतेन एव छन्दसा अन्तर्हस्तानि वसूनि आददत) देवताओं ने उनका पीछा करके इस ही [पारुच्छेप] छन्द से [उनके] हाथ में के धनों को ले लिया । (तत् एव एतत् पदं, पुनःपदम्) वह ही यह पाद है, [जो] पुनःपद [छह पाद के बोले जाने के पीछे सातवां पाद] है । (सः वा अंकुशः आकुञ्चनाय, द्विषतः वसु आ दत्ते, एनम् एभ्यः सर्वेभ्यः लोकेभ्यः एव निर् नुदते, यः एवं वेद) वह ही समेटने के लिये अंकुश है, वह बैरी के धन को ले लेता है, और इसको इन सब लोकों से ही निकाल देता है, जो ऐसा विद्वान् है ॥

(द्यौः वै देवता षष्ठम् अहर्वहति, त्रयस्त्रिंशः स्तोमः, रैवतं साम अतिच्छन्दः छन्दः, अनेन यथादैवतम्, यथास्तोमम्, यथासाम, यथाछन्दः समृध्नोति, यः एवं वेद) प्रकाशमान सूर्य देवता [यज्ञ के] छठे दिन को ले चलता है, त्रयस्त्रिंश स्तोम, रैवत साम और अतिछन्द छन्द होता है । इस [विधान] से देवता के अनुसार, स्तोम के अनुसार,

---

११—(समयतन्त) सग्रामं कृतवन्तः (पराणुदन्त) परा—अनुदन्त । निःसारितवन्तः (अन्तर्हस्तानि) हस्तगतानि । अधिकारप्राप्तानि (आदायन्) आ+अदायन् । गृहीतवन्तः (प्रारूप्यन्त) प्र—अरूप्यन्त । रुह बीजजन्मनि प्रादुर्भावे च—णिच् । प्रक्षिप्तवन्तः (अनुहाय) अनु+ओहाङ् गतौ—ल्यप् । पृष्ठतो गत्वा (आददत) आ—अददत । गृहीतवन्तः (तत्) तत्र । पारुच्छेपीषु ऋक्षु (पुनःपदम्) षट्सु पादेषु समाप्तेषु पुनः पश्चात् उच्चार्यमाणः सप्तमः पादः (अङ्कुशः) वक्राग्रलौहास्त्रभेदः (आकुञ्चनाय) आकर्षणाय (आ दत्ते) गृह्णाति

सामगान के अनुसार और छन्द के अनुसार वह समृद्ध होता है, जो ऐसा विद्वान् है। (यत् वै समानोदर्कं, तत् षष्ठस्य अह्नः रूपम्) जो ही समान अन्त कर्म है, वह छठे दिन का रूप है। (यदि एव प्रथमम् अहः, तत् उत्तमम् अहः, तत् एव एतत् पदम्) जो ही पहिला दिन है, वह ही सबसे पिछला दिन है [पहिले दिन के समान पिछले दिन काम होता है], वह ही वह पाद है। (पुनः यत् षष्ठं, यत् अश्ववत्, यत् रथवत्, यत् पुनरावृत्तम् यत् पुर्नानवृत्तं, यत् अन्तरूपं, यत् असौ अभ्युदितः लोकः यत् नाभानेदिष्ठं यत् पारुच्छेपं यत् नाराशंसं, यत् द्वैपदा, यत् सप्तपदा, यत् कृतं, यत् रैवतं, तत् तृतीयस्य अह्नः रूपम्) फिर जो छठा [दिन] है, जो अश्व शब्द वाला, जो रथ शब्द वाला, जो आवृत्ति वाला और जो पुनर्निवृत्ति वाला, और जो अन्तरूप वाला छन्द है, जो वह [सूर्य] उदय होता हुआ लोक है, जो नाभानेदिष्ठ, जो पारुच्छेप और जो नाराशंस सूक्त है, जो दो पाद वाली ऋचा और सात पाद वाली ऋचा है, जो कृत [भूत काल] है और जो रैवत साम है, वह तीसरे दिन का रूप [चिह्न] है। (एतानि वै षष्ठस्य अह्नः रूपाणि, षष्ठेन अह्ना अक्तानां छन्दसाम् उ रसः निनेजत्) यह ही छठे दिन के रूप हैं, छठे दिन के साथ मिले हुये छन्दों का रस पुष्ट किया जावे। (तं [तस्मै] प्रजापतिः उदानः ए [एव]) उस [यजमान] के लिये उदान वायु ही प्रजापालक है। (नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभा पारिक्षित्या जगत्या गाथया अनुष्टुभा) नाराशंसी, गायत्री, रैभी, त्रिष्टुप् पारिक्षिती [पारिक्षित शब्द वाली] जगती, गाथा और अनुष्टुप् ऋचा साथ [यह काम होता है]। (एतानि वै छन्दांसि षष्ठे अहनि अयातयामानि शस्तानि भवन्ति, तत् छन्दसाम् एव सरसतायै अयातयामतायै) यह ही छन्द छठे दिन में उचित समय के अनुकूल बोले गये होते हैं, यह काम छन्दों के ही रसीलेपन और उचित समय के अनुकूलपन के लिये है। (अस्य ह सरसानि छन्दांसि षष्ठे अहनि शस्तानि भवन्ति, सरसैः छन्दोभिः इष्टं भवति, सरसैः छन्दोभिः यज्ञं तनुते यः एवं वेद) उसके ही रसीले छन्द छठे दिन में बोले गये होते हैं, रसीले छन्दों से वह इष्ट [प्रिय पदार्थ] पाता है, और रसीले छन्दों से वह यज्ञ फैलाता है, जो ऐसा विद्वान् है ॥ ११ ॥

भावार्थः- कण्डिका १० के समान है ॥ ११ ॥

(द्यौः) प्रकाशलोकः। सूर्यः (वहति) निर्वहति। प्रवर्तयति (अतिच्छन्दः) गायत्र्यादि-सप्तछन्दोभ्यो अधिकाक्षरयुक्तं छन्दः (समानोदर्कम्) तुल्यसमाप्तिकम् (पुनरावृत्तम्) पुनरावृत्तियुक्तम् (पुनर्निवृत्तम्) पुनर्निष्पादितं। पुनः सिद्धम् (पारुच्छेपम्) परुच्छेपेन दृष्टम् (द्वैपदा) द्विपादोपेता ऋक् (सप्तपदा) सप्तपादोपेता। यथा पारुच्छेपी (कृतम्) भूतार्थवाचि प्रत्ययप्रयुक्तं धातुमात्रम् (अक्तानाम्) सङ्गतानाम् (निनेजत्) णिजिर् शौचपोषणयोः। शोधयेत्। पोषयेत् (पारिक्षित्या) परिक्षित्—अण्, ङीप्। परीक्षिच्छन्देनोपेतया (अयातयामानि) उचितसमययोग्यानि (इष्टम्) अभिलषितम्। प्रियम् (भवति) प्राप्नोति (तनुते) विस्तारयति ॥

विशेषः—इस कण्डिका के लिये अगली कण्डिका १२ और ऐतरेय ब्राह्मण ५ । ११, १२ तथा ६ । ३२ देखो ॥

कण्डिका १२ ॥

अथ यद् द्वैपदौ स्तोत्रियानुरूपौ भवतः, इमा नु कं भुवना सीषधामेति । द्विपाद्वै पुरुषः, द्विप्रतिष्ठः पुरुषः, पुरुषो वै यज्ञः, तस्माद् द्वैपदौ स्तोत्रियानुरूपौ भवतः । अथ सुकीर्त्ति शंसति, अपेन्द्र प्राचो मघवन्नमित्रानिति । देवयोनिर्वै सुकीर्त्तिः, स य एवमेतां देवयोन्यां सुकीर्त्ति वेदकीर्तिं प्रतिष्ठापयति, भूतानां कीर्त्तिमान् स्वर्गे लोके प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । अथ वृषाकपिं शंसति. वि हि सोतोरसृक्षतेति । आदित्यो वै वृषाकपिः तद्यत् कम्पयमानो रेतो वर्षति, तस्माद् वृषाकपिः, तद् वृषाकपेर्वृषाकपित्वं वृषाकपिरिव वै सर्वेषु लोकेषु भाति, य एवं वेद । तस्य तृतीयेषु पादेष्वाद्यन्तयोर्न्यूङ्खनिनर्दौ करोति, अन्नं वै न्यूंखः, बलं निनर्दः, अन्नाद्यमेवास्मै तद् बले निदधाति । अथ कुन्तापं शंसति कुयं ह वै नाम कुत्सितं भवति, तद्यत्तपति, तस्मात् कुन्तापाः, तत् कुन्तापानां कुन्तापत्वम् । तप्यन्तेऽस्मै कुयानिति तप्तकुयः स्वर्गे लोके प्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । तस्य चतुर्दश प्रथमा भवन्ति, इदं जना उपश्रुतेति । ताः प्रग्राहं शंसति. यथा वृषाकपिं वार्षरूपं हि वृषाकपेस्तन्न्यायमित्येव । अथ रैभीः शंसति, वच्यस्व रेभ वच्यस्वेति । रेभन्तो वै देवाश्च ऋषयश्च स्वर्गं लोकमायन्, तथैवैतद्यजमाना रेभन्त एव स्वर्गं लोकं यन्ति, ताः प्रग्राहमित्येव । अथ पारिक्षितीः शंसति, राज्ञो विश्वजनीनस्येति । संवत्सरो वै परिक्षित्, संवत्सरो हीदं सर्वं परिक्षियतीति । अथो खल्वाहुः, अग्निर्वै परिक्षित् अग्निर्हीदं सर्वं परिक्षियतीति । अथो खल्वाहुः,गाथा एवैताः कारव्या राज्ञः परिक्षित इति । स नस्तद्यथा कुर्य्यात्, गाथा एवैतस्य शस्ता भवन्ति । यद्यु वै गाथा अग्नेरेव गाथाः संवत्सरस्य वेति ब्रूयात्, यद्यु वै मन्त्रोऽग्नेरेव मन्त्रः संवत्सरस्य वेति ब्रूयात् ताः प्रग्राहमित्येव । अथ कारव्याः शंसति इन्द्रः कारुमबूबुधदिति । यदेव देवाः कल्याणं कर्माकुर्वंस्तत् कारव्याभिरवाप्नुवन्, तथैवैतत् यजमानाः यदेव देवाः कल्याणं कर्मकुर्वन्ति, तत् कारव्याभिरवाप्नुवन्ति, ताः प्रग्राहमित्येव । अथ दिशां कल्प्तीः, पूर्वं शस्त्वा यः सभेयो विदथ्य इति । जनकल्पा उत्तराः शंसति, योनाऽउक्ताक्षो अनभ्यक्त इति, ऋतवो वै दिशः प्रजननः, तद्यद् दिशाङ्कल्प्तीः पूर्वं शस्त्वा यः सभेयो विदथ्य इति जनकल्पा उत्तराः शंसति, ऋतूनेव तत् कल्पयति, ऋतुषु, प्रतिष्ठापयति । प्रतिष्ठन्तीरिदं सर्वमनुप्रतितिष्ठति । प्रतितिष्ठति प्रजया पशुभिः, य एवं वेद । ता अर्धर्चशः शंसति प्रतिष्ठित्या एव । अथेन्द्रगाथाः शंसति, यदिन्द्रादो दाशराज्ञ इति । इन्द्रगाथाभिर्ह वै देवा असुरानाज्ञायाथैनानन्या[1]यन्, तथैवैतत् यजमाना इन्द्रगाथाभिरेवाप्रियं भ्रातृव्यमागायाथैनमागायाथैनमतियन्ति, तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव ॥ १२ ॥

---

१. जर्मनसंस्करणे "अत्यायन्" इति पाठः, स च सङ्गतः ॥ सम्पा० ॥

कण्डिका १२ ॥ षडह यज्ञ में स्तोत्रिय, अनुरूप, सुकीर्ति, वृषाकपि, कुन्ताप [अथर्व० २० । १२७–१३६], रैभी, पारिक्षिती, कारव्या, दिशां कल्पी और इन्द्र गाथाओं का वर्णन ॥

१—(अथ यत् द्वैपदौ स्तोत्रियानुरूपौ भवतः इमा नु कं भुवना सीषधाम इति) फिर जो दो पाद वाले स्तोत्रिय और अनुरूप स्तोत्र होते हैं—इमा नु कं भुवना सीषधाम—अथर्व० २० । ६३ । १, द्विपात् त्रिष्टुप्, यह मन्त्र बोला जाता है। (द्विपाद् वै पुरुषः, द्विप्रतिष्ठः पुरुषः, पुरुषः वै यज्ञः, तस्मात् द्वैपदौ स्तोत्रियानुरूपौ भवतः) दो पांव वाला ही पुरुष है, दो प्रतिष्ठा वाला [दोनों स्थूल और सूक्ष्म शरीर का आश्रय वाला] पुरुष है, पुरुष ही यज्ञ है, इसलिये दो पाद वाले स्तोत्रिय और अनुरूप होते हैं ॥

२—(अथ सुकीर्तिं शंसति अपेन्द्र प्राचो मघवन्नमित्रान् इति) फिर सुकीर्ति [सुकीर्ति ऋषि के देखे सूक्त] को वह बोलता है—अपेन्द्र प्राचो मघवन्नमित्रान्—अथर्व० २० । १२५ । १–७, यह सूक्त है। (देवयोनिः वै सुकीर्तिः, सः यः एवं देवयोन्याम् एतां सुकीर्तिं वेदकीर्तिं प्रतिष्ठापयति, भूतानां कीर्तिमान् स्वर्गे लोके प्रतितिष्ठति) विद्वानों का उत्पत्ति स्थान ही सुकीर्ति [उत्तम यश] है, वह जो पुरुष इस प्रकार विद्वानों के उत्पत्ति स्थान में इस सुकीर्ति, वेद कीर्ति को स्थापित करता है, वह प्राणियों के बीच कीर्तिमान् होता हुआ स्वर्ग लोक में प्रतिष्ठा पाता है। (प्रजया पशुभिः प्रतितिष्ठति, यः एवं वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है जो ऐसा विद्वान् है ॥

३—(अथ वृषाकपिं शंसति, वि हि सोतोरसृक्षत—इति) फिर वृषाकपि [वृषाकपि ऋषि के देखे सूक्त] को वह बोलता है, वि हि सोतोरसृक्षत—अथर्व० २० । १२६ । १—२३, यह सूक्त है। (आदित्यः वै वृषाकपिः यत् तत् कम्पयमानः रेतः वर्षति, तस्मात् वृषाकपिः, तत् वृषाकपेः वृषाकपित्वम्) सूर्य ही वृषाकपि [वृष्टि का कपाने वाला] है, क्योंकि वह कांपता हुआ जल बरसाता है, इसलिये वृषाकपि है, यह ही वृषाकपि का वृषाकपित्व है। (वृषाकपिः इव वै सर्वेषु लोकेषु भाति, यः एवं वेद) वृषाकपि, सूर्य के समान ही सब लोकों में वह चमकता है जो ऐसा विद्वान् है। (तस्य तृतीयेषु पादेषु आद्यन्तयोः न्यूङ्खनिनर्दां करोति) उस [सूक्त] के तीसरे पादों के बीच आदि अन्त में न्यूङ्ख [ओंकार सहित मन्त्र उच्चारण] के सहित निनर्द [ध्वनि विशेष] करता है। (अन्नं वै न्यूङ्खः, बलं निनर्दः, अन्नाद्यम् एव अस्मै तत्

१२—(द्वैपदौ) द्विपादयुक्तौ (कम्) सुखम् (सीषधाम) साधयेम (द्विप्रतिष्ठः) द्वे प्रतिष्ठे स्थूलसूक्ष्मशरीररूपाश्रयौ यस्य सः (भूतानाम्) प्राणिनां मध्ये (वृषाकपिम्) गो० उ० ६ । ७ । वृष्टेः कम्पयितारं चेष्टयितारं सूर्यम् (वि) वियोगे (सोतोः) ईश्वरे तोसुन्कसुनौ (प० ३ । ४ । १३) षुञ् अभिषवे—तोसुन्। अभिषोतुम्। तत्त्वरसं निष्पादयितुम् (असृक्षत) विसृष्टवन्तः त्यक्तवन्तः (रेतः) जलम् (वृषाकपिः) वृष्टेः कम्पयिता सूर्यः (न्यूङ्खनिनर्दाम्) न्यूङ्खेन सह निनर्दं ध्वनिविशेषम् (कुन्तापम्) कुङ् आर्तस्वरे—डु,

बले निदधाति) अन्न ही न्यूङ्ख है, और बल निनर्द है, खाने योग्य अन्न को ही इस [यजमान] के लिये उससे वह बल में स्थापित करता है ॥

४—(अथ कुन्तापं शंसति) फिर वह कुन्ताप सूक्त [अथर्व० २० । १२७—१३६] को बोलता है । (कुयं ह वै नाम कुत्सितं भवति, तत् यत् तपति तस्मात् कुन्तापाः, तत कुन्तापानां कुन्तापत्वम्) कुय, यह कुत्सित [निन्दित] का नाम है क्योंकि वह उसे तपाता है, इसलिये वे कुन्ताप [पाप के भस्म करने वाले] हैं, वह ही कुन्तापों का कुन्तापत्व [पापनाशक व्यवहार] है । (अस्मै कुयान् [= कुयाः] तप्यन्ते इति, तप्तकुयः स्वर्गे लोके प्रतितिष्ठति) इस [यजमान] के लिये पाप भस्म किये जाते हैं, इसलिये पाप किया हुआ वह स्वर्ग लोक में प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एव वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है, जो ऐसा विद्वान् है । (तस्य चतुर्दश प्रथमाः भवन्ति, इदं जना उपश्रुत इति) उस [कुन्ताप] के चौदह पहिले मन्त्र हैं–इदं जना उपश्रुत·····अथर्व० २० । १२७ । १—१४, यह ऋचायें हैं । (ताः प्रग्राहं शंसति, यथा वृषाकपिम्) उन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर वह बोलता है जैसे वृषाकपि सूक्त को । (वार्षरूपं हि वृषाकपेः) वृष्टि वाला रूप ही वृषाकपि का है । (तत् न्यायम् इति एव) सो वह ठीक ही है ॥

५—(अथ रैभीः शंसति, वच्यस्व रेभ वच्यस्व—इति) फिर रेभ शब्द वाली ऋचाओं को वह बोलता है—वच्यस्व रेभ वच्यस्व ·····अथर्व० २० । १२७ । ४—६, यह ऋचायें हैं । (रेभन्तः वै देवाः च ऋषयः च स्वर्गं लोकम् आयन्) रेभ [स्तुति] करते हुये ही देवों [विद्वानों] और ऋषियों [सन्मार्गदर्शकों] ने स्वर्ग लोक पाया है । (तथा एव एतत् यजमानाः रेभन्तः एव स्वर्गं लोकं यन्ति) वैसे ही इस [विधान] से यजमान रेभ [स्तुति] करते हुये ही स्वर्ग लोक पाते हैं । (ताः प्रग्राहम् इति एव) इन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है], यह ही विधान है ॥

६—(अथ पारिक्षितीः शंसति, राज्ञः विश्वजनीनस्य इति) फिर परिक्षित् शब्द वाली ऋचायें वह बोलता है, राज्ञो विश्वजनीनस्य·····अथर्व० २० । १२७ । ७—१० यह ऋचायें है । (संवत्सरः वै परिक्षित्, संवत्सरः हि इदं सर्वं परिक्षियति

यद्वा कुयं कुत्सितं+तप दाहे—घञ् । पापस्य दुःखस्य तापकं दाहकम् (तप्तकुयः) भस्मीकृतपापः (प्रग्राहम्) पादे पादे प्रगृह्य अवसाय च (न्यायम्) न्याय्यम् । उचितम् (रैभीः) रेभशब्दयुक्ताः (वच्यस्व) ब्रवीतेर्यक् । ब्रूहि । उपदिश (रेभ) रेभतिरर्चतिकर्मा—निघ० ३ । १४ । अच् । हे स्तोतः । हे विद्वन् (रेभन्तः) स्तुवन्तः (पारिक्षितीः) परिक्षित् इति शब्दयुक्ताः (परिक्षित्) परि+क्षि निवासे ऐश्वर्ये च—क्विप्, तुक् । सर्वतो निवासकः (कारव्याः) कारुशब्दयुक्ताः (राज्ञः) शासकस्य (परिक्षितः) सर्वत ऐश्वर्य्ययुक्तस्य (विश्वजनीनस्य) आत्मन्विश्वजनभोगोत्तरपदात् खः (पा० ५ । १ । ९) विश्वजन—

इति) संवत्सर ही परिक्षित् [सब ओर से बसने वाला] है, क्योंकि संवत्सर ही इस सब में सब ओर से वास करता है। (अथो खलु आहुः, अग्निः वै परिक्षित्, अग्निः हि इदं सर्वं परिक्षियति इति) फिर कोई कहते हैं—अग्नि ही परिक्षित् है, क्योंकि अग्नि इस सब में सब ओर से वास करता है। (अथो खलु आहुः, गाथाः एव एताः कारव्याः राज्ञः परिक्षितः इति) फिर कोई कोई कहते हैं—यह कारु शब्द वाली ऋचायें गाथा हैं [जिनमें] राज्ञः परिक्षितः पद आये हैं अथर्व० २० । १२७ । ९, १० । (सः नः तत् यथा कुर्यात्, गाथाः एव एतस्य शस्ताः भवन्ति) वह [ऋत्विज्] हमारे लिये उस विधान से जैसा करे, यह ऋचायें, इस [सूक्त] की गाथायें ही बोली हुई होती हैं। (यदि उ वै गाथाः अग्नेः एव संवत्सरस्य वा गाथाः इति ब्रूयात्) यदि वे गाथायें हैं, वे अग्नि की वा संवत्सर की गाथायें हैं—ऐसा वह बतलावे। (यदि उ वै मन्त्रः अग्नेः एव संवत्सरस्य वा मन्त्रः इति ब्रूयात्) जो वह मन्त्र है, वह अग्नि का वा संवत्सर का मन्त्र है—यह वह बतावे। (ताः प्रग्राहम् इति एव) इन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है], यह ही विधान है ॥

७—(अथ कारव्याः शंसति, इन्द्रः कारुमबूबुधत्—इति) फिर कारु [स्तोता] शब्द वाली ऋचाये वह बोलता है-इन्द्रः कारुमबूबुधत्··· अथर्व० २० । १२७ । ११, यह मन्त्र है। (यत् एव देवाः कल्याणं कर्म अकुर्वन् तत् कारव्याभिः अवाप्नुवन्) जो कुछ भी विद्वानों ने कल्याण कर्म किया है, वह कारु शब्द वाली ऋचाओं से पाया है। (तथा एव एतत् यजमानाः) वैसे ही इससे यजमानों ने [कल्याण कर्म पाया है]। (यत् एव देवाः कल्याणं कर्म कुर्वन्ति तत् कारव्याभिः अवाप्नुवन्ति) जो ही विद्वान् लोग कल्याण कर्म करते हैं वह कारु शब्द वाली ऋचाओं से ही पाते हैं। (ताः प्रग्राहम् इति एव) उन [ऋचाओं] को पाद पाद ग्रहण करके और ठहर कर [वह बोलता है] यह ही विधान है ॥

८—(अथ दिशां क्लृप्तीः, यः सभेयः विदथ्यः इति पूर्वं शस्त्वा) फिर दिशां क्लृप्ती [दिशाओं की रचना वाली ऋचाओं] को, यः सभेयः विदथ्यः·····—अथर्व० २० । १२८ । १, इस मन्त्र को पहिले बोलकर [वह बोलता है]। (जनकल्पाः उत्तराः शंसति योऽनाक्तोक्षो अनभ्यक्त इति) जनकल्प वाली ऋचाओं को वह पीछे बोलता है,

खप्रत्ययः। सर्वजनेभ्यो हितस्य (कारुम्) कृवापाजि० (उ० १ । १) करोतेः—उण्। कार्यकर्तारम्। स्तोतारम्—निघ० ३ । १६ (अबूबुधत्) प्रबोधितवान् (अकुर्वन्) कृतवन्तः (क्लृप्तीः) कृपू सामर्थ्ये रचनायां च—क्तिन्। रचनाः (सभेयः) सभा—ढः। सभ्यः (विदथ्यः) विदथेषु विद्वत्सु साधुः (जनकल्पाः) जनकल्पाभिधा ऋचः (अनाक्तोक्षः) नञ्+आ+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—क्तः+अक्षू व्याप्तौ—अच्। अशुद्धव्यवहारयुक्तः (अनभ्यक्तः) नञ्+अञ्जू व्यक्तौ—क्तः। अव्यक्तः। अविख्यातः (अर्धर्चशः) पादे पादे अर्धर्चेन अर्धर्चेन (यत्) यदा (अदः) तत् (दाशराज्ञे) दाशृ दाने—घञ्+राजृ ऐश्वर्ये—कनिन्। दाशानां दानपात्राणां भृत्यानां स्वामिहिताय (आज्ञाय) आकारोऽत्र अवशब्दार्थे। अवज्ञाय। अवज्ञातवन्तः।

यो ऽनाक्ताक्षः अनभ्यक्तः·····अथर्व० २० । १२८ । ६, यह मन्त्र है । (ऋतवः वै दिशः प्रजननः [प्रजननाः]) ऋतुयें ही दिशा के उत्पन्न करने वाले हैं । (तत् यत् दिशां क्लृप्तीः, यः सभेयः विदथ्यः इति पूर्वं शस्त्वा जनकल्पाः उत्तराः शंसति, ऋतून् एव तत् कल्पयति, ऋतुषु प्रतिष्ठापयति) फिर जो दिशां क्लृप्तीः को, यः सभेयः विदथ्यः····· इस मन्त्र को पहिले बोलकर, [बोलता है] और जनकल्प ऋचाओं को पीछे बोलता है, ऋतुओं को ही वह उससे समर्थ करता है और ऋचाओं में [यजमान को] स्थापित करता है । (प्रतिष्ठन्तीः अनु इदं सर्वं प्रतितिष्ठति) प्रतिष्ठा वाली ऋचाओं के साथ यह सब [जगत्] प्रतिष्ठा पाता है । (प्रजया पशुभिः प्रतितिष्ठति यः एवं वेद) प्रजा से और पशुओं से वह प्रतिष्ठा पाता है जो ऐसा विद्वान् है । (ताः अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उन ऋचाओं को आधी आधी ऋचाओं करके प्रतिष्ठा के लिये ही वह बोलता है ॥

९—(अथ इन्द्रगाथाः शंसति यदिन्द्रादो दाशराज्ञः इति) फिर इन्द्रगाथाओं को वह बोलता है, यदिन्द्रादो दाशराज्ञः ····अथर्व० २० । १२८ । १२—१६, यह मन्त्र हैं । (इन्द्रगाथाभिः ह वै देवाः असुरान् अथ एनान् अन्यान् आज्ञाय) इन्द्र गाथाओं से ही देवताओं ने असुरों को और इन दूसरों को निन्दित किया । (तथा एव एतत् यजमानाः इन्द्रगाथाभिः एव अप्रियं भ्रातृव्यम् अथ एनम् आगाय अतियन्ति) वैसे ही यह है—यजमान लोग इन्द्र गाथाओं से ही अप्रिय वैरी को फिर इस [शत्रु] को चढ़ाई करके लाँघते हैं । (ताम् अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उस ऋचा को आधी आधी ऋचा करके प्रतिष्ठा के लिये ही वह बोलता है ॥ १२ ॥

भावार्थः—मनुष्य वेदविहित कर्म करने से बाहिरी और भीतरी शत्रुओं को हराकर संसार में उन्नति करें ॥ १२ ॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । २९, ६ । ३२, ६ । ३३ से मिलाओ ।

विशेषः २—प्रतीक वाले सूक्तों के पहिले पहिले मन्त्र अर्थ सहित लिखे जाते हैं, शेष मन्त्र वेद में देखो ॥

१—दो स्तोत्रियानुरूप—इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः । यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥—अ० २० । ६३ । १—९, तथा देखो ऋ० १० । १५७ । १—५, यजु० २५ । ४६, साम उ० ४ । १ । तृच २३ ॥ (इमा) यह (भुवना) उत्पन्न पदार्थ, (च) और (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला सभापति] (च) और (विश्वे) सब (देवाः) विद्वान् लोग हम (नु) शीघ्र (कम्) सुख को (सीषधाम) सिद्ध करें । (आदित्यैः सह) अखण्ड व्रतधारी विद्वानों के साथ (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला सभापति] (नः) हमारे (यज्ञम्) यज्ञ [मेल मिलाप आदि] (च) और (तन्वम्) शरीर (च) और (प्रजाम्) प्रजा [सन्तान आदि] को (च) भी (चीक्लृपाति) समर्थ करें ॥

तरस्कृतवन्तः (आगाय)आ+गाङ् गतौ—ल्यप् । अभिमुख्येन प्राप्य (अतियन्ति) उल्लंघयन्ति । जयन्ति ॥

२--(अपेन्द्र प्राचो मघवन्नमित्रानपापाचो अभिभूते नुदस्व । अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम ॥ १ ॥ अ० २० । १२५ । १-७, ऋ० १० । १३१ । १--७ ।) यह मन्त्र आ चुका है—गो० उ० ६ । ४ ॥

३—वृषाकपि सूक्त—वि हि सोतोरसृक्षत नेन्द्रं देवममंसत । यत्रामदद् वृषाकपिर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ १ ॥ अ० २० । १२६ । १—२३, ऋ० १० । ८६ । १—२३ ॥ (हि) क्योंकि (सोतोः) तत्त्वरस का निकलना (वि असृक्षत) उन्होंने [लोगों ने] छोड़ दिया है, [इसी से] (देवम्) विद्वान् (इन्द्रम्) इन्द्र [बड़े ऐश्वर्य वाले मनुष्य आत्मा] को (न) (अमंसत) उन्होंने नहीं जाना, (यत्र) जहां [संसार में] (अर्यः) स्वामी (मत्सखा) मेरा [देह वाले का] साथी (वृषाकपिः) वृषाकपि [बलवान् कपाने वाले अर्थात् चेष्टा कराने वाले जीवात्मा] ने (पुष्टेषु) पुष्टिकारक धनों में (अमदत्) आनन्द पाया है, (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाला मनुष्य] (विश्वस्मात्) सब [प्राणीमात्र] से (उत्तरः) उत्तम है ॥

४—कुन्ताप सूक्त—इदं जना उप श्रुत नराशंस स्तविष्यते । षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ॥ १ ॥ अ० २० । १२७ । १—१४, कुन्ताप सूक्त—(जनाः) हे मनुष्यो ! (इदं) यह (उप) आदर से (श्रुत) सुनो, [कि] (नराशंसः) मनुष्यों में प्रशंसा वाला पुरुष (स्तविष्यते) बड़ाई किया जावेगा । (कौरम) हे पृथिवी पर मरण करने वाले राजन् ! (षष्टिम् सहस्रा) साठ सहस्र (च) और (नवतिम्) नब्बे [अर्थात् अनेक दानों] को (रुशमेषु) हिंसकों के फेंकने वालों के बीच (आ दद्महे) हम पाते हैं ॥

५—रैभी ऋचायें—वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः । नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥४॥ अ० २० । १२७ । ४--६ ॥ (रेभ) हे विद्वान् ! (वच्यस्व) उपदेश कर, (न) जैसे (शकुनः) पक्षी (पक्वे) फल वाले (वृक्षे) वृक्ष पर [चहचहाता है] । (नष्टे) दुख व्यापने पर (भुरिजोः) दोनों धारण पोषण करने वाले [स्त्री पुरुष] की (इव) ही (जिह्वा) जीभ (चर्चरीति) चलती रहती है, (न) जैसे (क्षुरः) छुरा [केशों पर चलता है] ॥

६--पारिक्षिती ऋचायें—राज्ञो विश्वजनीनस्य यो देवो मर्त्याँ अति । वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ॥ अ० २० । १२७ । ७–११ ॥ (यः) जो (देवः) देव [विजय चाहने वाला पुरुष] (मर्त्यान् अति) मनुष्यों में बढ़कर [गुणी है] (विश्वजननीस्य) सब लोगों के हितकारी, (वैश्वानरस्य) सबके नेता, (परिक्षितः) सब प्रकार ऐश्वर्य वाले (राज्ञः) उस राजा की (सुष्टुतिम्) उत्तम स्तुति को (आ) भले प्रकार (सुनोत) मथो ॥

७—कारव्या ऋचायें—इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जनम् । ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ॥ अ० २० । १२७ । ११ ॥ (इन्द्रः) इन्द्र [बड़े ऐश्वर्य वाले पुरुष] ने (कारुम्) काम करने वाले को (अबूबुधत्) जगाया है—(उत्तिष्ठ) उठ और (जनम्) लोगों में (वि चर) विचर, (मम इत् उग्रस्य) मुझ ही तेजस्वी की

[भक्ति] (चकृधि) तू करता रहे, (सर्वः) प्रत्येक (अरिः) बैरी (इत्) भी (ते) तेरी (पृणात्) तृप्ति करे ॥

८—दिशां क्लृप्ति ऋचायें—यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः । सूर्यं चामू रिशादसस्तद् देवाः प्रागकल्पयन् ॥ अ० २० । १२८ । १—१६ ॥ (यः) जो (सभेयः) सभ्य [सभाओं में चतुर], (विदथ्यः) विद्वानों में प्रशंसनीय, (सुत्वा) तत्त्व रस निकालने वाला (अथ) और (यज्वा) मिलनसार (पूरुषः) पुरुष है । (अमू) उस (सूर्यम्) सूर्य [के समान प्रतापी] को (च) निश्चय करके (तत्) तब (रिशादसः) हिंसकों के नाश करने वाले (देवाः) विद्वानों ने (प्राक्) पहले [ऊँचे स्थान पर] (अकल्पयन्) माना है ॥

९, उत्तर जनकल्प ऋचा—योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः । अब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥ अ० २० । १२८ । ६ ॥ (यः) जो (ब्रह्मणः) ब्रह्मा [वेदज्ञानी] का (पुत्रः) पुत्र (अब्रह्मा) अब्रह्मा [वेद न जानने वाला, कुमार्गी] (अनाक्ताक्षः) अशुद्ध व्यवहार वाला और (अनभ्यक्तः) अविख्यात है । वह (अमणिवः) मणियों [रत्नों] का न रखने वाला और (अहिरण्यवः) तेज ही न होवे, (तोता) यह कर्म (कल्पेषु) शास्त्र विधानों में (संमिता) प्रमाणित है ॥

१०, इन्द्रगाथा ऋचायें—यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः । विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते ॥ अ० २० । १२८ । १२—१६ ॥ (यत्) जब, (इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले मनुष्य] (दाशराज्ञे) दानपात्र सेवकों के राजा के लिये [अर्थात् अपने लिये] (अदः) उस [वेदोक्त] (मानुषम्) मनुष्य के कर्म को (वि गाहथाः) तूने बिलो डाला है [गड़बड़ कर दिया है] । (सर्वस्मै) सबके लिये (विरूपः) वह दुष्ट रूप वाला व्यवहार (आसीत्) हुआ है । यह [मनुष्य] (यक्षाय) पूजनीय कर्म के लिये (सह) मिल कर (कल्पते) समर्थ होता है ॥

कण्डिका १३ ॥

अथैतशप्रलापं शंसति; एता अश्वा आप्लवन्त इति । ऐतशो ह मुनिर्यज्ञस्यायुर्ददर्श । स ह पुत्रानुवाच, पुत्रका यज्ञस्यायुरभिददृक्षं तदभिलपिष्यामि मा मा तृप्तं मन्यध्वमिति । तथेति तदभिललाप । तस्य ह इत्यग्निरैतशायनो ज्येष्ठः पुत्रोऽभिदुर्त्य मुखमपि जग्राह, ब्रुवन्, तृप्तो नः पितेति । स होवाच, धिक् त्वा जाल्मापरस्य पापिष्ठान्ते प्रजां करिष्यामीति । यो मे मुखं प्राग्रहीष्यो यदि जाल्म मे मुखं प्राग्रहीष्यः, शतायुषं ग्रामकरिष्यं सहस्रायुषं पुरुषमिति । तस्मादभ्यग्नय ऐतशायना आजानेयाः सन्तः पापिष्ठा अन्येषां बलिहृतः पितायच्छन् ताः स्वेन प्रजापतिना स्वया देवतया । यदैतशः, प्रलापः, तत् स्वर्गस्य लोकस्य रूपम् । यद्वैवैतशः प्रलापः, यातयामा वा क्षितिः, ऐतशैतशः प्रलापोऽयातयामा मे यज्ञोऽसदक्षितिर्मे[२] यज्ञोऽसदिति । तं वा ऐतशैतशप्रलापं शंसति, पदावग्राहन्तासामुत्तमेन पदेन प्रणौति, यथा न्निविदः । अथ प्रवल्हिकाः पूर्वं[३] शस्त्वा विततौ किरणौ द्वाविति प्रतिराघानुत्तराः शंसति, भुगित्यभिगत इति

१ पू. सं. "प्रागृहीष्यः" इति पाठः । २. पू. सं अक्षिति मे इति पाठः ॥
३. पू. सं. पूर्वशस्त्वा इति पाठः ॥ सम्पा० ॥

प्रवल्लिकाभिर्ह वै देवा असुराणां रसान् प्रववृहुः । तद्यथाभिर्ह वै देवा असुराणां रसान् प्रववृहुः, तस्मात् प्रवल्लिकाः, तत् प्रवल्लिकानां प्रवल्लिकात्वम् । ता वै प्रतिराधैः प्रत्यराध्नुवन् । तद्यत् प्रतिराधैः प्रत्यराध्नुवन्, तस्मात् प्रतिराधाः, तत् प्रतिराधानां प्रतिराधत्वम् । प्रवल्लिकाभिरेव द्विषतां भ्रातृव्याणां रसान् प्रवल्लिकाभ्यः वै प्रतिराधैः प्रतिराध्नुवन्ति, ताः प्रग्राहमित्येव । अथाजिज्ञासेन्याः शंसति, इहेत्थ प्रागपागुदगधरागिति । आजिज्ञासेन्याभिर्ह वै देवा असुरानाज्ञाय अथैनानत्यायन्, तथैवैतद्यजमाना आजिज्ञासेन्याभिरेवाप्रियं भ्रातृव्यमागायाथैनमतियन्ति । ता अर्द्धर्चशः शंसति, प्रतिष्ठित्या एव । अथातिवादं शंसति, वी३मे देवा अक्रंसतेति । श्रीर्वा अतिवादस्तमेकर्च्चं शंसति, एकस्ता वै श्रीस्तां वै विरेभं शंसति, विरेभैः श्रियं पुरुषो वहतीति । तामर्द्धर्चशः शंसति, प्रतिष्ठित्या एव ॥ १३ ॥

कण्डिका १३ ॥ कुन्ताप सूक्तों में ऐतशप्रलाप, प्रवल्लिका, प्रतिराध, आजिज्ञासेन्या, और अतिवाद मन्त्रों का प्रयोग ॥

(अथ ऐतशप्रलापं शंसति, एता अश्वा आप्लवन्ते, इति) अब ऐतशप्रलाप [ऐतश ज्ञानवान् ऋषि का आलाप] वह [ऋत्विज्] बोलता है—एता अश्वा आप्लवन्ते ·····अथर्व० २० । १२६ । १–२०, यह सूक्त है ।[1] (ऐतशः ह मुनिः यज्ञस्य आयुः ददर्श) ऐतश [ज्ञानवान्] मुनि ने [इस सूक्त में] यज्ञ के आयु [जीवन काल] को देखा । (सः ह पुत्रान् उवाच, पुत्रकाः यज्ञस्य आयुः अभिददृक्षम् तत् अभिलपिष्यामि, मा मा तृप्तं मन्यध्वम् इति) वह पुत्रों से बोला—हे प्यारे पुत्रो ! यज्ञ के जीवन काल को मैंने देखा है; उसको मैं आलापूंगा, मुझको तुम मत तृप्त मानो [मत रोको]। (तथा इति) [वे बोले] ऐसा ही हो । (तत् अभिललाप) उसने उसे आलापा । (तस्य ह इति अग्निः ऐतशायनः ज्येष्ठः पुत्रः अभिदुर्दृत्य मुखम् अपि जग्राह, ब्रुवन् नः पिता तृप्तः इति) अग्नि नामक ऐतश गोत्र में उत्पन्न उसके जेठे पुत्र ने निरादर करके मुँह पकड़ लिया यह बोलते हुये—हमारा पिता बस करे । (सः ह उवाच, धिक् त्वा जाल्मापरस्य ते प्रजां पापिष्ठां करिष्यामि इति) वह बोला—तुझे धिक्कार है, तुझ क्रूर व्यवहार वाले की प्रजा

१३—(ऐतशप्रलापम्) इणस्तशन्तशसुनौ (उ० ३ । १४६) इण् गतौ—तशन्, एतश—अण् ऐतशम् । ऐतशस्य ब्राह्मणस्य सम्बन्धिनं प्रलापम् आलापम् (अश्वाः) अशूङ् व्याप्तौ—क्वन्, टाप् । व्यापिकाः प्रजाः (आ) आगत्य (प्लवन्ते) गच्छन्ति (आयुः) एतेर्णिच्च (उ० २ । ११८) इण् गतौ—उसिः णित् । जीवनम् । जीवनज्ञानम् (पुत्रकाः) हे प्रियपुत्राः (अभिददृक्षम्) दृष्टवानस्मि (अभिलपिष्यामि) अभितः कथयिष्यामि (ऐतशायनः) अश्वादिभ्यः फञ् (पा० ४ । १ । ११०) एतश ऐतश वा—फञ् बाहुलकात् । ऐतशस्य गोत्रोत्पन्नः (अभिदुर्दृत्य) अनादृत्य (ब्रुवन्)

---

१. ऐतरेय ब्राह्मण के अनुसार ऐतश मुनि के पुत्र ने ऐतश को मनोविकृत बताया है जो कि इसके अग्रिम प्रलाप से स्पष्ट है ॥ सम्पा० ॥

को महादुखी कर दूंगा, (यः मे मुखं प्राग्रहीष्यः यदि जाल्म मे मुखं प्राग्रहीष्यः) जिस तूने मेरे मुँह को पकड़ा है, यदि हे क्रूर ! तूने मेरे मुँह को पकड़ा है। (शतायुषं गाम् अकरिष्यं सहस्रायुषं पुरुषम् इति) [नहीं तो] सौ बरस वाली गाय और सहस्र वर्ष वाला पुरुष को मैं कर देता। (तस्मात् अभ्यग्नयः ऐतशायनाः आजानेयाः सन्तः पापिष्ठाः अन्येषां बलिहृतः, पिता ताः स्वेन प्रजापतिना स्वया देवतया अयच्छन् [= अयच्छत्]) इसलिये ऐतश के गोत्र वाले अभ्यग्नि नाम वाले आजानेय [बड़ी गति से ले चलने वाले उत्तम घोड़ों के समान] होते हुये महादुखी, दूसरों के अन्न पाने वाले [हुये, क्योंकि] पिता ने उन [प्रजा लोगों] को अपने प्रजापालक व्यवहार से अपने देवता द्वारा रोका [शाप दिया]। (यत् ऐतशः, प्रलापः तत् स्वर्गस्य लोकस्य रूपम्) जो यह ऐतश आलाप है, वह स्वर्ग लोक का रूप है। (यत् उ एव ऐतशः प्रलापः यातयामा वा क्षितिः) क्योंकि उचित समय बीता हुआ ही ऐतशप्रलाप हानि है। (अयातयामा) [= अयातयामः] ऐतशैतशः प्रलापः मे यज्ञः असत् अक्षितिः मे यज्ञः असत् इति) उचित समय बिना चूका हुआ ऐतशप्रलाप वाला मेरा यज्ञ होवे, हानि रहित मेरा यज्ञ होवे। (तं वै ऐतशैतशप्रलापं पदावग्राहं शंसति, तासाम् उत्तमेन पदेन यथा निविदः प्रणौति) उस ही ऐतशप्रलाप को एक एक पाद लेकर वह बोलता है, [उन ऋचाओं] के पिछले पाद से निविद् मन्त्रों के समान प्रणव [ओङ्कार] करता है ॥

(अथ प्रवल्हिकाः पूर्वं शस्त्वा, विततौ किरणौ द्वौ, इति प्रतिराधान् उत्तराः शंसति, भगित्यभिगतः इति) फिर प्रवल्हिका [शत्रुओं को चलायमान करने वाली ऋचायें] पहले बोलकर—विततौ किरणौ द्वौ इति ····अथर्व० २०। १३३। १—६, यह मन्त्र हैं, प्रतिराधों [शत्रुओं को रोकने वाले मन्त्रों] को पीछे वाली ऋचायें करके वह बोलता है—भगित्यभिगतः इति ···· अथर्व० २०। १३५। १–३, यह प्रतिराध मन्त्र हैं। (प्रवल्हिकाभिः ह वै देवाः असुराणां रसान् प्रववृहुः) प्रवल्हिका ऋचाओं से ही देवताओं [विद्वानों] ने असुरों के रसों [पराक्रमों] को उखाड़ दिया। (तत्

कथयन् सन् (तृप्तः) पर्याप्तः (जाल्मापरस्य) आर्षो दीर्घः। जल आच्छादने—मण्। जाल्मे क्रूरव्यवहारे परस्य[1] तत्परस्य (प्राग्रहीष्यः) प्र–अग्रहीष्यः। प्रकर्षेण गृहीतवान् असि (गाम्)—ऐ० ब्रा० ६। ३३। धेनुम् (सहस्रायुषम्) सहस्रवर्षजीवनयुक्तम् (आजानेयाः) अज गतिक्षेपणयोः—घञ् + आ + णीञ् प्रापणे—यत्। आजेन गमनेन आनेतारः। उत्तमघोटका इव (बलिहृतः) आहारस्य प्रापकाः (अयच्छन्) अयच्छत् नियमितवान् (यातयामा) विगतयोग्यः समयः (क्षितिः) हानिः (अयातयामा) प्राप्तयोग्यसमयः (असत्) भवेत् (पदावग्राहम्) पादेन पादेन अवगृह्य (प्रणौति) प्रणवेन ओङ्कारेण सह शंसति (प्रवल्हिकाः) प्र + ह्वल चलने—ण्वुल्, टाप्, प्रत्ययस्थात् कात्०(पा० ७।३।४४) इतीत्वम् प्रवल्हिकाख्याः ऋचः (प्रतिराधान्) प्रतिराधकान्।

---

१. मूलपाठ पर नहीं, अपितु अपर है। अतः यह समास अर्थयुक्त नहीं बन सकेगा। 'अपरः जाल्मः' जाल्मापरः,—राजदन्तादित्वात् परनिपातः' यह उचित जान पड़ता है ॥ सम्पा० ॥

यथा आभिः ह वै देवाः असुराणां रसान् प्रववृहुः, तस्मात् प्रवल्हिकाः, तत् प्रवल्हिकानां प्रवल्हिकात्वम्) सो जैसे इन [ऋचाओं] से ही विद्वानों ने असुरों के रसों को उखाड़ दिया, इसलिये यह प्रवल्हिका [चलायमान करने वाली ऋचायें] हैं—यही प्रवल्हिकाओं का प्रवल्हिकापन है । (**ताः वै प्रतिराधैः प्रत्यराध्नुवन्**) उन [ऋचाओं] ने ही प्रतिराध मन्त्रों से [असुरों के पराक्रमों को] हटा दिया । (**तत् यत् प्रतिराधैः प्रत्यराध्नुवन्, तस्मात् प्रतिराधाः, तत् प्रतिराधानां प्रतिराधत्वम्**) सो जो प्रतिराध मन्त्रों से हटा दिया, इसलिये वे प्रतिराध मन्त्र हैं, यह ही प्रतिराध मन्त्रों का प्रतिराधपन है । (**प्रवल्हिकाभिः एव द्विषतां भ्रातृव्याणां रसान् प्रवल्हिकाः, ताः वै प्रतिराधैः प्रतिराध्नुवन्ति, ताः प्रग्राहम् इति एव**) प्रवल्हिका ऋचाओं से ही अप्रिय वैरियों के पराक्रमों को वे चलायमान करने वाली ऋचायें ही प्रतिराध मन्त्रों से हटा देती हैं, उनको पाद पाद करके [वह बोलता है] ॥

(**अथ आजिज्ञासेन्याः शंसति, इहेत्थ प्रागपागुदगधरागिति**) फिर आजिज्ञासेन्याओं [शत्रुओं का तिरस्कार करने वाली ऋचाओं] को वह बोलता है—**इहेत्थ प्राग्पागुदगधराक् इति**" अथ० २० । १३४ । १–४, यह मन्त्र है । **(आजिज्ञासेन्याभिः ह वै देवाः असुरान् आज्ञाय अथ एनान् अत्यायन् तथा एव एतत् यजमानाः आजिज्ञासेन्याभिः एव अप्रियं भ्रातृव्यम् आगाय अथ एनम् अतियन्ति ।)** आजिज्ञासेन्या ऋचाओं से ही विद्वानों ने असुरों को तिरस्कार करके फिर उनको उल्लंघन किया, वैसे ही अब यजमान लोग आजिज्ञासेन्या ऋचाओं से ही अप्रिय बैरी पर चढ़कर फिर उसको उल्लंघन करते हैं । (**ताः अर्धर्चशः प्रतिष्ठित्यै एव शंसति**) उन [ऋचाओं] को आधी आधी ऋचाओं से प्रतिष्ठा के लिये वह बोलता है ॥

(**अथ अतिवादं शंसति, वी३मे देवा अक्रंसत इति**) फिर वह अतिवाद [शत्रुओं के अधिक्षेप अर्थात् घुड़कने वाले मन्त्र] को वह बोलता है—वी३मे देवा अक्रंसत इति"" अथर्व० २० । १३५ । ४, यह वह मन्त्र है । (**श्रीः वै अतिवादः, तम् एकर्चं शंसति**) श्री ही [सम्पत्ति का हेतु] अतिवाद है । उस एक ऋचा वाले को वह बोलता है । (**एकः ताः** [**एका सा**] **श्रीः, तां वै विरेभं शंसति, विरेभैः श्रियं पुरुषः वहति इति**) एक ही वह श्री है, उस [ऋचा] को विविध ध्वनि से वह बोलता है, विविध

प्रतिराधसंज्ञान् मन्त्रान् (भुक्) भुज पालनाभ्यवहारयोः—क्विप् । पालकः परमात्मा (अभिगतः) आभिमुख्येन प्राप्तः (रसान्) वीर्याणि (प्रववृहुः) वृहू उद्यमने—लिट् । उद्यतवन्तः । उत्पाटितवन्तः (प्रग्राहम्) पादेन पादेन गृहीत्वा (आजिज्ञासेन्याः) आकारो अत्र अवशब्दार्थे । आज्ञातुमवज्ञातुमिच्छा आजिज्ञासा, तामर्हन्तीति तत् साधनीभूता ऋचः (इत्थ) इत्थम् । अनेन प्रकारेण (प्राक्) प्राच्यां दिशि (अपाक्) प्रतीच्यां दिशि (उदक्) उदीच्यां दिशि (अधराक्) नीच्यां दक्षिणस्यां दिशि (आज्ञाय) अवज्ञातवन्तः (आगाय) आभिमुख्येन प्राप्य (अतिवादम्) अतिक्षेपम् । तिरस्कारम् । आतिवादाख्यं सूक्तम् (इमे)

ध्वनियों से श्री को पुरुष पाता है। (ताम् अर्धर्चशः प्रतिष्ठित्यै एव शंसति) उसको आधी आधी ऋचा करके प्रतिष्ठा के लिये ही वह बोलता है ॥ १३ ॥

भावार्थः—जो मनुष्य वेदों को विचार कर प्रयत्न के साथ वैरियों को निर्बल करते हैं, वे ही श्रीमान् होते हैं ॥१३॥

विशेषः १—इस कण्डिका को ऐ० ब्रा० ६ । ३३ से मिलाओ ॥

विशेषः २—प्रतीक वाले सूक्तों के पहिले पहिले मन्त्र अर्थ सहित लिखे जाते हैं। शेष मन्त्र वेद में देखो—

कुन्तापसूक्तानि ॥

१, ऐतश सूक्त—एता अश्वा आप्लवन्ते ॥ १ ॥ प्रतीपं प्राति सुत्वनम् ॥२॥ अथ० २० । १२९ । १—२० ॥ (एताः) यह (अश्वाः) व्यापक प्रजायें (प्रतीपम्) प्रत्यक्ष व्यापक (सुत्वनम् प्राति) ऐश्वर्य वाले [परमेश्वर] के लिये (आ) आकर (प्लवन्ते) चलती हैं ॥ १, २ ॥

२, प्रवल्लिका ऋचायें—विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः । न वै कुमारि तत् तथा यथा कुमारि मन्यसे ॥ अथ० २० । १३३ । १—६ ॥ (द्वौ) दोनों (किरणौ) प्रकाश की किरणें [शारीरिक बल और आत्मिक पराक्रम] (विततौ) फैले हुये हैं, (तौ) उन दोनों को (पूरुषः) पुरुष [देहधारी जीव] (आ) सब ओर से (पिनष्टि) पीसता है [सूक्ष्म रीति से काम में लाता है]। (कुमारि) हे कुमारी ! [कामना योग्य स्त्री] (वै) निश्चय करके (तत्) वह (तथा) वैसा (न) नहीं है, (कुमारि) हे कुमारी ! (यथा) जैसा (मन्यसे) तू मानती है ॥

३, प्रतिराध सूक्त - भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः । दुन्दुभिमाहननाभ्यां जरितरोथामो दैव ॥ अथ० २० । १३५ । १—३ ॥ (भुक्) पालने वाला [परमात्मा] (अभिगतः) सामने पाया गया है—(इति) ऐसा है, (शल्) शीघ्रगामी वह (अपक्रान्तः) सुख से आगे चलता हुआ है—(इति) ऐसा है, (फल्) सिद्धि करने वाला वह (अभिष्ठितः) सब ओर ठहरा हुआ है—(इति) ऐसा है। (जरितः) हे स्तुति करने वाले (दैव) परमात्मा को देवता मानने वाले विद्वान् ! (दुन्दुभिम्) ढोल को (आहननाभ्याम्) दो डंकों से (आ) सब ओर (उथामः) हम उठावें [बल से बजावें]॥

४, आजिज्ञासेन्या ऋचायें—इहेत्थ प्रागपागुदगधराग्—अरालागुदभर्त्सथ—अथ० २० । १३४ । १—४ ॥ (इह) यहां (इत्थ) इस प्रकार (प्राक्) पूर्व में, (अपाक्) पश्चिम में, (उदक्) उत्तर में और (अधराक्) दक्षिण में—(अरालागुदभर्त्सथ) हिंसा की गति को धिक्कारने वाला परमात्मा है ॥

प्रसिद्धाः (अक्रंमत) क्रमु पादविक्षेपे । पादं विक्षिप्तवन्तः । अग्रेगताः (विरेभम्) ध्वनिविशेषम् (वहति) प्राप्नोति ॥

५—अतिवाद मन्त्र—वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर। सुसत्यमिद् गवामस्यसि प्रखुदसि—अथ० २० । १३५ । ४ ॥ (इमे देवाः) इन विद्वानों ने (वि) विविध प्रकार (अक्रंसत) पैर बढ़ाया है, (अध्वर्यो) हे हिंसा न करने वाले विद्वान् ! (क्षिप्रम्) शीघ्र (प्रचर) आगे बढ़ और (प्रखुदसि) बड़े आनन्द में (असि) तू हो, (असि) तू हो, [यह वचन] (गवाम्) स्तोताओं [गुण व्याख्याताओं] का (सुसत्यम् इत्) बड़ा ही सत्य है ॥

कण्डिका १४ ॥

